हरि॰
१

ॐ श्रीगणेशाय नमः श्रीसरस्वत्यै नमः यद्वक्त्रं मुकुरायते ह्रियमनोमायाः परागद्रूपतां निर्मुक्तास्त्यविमाहिमापि च विराट्स्वे
शभावं गते तं प्रत्यग्दृग्दृश्यमन्तरमशुमस्तोपनेत्रं नृपाः श्रीगोपालमुपास्महे श्रुतिशिरोवंशीरवैर्दर्शितं १ वात्सल्येनाभिभावी
वहिनुद्रवसितस्मातिलकोऽप्रतिष्ठामीमांसामातिहार्यं यदर्जितगुणगणायप्रसंख्यातिसौख्यः तस्मै देव्यागमुद्रे निहितमुपनिषद्वाक्य
हेदैः परं मे भाग्यं श्रीलक्ष्मणार्यो जगति विजयते यस्य लेशाः शिवाद्याः २ व्यासश्चक्रे विचित्रं होत्रमतपथं तद्द्वयं यः पुराणेतिहासेष्वखिलेनै
कान्यैकवीजं फलमपि तिविहितं योगशास्त्रं च भाष्ये मूलध्वांतापहं सश्रुतिशिरस्वरगिराव्रजस्तन्नैरहस्यं वेदव्यासस्य भूयादखिलभव
भयध्वस्तयेऽस्मद्धितानां ३ हरिविधिविबुधेशार्कपञ्चास्यव्यासशुकदेवान् वैशम्पायनमुख्यांश्च वमे चतुरः पुराणगुरुमुख्यान् ४
सर्वविघ्नशमनाभाविघ्नकीर्तेर्द्वैरूप्ये श्रीनारायणाधीशं नृपोऽहं हरिहरौ नुमः ५ बहून्समाहृत्य विभिन्नदेशगान्कोशान्विनिश्चित्य च
पाठमग्र्यं प्राचां गुरूणामनुसृत्य वाचमारभ्यतेऽयं हरिवंशदीपः ६ टीकांतराणि दृष्ट्वैव प्रमाणिवात्स्यार्थरतानि च कामं यतु
श्चतार्निगूढार्थं च यत्प्रकाशे दीपः स्वमोभारतमंदिरेऽस्मिन् ७ ईशप्रसादादवितुं स्वदेशान्भगीरथेनेव मया प्रणीता वंशे हरेर्या
ऽज्ञानतीर्थगंगा लोकत्रयीजाघमलं धुनोतु ८ उत्तानैर्धिक्कोशविग्रहबलप्रेषुनैर्व्याख्यितं गंभीरेषु नयेष्वतोनवाहताः कूटा
ननस्फोटिताः नष्टिज्ञानतमस्तरानततिर्भक्तानन्नाह्लादितानोदीनाम्यखिलप्रभाषणगानविहताः श्रीलक्ष्मणार्यश्रितैः ९ इह
खलु भगवान्पाराशर्यः परमकारुणिकः सकलसंसारनर्यसंकटात्जडानुद्दिधीर्षुः सर्वश्रुतिरहस्यप्रकाशकं महाभारता
ख्यमितिहासं प्रणिनाय तत्र शतपर्वाणि तेषां तिमपर्व चेदं हरिवंशाख्यं यथोक्तं पर्वानुक्रमणिकाध्याये हरिवंशस्ततः
पर्वं पुराणं खिलसंज्ञितं विष्णुपर्वशिशोश्चर्या विष्णोः कंसवधस्तथा भविष्यपर्व चाप्युक्तं खिलेष्वेवाद्भुतं महत् ॥

श्रु

राम॰
१

एतत्सर्वंशतंपूर्णंव्यासेनोक्तंमहात्मनेति तत्रग्रंथसंख्यायामप्येकंशतंसहस्रंचमानुषेषुप्रतिष्ठितमित्युक्तायाः हरिवंशे नैव
पूरणात् हरिवंशांतेभविष्योत्तरमेतत्तेकथितंभारतमशेषमुपसंहाराच्चभारतांतर्गतत्वमस्य यच्चशाखांतरस्थशोखांतरेग्रंथ
ज्ञनेनत्र्यामस्तोतेपथ्यावद्धेवेषुश्रीमत्क्रमेधास्त्क्तादिनातिवलमित्युच्यते तथाचाष्टादशपर्वात्मनीतिहासेहरिवंशाख्यखिलंवि
ष्णुपुराणभविष्यपुराणरूपंतत्रतत्रसवितस्यकृष्णमाहात्म्यस्यमोक्षधर्मोपयोगिनोवैराग्यस्यचोपबृंहणार्थंपठितं पुराणांतरवि
लसंज्ञितमितितत्रपुराणशब्दप्रयोगात् एवंचयथाधनुर्वेदादिहितोपसेमपागोवेदांतरविहिताभ्यांश्रोत्रशास्त्राभ्यांविनानर्थे
तेएवंभारतपारायणमपिहरिवंशंविनानपर्यंतइतिज्ञापनार्थं पर्वसंख्यायांश्लोकसंख्यायांचास्यांतर्भावउक्तः अस्मत्पा
तत्रसत्यांतरमेवावसाच्छिदित्याहुस्तावत् टीकांतरोक्तप्रकारान्विहायविस्तरभयादमूलत्वाच्चनलिख्यंते ग्रंथादौविघ्नविघा
तायग्रंथप्रचयगमनायचकृतंमंगलंशिष्यशिक्षार्थंपुनःस्मारयति नारायणंनमितततेरात्मनाद्यविद्यावृताजीवेनस्वकर्मद्वा
रासंहृष्टंनारंशरीरंतदेवअयनंप्रवेशस्थानंयस्यसः तंना ॥ श्री॥ ॐ ॥ ॐ ॥ १८ ॥ः = ॥ = ॥ = ॥ = ॥ = ॥ः =

रायणांजीवान्नियमयितुमंतः प्रविष्टंशास्तारं तथाच श्रुतिः अंतः प्रविष्टः शास्ता जनानामिति तथा नरं जीवं हिरण्यगर्भं ततउत्तमं हिरण्यगर्भाद्धि उत्कृष्टतरोंतर्यामी ततउत्कृष्टतमस्तं शुद्धचिदात्मानमिति एवशब्दस्तेषांमप्यंचनमस्कार्यत्वमाह चशब्दः समुच्चयार्थः सतेषांनारायणांशत्वेनमानोतत्वप्रयोजनं सरस्वतींचनमस्कृत्यैवततोव्यासः तथैवसर्वलोकानुग्रहार्थमाह श्लो

नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींचैवततोजयमुदीरयेत् १ द्वैपायनोष्ठपुटनिःसृतमप्रमेयंपुण्यंपवित्रमथपापहरंशिवंच योभारतंसमधिगच्छतिवाच्यमानंकिंतस्यपुष्करजलैरभिषेचनेन २ जयतिपराशरसूनुःसत्यवतीहृदयनंदनोव्यासः यस्यास्यकमलगलितंवाङ्मयममृतंजगत्पिबति ३ योगोशतंकनकशृंगमयंददाति विप्रायवेदविदुषेचबहुश्रुताय पुण्यांचभारतकथांशृणुयाच्चनित्यंतुल्यंफलंभवतितस्यचतस्यचैव ४ ॥:॥:

तू हु

जयत्यविद्यामनेनेति जयसंज्ञमविद्याध्वांतनाशकंग्रंथमुदीरयेत्पठेदित्यर्थः १ द्वैपायनोष्ठेत्यादयोमंत्राख्याः षट्श्लोकाविभूतिकथनार्थमत्रपठ्यंते अप्रमेयं अद्भुतं पुण्यंधर्महेतुकंपवित्रंदृष्टारिष्टनाशकं पापहरंदुर्वासनाहरंशिवंसुखप्रदंपुष्करमादितीर्थंततोपिपावनमित्यर्थः ४ ॥:०:॥:०:॥=॥=॥४४॥:=॥:॥=॥:

भा॰
२

शताश्वमेधसंत्रस्य चतुःसहस्रस्य चत्वारि महत्त्यागीमतं परिवेषणानि च त्रयान्महानामानि पात्रेम्भिकृतो तस्य सहस्रस्त्रपरिवेषणामि
ति स्मृतिः शतक्रतोश्चर्द्दपदमापकं फलमेतस्य दानात्तत्प्रयतःपातं तत्त्वपरिशोधनात् दैहशोधनेहास्तेरथे नहास्तियुक्तरूपदानेन
६ अयोतत्र्याक्रमेते ७ आद्यपुरुषमिमादिव्यासवाक्यमवत्तारयिष्यन्नेऽसृते व्यासं समकरोति पितामहाद्यमिति अहतद्वैपायनं व्या
सं वेदत्रयासे विदेहत्रमेकवचनेविदेहपास्तसर्थतं ब्रह्मवेदमासीद् तस्याविशेषाणां महानिधानमिति निधीयतेस्याधायते स्मिन्सर्वमर्थजा
तमितिनिधानं वेदद्वैपायनो वा महतां निधानं यस्मिन्निति वेदस्येश्वरस्याधिष्ठानमित्यर्थः तेनैकयस्मात् षष्ठपितामहस्य ब्रह्मणः आद्यपिता

शताश्वमेधस्य पदत्रपुण्यं चतुःसहस्रस्य शतक्रतोश्च भवेदनंतं हरिवंशदानात्स कीर्तितं व्यासमहर्षिणा च ५ यद्वाजपेये
नतुराजसूयात् दृष्टं फलं हस्तिरथेन वा स्यात् तल्लभ्यते व्यासवचःप्रमाणं गीतं च वाल्मीकिमहर्षिणा च ६ यो हरिवंशं तेष
पतिय याविधिना महात्मा पापः सपदि स्रजपतिहरिपदकमलकमलं मधुपोऽसेनमलुब्धः ७ पितामहाद्यं प्रवदंति षष्ठम
हर्षिमव्ययविभूतियुक्तं नारायणांशं अमेकपुत्रं द्वैपायनं वेदमहानिधानं ८ ॥०॥०॥॥॥

महाद्येनारायणांशं वदंति एवं हि पितृपितामहादिक्रमेण व्यासपराशरशक्तिवसिष्ठब्रह्माणः पंचमः षष्ठो विष्णुरिति भवति परे तु पंचपि
तामहात्षष्ठं वदंतीति संपोऽस्य वसिष्ठब्रह्मणोर्मध्ये मनुमित्रावरुणौ वा कल्पपितामहसंग्रहात् ब्रह्माणः षष्ठमाहुः परे पितामहपदेनैव
विष्णुं गृह्णंतीति महर्षिः ऋषिर्विप्रः काव्येनेति श्रुते महांतं कायस्य कर्त्तारं मंत्रद्रष्टारं वा अव्ययविभूतियुक्तं अनंतयोगै
श्वर्ययुक्तं ॥

नारायणाख्यं शाश्वतं अजं एकं प्रभुं श्रेष्ठो वा पुत्रो यस्य तं यद्वा आत्मानमहं मनुरभवं सूर्यश्चेति वामदेववत्प्रसंग
भिन्नब्रह्मानुसंदधानः स्वात्मानमेव नमस्करोति तथा हि मह्यमेव नमो नम इति अस्मिन्पक्षे द्वैपायनं व्यासं अहं महानि
धानं ब्रह्म वेद जानं इति स्वरूपानुवादेन ब्रह्मभावो विधीयते यद्वा द्वैपो गजस्तस्येदमसाधारणं शुंडादंडादिलक्षणं तदेव अयनं ज्ञाप
कं यस्य तं द्वैपायनं गजाननं यद्वा द्वीपी व्याघ्रः तस्येदं चर्म द्वैपं तदेवायनं यस्येति द्वीपिचर्मपरिधानात् शुक्लभासाति भैरवेति स्मृतः सुक्तः
शक्तो विग्रहो द्वैपायनस्तं यद्वा द्वीपेषु समस्तसुस्वपनं विन्दं प्रकाशकं स्वरूपं यस्य तं तु पातालादिष्विति द्वीपायनः स्वार्थे तद्धितः द्वै
पायनः सर्पः यद्वा द्वैपं गजचर्म अयनं ज्ञापकं यस्य तं द्वैपायनं गजचर्मधरं महेश्वरं यद्वाम्भसोद्भूतत्वात् द्वीपं अयनं स्थानं यस्य स्वार्थे
तद्धितः द्वैपायनः अन्तर्द्वीपपतिर्विष्णुः तं वेदव्यासे अन्तर्गतं सर्वेषामपि व्यापकत्वात् पितामहात् षष्ठत्वं घटते तथा हि सदसद्रूपाव्या
न्मायाशबलात् ब्रह्मणोऽव्यक्तं अव्यक्तान्महत् महतोऽहंकारः अहंकारात् पंचतन्मात्राणि पंचतन्मात्राभ्यः पंचमहाभूता
नि तेभ्यश्चतुर्मुखशरीराभिमानी हिरण्यगर्भस्तस्यागमसिद्धस्यालोचनापोत्थोऽहंकर्मणस्तेषां पितामहात् षष्ठत्वं घटते महर्षिमिति सर्वे
शत्वप्रभुं नारायणः परब्रह्म तस्य अंशरूपो मायायां चित्यतिष्ठति शिवः तेन निर्विकल्पत्वात् द्वैतमायाशबले नारायणाख्योऽशाश्वतं एको हिर
ण्यगर्भाख्यः पुत्रो यस्य तं यो ब्रह्माणं विदधाति पूर्वं यो वै मिति श्रुतेः महानिधानं सर्वकारणं महत्सारं मंगलमयस्मात्तं ८ ॥:॥:

श्रीरामः ॥ ० ॥ श्रीरामः ॥ ० ॥ श्रीरामः ॥ ० ॥

ग्रंथप्रवृत्तिबीजभूतं शौनकप्रश्नं मंगलाचरणपूर्वकमवतारयति आद्यं पुरुषमिति हीति नमस्कारः शौनकः सौतिं पप्रच्छेति संगतिः तत्र चतुर्थे गतयोः
कार्योपवृत्तयः अप्रभूतीनां क्रान्तरफलोपमाः पंचब्रह्मपुरुषाः क्रमशः शुद्धचैतन्यं १ मायाशबलः २ सूत्रात्मा ३ विराट ४ विसु ५ इतिसंज्ञालमंत
तत्र भूस्थानीयं शुद्धचैतन्यं आद्यपुरुषमित्यनुसंधत्ते ईशानमिति द्वितीयमथ्याशबलं बीजस्थानीयं मायिनं तु महेश्वरमिति श्रुतेः पुरुहूतं पुरुष्टुतमिति स
कुरोपमतृतीयसूत्रात्मानं स हि पुरुभिर्बहुभिर्यजमानैर्यते हूयते तत्स्वपत्रेव बहुभिरिष्टं चेत्यपि द्रष्टव्यं पत्राद्युपाल्कः यदेनमृग्भिः शंसंति यजुर्भिर्यजंति

आद्यं पुरुषमीशानं पुरुहूतं पुरुष्टुतं ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सना
तनं १ ॥ श्रीरामः ॥ श्रीरामः ॥ श्रीरामः ॥ श्रीरामः ॥ श्रीरामः

सामभिः स्तुवंतीति तथा श्रुतावपि सूत्रात्मानं प्रकृत्य तदुदिदृश्माहुः अमुपजामुपजेमेतस्यैव सा विसृष्टिरिति तस्यैव सर्वे पृष्टव्य देवतात्मत्व मात्र
पतेकिमेतत्पुरुषचतुष्टयं पृष्टवान् इदं उत प्रश्न अस्मिन्नेव च श्लोकार्थे नरो गुरुर्दार्व वेत्तो कस्मिन्नो इत्याशंक्याह ऋतमेकाक्षरं ब्रह्मेति ऋतं सत्यमबाधि
तं एकं मायासंपर्करहितं सातत्यात् अक्षरं सूत्रात्मवन्न क्षरति अकार्यत्वात् अत एव ब्रह्म त्रिविधपरिच्छेदशून्यं यदेव रूपं वक्तं तदेव व्यक्ताव्यक्तं स
र्वरूपानुरूपे क्रियव्यक्ताव्यक्तं तत्परिणामाभिमानेत्याह सनातनं सर्वदैकरूपं कूटस्थं स्थावरजंगमाणि विश्वानि व्यक्ताव्यक्ते तत्रोत्पद्यते इत्यर्थः १ ॥

चतुर्थेन तद्रूपं विराट्पुरुषमाह असदिति यत्सदसत्परं कार्यकारणाभ्यां तत्त्वेशाभ्यामनन्यत्स्यादेवं तु वृत्तेन देवानिशं विराडेव त्वं एनमेव विशिनष्टि असदिति मतो विलक्षणोऽनिर्वचनीयं यस्मात्सदसद्भ्यां सत्त्वेन दृश्यमानत्वात् असत्त्वे नेह नानास्ति किंचनेति श्रुत्या ब्रह्मज्ञानोत्तरं तद्बाधस्य दर्शितत्वात् तस्मादिदमसदनिर्वचनीयमेव नहि परस्परविरुद्धाभ्यां सत्त्वासत्त्वाभ्यामाकारेण किंचिद्वस्त्वस्ति एवं तत्त्वेशानयोरप्यनिर्वचनीयत्वं बोध्यं बिम्बहेतुत्वात् कार्यकारणयोः समसत्ताकत्वनियमात् आद्यपुरुषस्तु नानिर्वचनीयः तत्र कारणत्वस्योपचारिकत्वात् यथोक्तं आसीदैतेन्द्रजालस्य पटुपादानकारणं अज्ञानं तदुपाश्रित्य ब्रह्म कारणमुच्यते इति फलोपसंपत्त्वमपि वक्तुमाह पारायणामिष्टामिति यो

असत्त्वमसदेतच्चैव यद्धि स्वं सदसत्परं प
रायणानामिष्टां पुराणानामयम् २

स्वत्रात्मानः असंबैर्हिताः तेषां त्वष्टारं परिणतानेकबीजं मोहत्वस्यादपि फलादनेके वटांकुरान्तरबाह्यं संभवति एवं कार्योपाधिपारखिन्नादपि चतुर्भुजादेः पारेपरार्द्धसत्त्वादयः संभवंतीति युक्तं तस्य पारावारागारिष्टत्वं पुराणपुराणपिनवं फलं वदयन्नुत्रोन भवतीत्यर्थः अत एव परं आतोनत्र आवायंम्म प्रत्यक्षं एतेन विष्णुरादिवद्गुणावतारैर्नित्यत्वमुक्तं तथा चास्मिन् तः देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा उत्पन्नेति तदा लोके सा नित्याप्यभिधीयत इति २ ॥

मंगलंआनंदावहं मंगलंआनंदरूपं विस्नुंव्यापनशीलं घोरापमृत्युनिवारणीयं अनघंआगंतुकदोषशून्यं शुचिंशुद्धभावयुक्तं हृषीकेशंइंद्रियाणांप्रवर्तकं चराचरस्यगुरुंहितोपदेष्टारं हरिंसर्वपापहरं २ नैमिषारण्यइत्यत्राधिकमार्ष कुलपतिःएकादशसहस्राणियोन्नदानादिनाभरेत् सवैकुलपतिनामवेदवेदांगपारगइत्युक्तलक्षणः योगजसिद्धिमानित्यर्थः सिद्धौहेतुः महामुनिः ध्याननिष्ठः अत्रापिहेतुर्धर्मात्मेति तत्रहेतुःसर्व

मंगलंमंगलंविस्नुंघोरापमनघंशुचिं नमस्कृत्यहृषीकेशंचराचरगुरुंहरिं २ नैमिषारण्येकुलपतिःशौनकश्च रोप
महामुनिः सौतिंपप्रच्छधर्मात्मासर्वशास्त्रविशारदः ४ शौनकउवाच सौतेसुमहदाख्यानंभवतापरिकीर्तितं
भारतानांचसर्वेषांपार्थिवानांतथैवच ५ देवानांदानवानांचगंधर्वोरगरक्षसां दैत्यानामथसिद्धानांगुह्यकानां
तथैवच ६

शास्त्रविशारदइति एतेनसर्वशास्त्रविदांअनुष्ठितकर्तॄणांस्वामिनांसामयोगैश्वर्याणांकृतकृत्यानामप्येतच्छ्रोतुंयोग्यमित्यर्थः यथोक्तं आत्मारामाश्चमुनयोनिर्ग्रंथाअप्युरुक्रमे कुर्वंत्यहैतुकींभक्तिमित्थंभूतगुणोहरिरिति सौति सतः अग्निकुंडसमुद्भूतसूतनिर्मलमानसेति पौराणिकप्रसिद्धेरग्निजोलोमहर्षणात्तस्यपुत्रउग्रश्रवस नतुब्राह्मण्यांक्षत्रियात्सूतइतिस्मृत्युक्तंतद्भिन्नार्थकापत्तेः ४६ ॥८॥

श्रीः श्रीः श्रीः श्रीः॥

आगमगर्भवासादिक्लेशरहितं द्रोणादीनां जन्म अनुत्तमं रेतःसंसर्गं विना केवलंस्र्मेलामप्योत आर्येप्रभृतिभ्यो धृष्टद्युम्नादीनां अत्यद्भुतानि आ
सजन्मादौ दैवैर्बाधकाराहस्योदीनि ७ भवता कथितं पुराणं मम मनः प्रीणातीति संबंधः ८ न तु पुराणे ९ जनमेजयः इस्तहानाधिकमाहे यत्तपथा
नततया १० इति ह एव किल न्यासमर्वेदत्तं ससतगुरोः एकाशान्तपूर्वैः पूर्वैः आचार्यैः अधिगतवानिति पञ्चकल्पदेपइतिहासः आसेति आसप्यति

अत्यद्भुतानि कर्माणि विक्रमा धर्मनिश्चयाः विविधाश्च कथायोगा जन्म चाग्र्यमनुत्तमं ७ कथितं भवता पुण्यं पुराणं श्लक्ष्ण
या गिरा मनःकर्णसुखं सौते प्रीणात्यमृतसंमितं ८ तत्र जन्म कुरूणां वै त्वयोक्तं लोमहर्षणे न तु वृष्ण्यन्धकानां वै तद्भवान्वक्तुमर्ह
ति ९ सौतिरुवाच जनमेजयेन यत्पृष्टः शिष्यो व्यासस्य धर्मवित् तदहं संप्रवक्ष्यामि वृष्णीनां वंशमादितः १० श्रुत्वेतिहासं का
र्त्स्न्येन भरतानां स भारतः जनमेजयो महाप्राज्ञो वैशंपायनमब्रवीत ११ जनमेजय उवाच महाभारतमाख्यानं बह्वर्थं श्रुतिवि
स्तरं कथितं भवता पूर्वं विस्तरेण मया श्रुतं १२ तत्र शूराः समाख्याता बहवः पुरुषर्षभाः नामभिः कर्मभिश्चैव वृष्ण्यन्धकमहार
थाः १३ तेषां कर्मावदातानि त्वयोक्तानि द्विजोत्तम तत्र तत्र समासेन विस्तरेणैव मे प्रभो १४ ॥ :॥:

दीस्मादानेषिन्यस्यालिंटिह्यं सुधंगांतिउातसमासः पारंपर्योपेता कथेत्यर्थः त्वां श्रुत्वा ११ श्रुतिविस्तरं वेदोपबृंहकं १२ शूराः प्रद्युम्नादयः
१३ कर्मावदातानि कर्मोत्तमानि उत्तमानि कर्माणीति यावत् विशेषणं विशेष्येण बहुलमिति बाहुल्यात्समासः तत्र तत्र प्रसंगे विस्तरेणैव
विस्तरेण च १४ ॥:॥ श्रीः ॥

पुरातने पुराणे राशिः कुटुंबः कुटुंबसमुदाय इति वा १४ वंशकुशलो वंशाख्याने निपुणः तेषां हरीणां कुलं वंशं १६ प्रजापतेः प्रजाशक्तिमत्स्य १७ तादृक्षां कथां वंशाख्यानिकां १८ दिव्यां चालौकिकीं पुण्यां सुखदां चित्रां आश्चर्यकरीं १९ धारयेत् हृदि पुस्तके वा गृहे स्थापयेत २० एवं महीकृता कथा यस्तेनेति च्यवनकामिसादिना यत्नात इदं प्रस्तय गोचरादहं प्रस्तगोचरानामत अतएव कारणाद्द्रष्टृदृश्यपो

न च मे तृप्तिरस्तीह कथ्यमाने पुरातने एकश्चैव मतो राशिर्वृष्णयः पांडवास्तथा १५ भवांश्च वंशकुशलस्तेषां प्रत्यक्षदर्शिवा
न कथयस्व कुलं तेषां विस्तरेण तपोधन १६ यस्य यस्यान्वये ये ये तांस्तानिच्छामि वेदितुं तत्त्वं सर्वमशेषेण कथयस्व महामुने
तेषां पूर्वविसृष्टिं च विचित्रां च प्रजापतेः १७ सौतिरुवाच सत्कृत्य प्रतिपृष्टस्तु स महात्मा महातपाः विस्तरेणानुपूर्व्या च
कथयामास तां कथां १८ वैशंपायन उवाच शृणु राजन् कथां दिव्यां पुण्यां पापप्रमोचनीं कथ्यमानां मया चित्रां बह्वर्थां
श्रुतिसम्मितां १९ यश्चैमां धारयेत्तात शृणुयाद्वाप्यभीक्ष्णशः स्ववंशधारणं कृत्वा स्वर्गलोके महीयते २० अव्यक्तं का
रणं यत्तन्नित्यं सदसदात्मकं प्रधानं पुरुषं तस्मान्निर्ममे विश्वमीश्वरः २१ ॥:॥:॥:॥:

बीजं यत्तदिति शास्त्रप्रसिद्धं नित्यमाद्यंतशून्यं सदसदात्मकं सत्यानृतात्मकं मायाशबलं ब्रह्मेत्यर्थः तदेवाह प्रधानं पुरुषमिति तदुभयात्मकमित्यर्थः तस्मात्कारणात् विश्वं स्थूलसूक्ष्मं जगत् निर्ममे कर्मकर्तरि प्रयोगः जातमित्यर्थः अतएव तद्विश्वं ईश्वरे ईश्वराभिन्ने ईश्वरमित्यनुवादाय्येत्याङ्जीवत्वं २१

ह॰१॰

तंवैतमेवपुरुषंस्वयत्नाख्यंतेजोब्रह्माणांमहत्तत्त्वाभिमानिनंविद्धि कारणानन्यत्वात्कार्यस्य नारायणपरायणंईश्वराधीनं २१
महतःसकाशातअहंकारःजातइतिविशेषणाभ्यामयोज्यं तस्मात् अहंकारातभूतानिआकाशादीनिसूक्ष्माणिजज्ञिरे तेभ्यः
सूक्ष्मेभ्योभूतभेदाःस्थूलभूतानिच तद्विधानिजरायुजादीनिचजज्ञिरे इतिएवंरूपःसर्गःसनातनःप्रवाहरूपेणउक्तइतिशेषः

तंवैविद्धिमहाराजब्रह्माणममितौजसं स्रष्टारंसर्वभूतानांनारायणपरायणं २१ अहंकारस्तुमहत
स्तस्माद्भूतानिजज्ञिरे भूतभेदाश्चभूतेभ्यइतिसर्गःसनातनः २३ विस्तरावयवंचैवयथाप्रश्नंयथाश्रु
तं कीर्त्यमानंशृणुमयापूर्वेषांकीर्तिवर्द्धनं २४ धन्यंयशस्यंशत्रुघ्नंस्वर्ग्यमायुःप्रवर्द्धनं कीर्तनंस्थिर
कीर्तीनांसर्वेषांपुण्यकर्मणां २५ तस्मात्कृत्स्नापतेकृत्स्नःसमग्रंशृणुपेशुनिः आवक्ष्मिवंशा
न्हस्तामिभूतसर्गमनुत्तमं २६ ॥ॐ॥४॥ः–॥ः॥ः॥ ॐः॥ः

२३ विस्तरावयवविस्तारयुक्ताःअवयवाःनानावंशशाखाप्रशाखारूपाःयस्यतंसर्गं यथाप्रश्नंयथाश्रुतिंवृद्धसंप्रदायंवानाति
क्रम्येत्यर्थः २४ २५ यस्मात्पुण्यकर्मणांकीर्तनंधन्यत्वादिगुणंतस्मात्कल्पापश्चात्तुगृहाणत्वंसमग्रयोपनेतुभ्यंआवक्ष्मिवंशा
न्हेविविशन्आमिमाघ्यभूतसर्गंचतुर्विधभूतयामसहितंवक्ष्यामि कृत्स्नामवर्ण्यइसमस्तनृपकर्मइति २६ ॥ ः

राम॰

ततइतिसूक्ष्मभूतसृष्ट्यनंतरं विविधाः भौतिकीः प्रजाः सिसृक्षुरीश्वरः अपः अंबुपदवाच्यं तं स्थूलभूतपंचकं नारायणाख्योपादानभूतं आदौ ससर्ज तेष्वप्सु बीजं अंडोत्पादनसामर्थ्यं अवासृजतीति हिरण्मयं स्वयमेव तत्र प्रविष्टः इत्यर्थः १७ एतदेव नारायणनाम निर्वचनेन स्फुटयति आपो नारा इति नाराः इत्यपां संज्ञा आख्यानेन नरसूनव इति एतेन तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेरर्थः संगृहीतः अयनं प्रवेशस्थानं नयतीति नरः ईश्वरः १८ ततः बीजरूपं अंडं अभवत् हिरण्यवर्णमित्यस्य काश्यरूपं अयमर्थः उक्तक्रमेण अव्यक्तात् ब्रह्मात्मा महान् महतोऽहंकारस्ततः सूक्ष्मभूतानि तेभ्यः पुष्पस्थानीयान्यपंचीकृतानि स्थूलभूतानि तेषु रेतःस्थानीयश्चित्साभासविंदुः तयोः संघातोऽडं तच्चोदकेश

ततः स्वयंभूर्भगवान्सिसृक्षुर्विविधाः प्रजाः अप एव ससर्जादौ तासु वीर्यमवासृजत् १७ आपो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः १८ हिरण्यवर्णमभवत्तदंडमुदकेशयं तत्र जज्ञे स्वयं ब्रह्मा स्वयंभूरिति नः श्रुतं १९ हिरण्यगर्भो भगवानुषित्वा परिवत्सरं तदंडमकरोद्द्वैधं दिवं भुवमथापि च २० तयोः शकलयोर्मध्ये आकाशमसृजत्प्रभुः अप्सु पारिप्लवां पृथ्वीं दिशश्च दशधा दधे २१ ॥ः॥ः॥

यं स्त्रीरूपेषु तत्समभूतेषु वा स्थितं तत्र गर्भे जीववत् ब्रह्मा चतुर्मुखोऽजज्ञेऽभ्याविर्भूत इति १९ हिरण्येति अंडे वर्षमात्रं स्थित्वा हिरण्यगर्भः अंडं द्वैधं द्विधाऽकरोत् ताभ्यां च शकलाभ्यां दिवं भुवं चाकल्पयदित्यर्थः २० तयोर्द्वयोः शकलयोर्मध्ये तदन्तराले आकाशमित्यर्थः दिशःस्वीति चकारात् दिगुपाधिभिः सर्वकल्पिता दश धात्रा प्राच्यादिभेदेन दधे धृतवान् अंडांतराल एवेयं दिगादिकल्पना न ततो बहिः स्थितिभावः २१ ॥ःः॥ःः॥ः

त्स्रष्टेहंत्वन्नाहतवेति तत्रब्रह्मणःघोरतिंविषयेषुप्रीतिंसृष्टिंपिपुरुषिंतद्रूपांस्त्रयंसमानरूपां एतेनपिंब्रह्मणोऽयोहसप्तिप्रकारःसृष्टस्य
इत्युक्तमभवीत ३२ अत्र्यंगिरसं अत्रिसहितमंगिरस मानसान मनसासंकल्पमात्रेणजातान् ३३ सप्तमरीच्यादयः ब्रह्माणः आत्म
णजात्वाभिमानिनः गृहाश्रमपरायणाः नारायणात्मकानांनारायणैकमननशीलानांसप्तानांसनकसनंदनसनातनसनत्कुमारस्कंदनारदे
रुद्राणांब्रह्मणःसकाशाज्जन्मयेषांतेषांतेषांब्रह्मजन्मनांब्रह्मचारीणांनारदेणशेषाणांत्तननारतेत्सपुराणेवेदमार्गेणैवनिष्ठायंगताः

तेऽकालंमनोवाचंकामंक्रोधंचथारतिं ससर्जसृष्टिंतद्रूपांस्रष्टुमिच्छन्प्रजापतीन् ३१ मरीचिमत्र्यंगिरसंपुलस्त्यंपुल
हंक्रतुं वसिष्ठंचमहातेजाःसोऽसृजत्सप्तमानसान् ३२ सप्तब्रह्माणइत्येतेपुराणेनिश्चयंगताः नारायणात्मकानां
वैसप्तानांब्रह्मजन्मनां ३४ ततोऽसृजत्पुनर्ब्रह्मारुद्रंरोषात्मसंभवं सनत्कुमारंचविभुंपूर्वेषामपिपूर्वजं ३५ सप्त
तेजनयंतिस्मप्रजारुद्रश्चभारत स्कंदःसनत्कुमारश्चतेजःसंक्षिप्यतिष्ठतः ३६ तेषांसप्तमहावंशादिव्यादेवगणान्वि
ताः क्रियावंतःप्रजावंतोमहर्षिभिरलंकृताः ३७ ॥:॥

कर्मैकश्रेयइतिनिश्चिताः ३४ सनत्कुमारंचासनकादीन् पू
र्वेषांमरीच्यादीनां ३५ सनत्कुमारश्चेतिवासनकसनंदनसनातननारदाः स्कंदश्चेतिषट्तेजःसृष्टिसामर्थ्यंसंक्षिप्यनिवृत्त्यसृष्टिमकुं
र्वतावर्तिष्ठतः ३६ तेषांत्वष्टानांमध्येसप्त यक्षःपिशाचादिसहिताः रुद्रादन्येदिव्यास्त्वादित्यादयः महर्षिभिःकश्यपाद्यैः ३७

श्रीः॥ श्रीः॥ श्रीः ॥

क्रियाकामयेहोतानि हविर्मन्त्रदेवतादीनि तेषां सृष्टिमाह द्वाभ्यां विद्युत इति अत्र प्रजापतेर्लोकदेवदिवानां रेतो वर्षं वर्षं सरेतञ्जोष
धय इति प्रोक्तं क्रमेण वयांसि विवेच्यत्वसामान्याद्देवता उच्यते पर्जन्यं चेत्योषधीनामप्युपलक्षणं यज्ञसिद्धय इति अत्राप्यपकर्षते
अशनिर्वज्रं रोहितं न्यञ्ज्ञम्रवक्रमिन्द्रधनुः विद्युदाद्यभिमानिनो देवता एव विद्युदादिशब्दैरुच्यन्ते ३८ निर्मितः सिद्धानामेव ऋगादीनामा
विष्करणं वेदस्य निर्मितत्वात् यज्ञस्य सृष्टिमाह मुखादिति ३९ यज्ञस्य सृष्टिमाह यजनादिति प्रजनात् उपस्थेन्द्रियात् असुरान् जघनात् न

विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषि च वयांसि च ससर्जादौ पर्जन्यं च ससर्ज ह ३८ ऋचो यजूंषि सामानि निर्ममे यज्ञसिद्धये
मुखाद्देवानजनयत्पितॄंश्चोरसः पिवत्तमः ३९ प्रजनाच्च मनुष्यान्वै जघनान्निर्ममेऽसुरान् साध्यानजनयद्देवानित्येवमनुशुश्रु-
म ४० उच्चावचानि भूतानि गात्रेभ्यस्तस्य जज्ञिरे आपवस्य प्रजासर्गं सृजतो हि प्रजापतेः ४१ सृज्यमानाः प्रजा नैव
विवर्द्धन्ते यदा तदा द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत् ४२ अर्द्धेन नारी तस्यां स ससृजे विविधाः प्रजाः दिवं च पृ-
थिवीं चैव महिम्ना व्याप्य तिष्ठतः ४३ ॥:॥:

पश्चाद्भागात् असुरानिति छेदः साध्यान् प्राचीनान् देवान् ४० उच्चेति त
स्य आपवशिष्टापरनाम्नः प्रजापतेः ४१ सृज्यमाना मनसैवेति शेषः व्याप्यतिष्ठतामापवस्य यदा प्रजा नैवाविवर्द्धन्त इति द्वयोः संबंधः
४२ सः आपवस्य देहार्द्धं नारीयद्रूपं गौर्वडवादिका गृहीतवती तत्तज्जातीयं वृषाश्वादिरूपं पुरुषोऽपि गृहीतवाननेन मैथुन्यः प्रजाः
प्रजाः विविधाः ससर्जेत्यर्थः नारीश गरूपानाम ४३

विष्णुर्हिरण्यगर्भद्वाराविराजंत्वापवाख्यंअसृजत ४४ मन्वन्तरपदंव्याचष्टेस्पष्टेन द्वितीयमिति नारायणस्यविसर्गोहिरण्यगर्भे
द्वाराव्यवहितःसर्गःसत्वापवः अतोस्यविष्णुपौत्रत्वात्अयोनिजाःप्रजाःप्रथमःसर्गः सएवमनुद्वारायोनिजप्रजा सर्गोद्वितीयस
र्गः अतएतदापवस्यमनोः स्वायंभुवद्वितीयंअंतरंअवधानंयस्मात्सर्गभेदस्तस्मात्तत्रमन्वन्तरशब्दःप्रयुज्यतइत्यर्थः ४५ एतज्ज्ञान
फलमाह आपुष्मानिति ४६ इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोर्नीलकंठस्यकृतौ

विराजमसृजद्विष्णुःसोऽसृजत्पुरुषंविराट् पुरुषंतंमनुंविद्धितद्वैमन्वंतरंस्मृतं ४४ द्वितीयंआपवस्यैतन्मनोरंतरमु
च्यते सवैराजःप्रजासर्गंससर्जपुरुषःप्रभुः नारायणविसर्गःसप्रजास्तस्याप्ययोनिजाः ४५ आयुष्मान्कीर्तिमा
नधन्यःप्रजावानश्रुतवांस्तथा आदिसर्गंविदित्वेमंयथेष्टांप्राप्नुयाद्गतिं ४६ इतिखिलेषुहरिवंशेप्रथमोध्यायः
१ वैशंपायनउवाच सप्तसृष्टासुप्रजास्विहआपवोवैप्रजापतिः लेभेवैपुरुषः पत्नींशतरूपामयोनिजां १ आपवस्य
महिम्नातुदिवमावृत्यतिष्ठतः धर्मेणैवमहाराजशतरूपाव्यजायत २ अः॥॰॥॰॥

भारतभावदीपेहरिवंशार्थप्रकाशेप्रथमोध्यायः एवमयोनिजांसृष्टिमुक्त्वायोनिजामपितामाहसप्तेति प्रजासुअयोनिजासुइह
सृष्टासुसतीषुआपवएवद्विधाकृत्वात्मनोदेहमर्द्धेनपुरुषोभवत्अर्द्धेननारीतिसवितरीसापुरुषोलब्धवान्पत्नींलेभे १ महिम्नामहत्त्वे
नधर्मेणयोगजपुण्येनसापत्नीशतरूपाअनंतरूपाव्यजायत्विविधरूपाःभवत् यद्वाशतरूपामाया अनेकरूपधारिणीसामर्त्यंनरा
पयैवतत्त्वेनस्वात्मन्येपाइतिभावः २

प्रत्यपद्यत सत्ता प्राप्तेति शेषः ३ स्वायंभुवो वैराजः एकसप्ततियुगं किंचिदधिकामेकसप्ततिं चतुर्युगानित्यर्थः ४ वसिष्ठतनयायां तु का यां
म्यायां पुत्रनिष्पत्ते वीरो वैराजनामा स प्रियव्रतमुदारधीरिति वायुपुराणोक्तः प्रियव्रतमाता काम्याऽन्येत्यर्थः ५ प्रियव्रतस्य भार्या कर्दमपु

सा तु वर्षायुतं तप्त्वा तपः परमदुश्चरं भर्तारं दीप्ततपसं पुरुषं प्रत्यपद्यत ३ स वै स्वायंभुवस्तात पुरुषो मनुरुच्यते तस्यैक
सप्ततियुगं मन्वंतरमिहोच्यते ४ वैराजात्पुरुषाद्वीरं शतरूपा व्यजायत प्रियव्रतोत्तानपादौ वीरात्काम्या व्यजायत ५
काम्या नाम महाबाहो कर्दमस्य प्रजापतेः काम्यापुत्रास्तु चत्वारः सम्राट्कुक्षिर्विराट्प्रभुः प्रियव्रतं समासाद्य पतिं
सा सुषुवे सुतान् ६ उत्तानपादं जग्राह पुत्रमत्रिः प्रजापतिः उत्तानपादाच्चतुरः सूनृता सुषुवे सुतान् ७ धर्मस्य कन्या
सुश्रोणी सूनृता नाम विश्रुता उत्पन्ना वाजिमेधेन ध्रुवस्य जननी शुभा ८ ध्रुवं च कीर्तिमंतं च शिवं शांतमयस्पतिं उ
त्तानपादोऽजनयत्सूनृतायां प्रजापतिः ९ ध्रुवो वर्षसहस्राणि त्रीणि दिव्यानि भारत तपस्तेपे महाराज प्रार्थ
यन्सुमहद्यशः १० तस्मै ब्रह्मा ददौ प्रीतः स्थानमप्रतिमं भुवि अचलं चैव पुरतः सप्तर्षीणां प्रजापतिः ११

वीकाम्याऽन्येत्याह काम्या नामेति तायात्सुतान्सुषुवे तानेवाह काम्यापुत्रा इति ६ । ७ चतुरः सुतानाह ध्रुवमिति शांतमिति विशे
षणं आयुष्मंतं वसुं तथा त्रिपादैनं ९ महद्यशः तस्य नाम महद्यश इति श्रुतेः परं ब्रह्म विष्ण्वाख्यं १० ब्रह्मापि विष्णुरेव भुवि प्रीत इति
सर्वेषां प्रजापतिः प्रजानां ब्रह्मादीनां पतिः ११ ॥

ह॰रि॰
९व

अतिमात्रांअनंतां महिमानं माहात्म्यंउशनाशुक्रः तस्यदेवाचार्यत्वंकचद्वारा बृहस्पतिर्हिशुक्रोभवेदिंद्रस्याभयायासुरेभ्यः तथापि
मामविद्यामसृजदिति मैत्रायणीये बृहस्पतेरेवशुक्रत्वाम्नानोद्य १२ १३ आधत्तवेशक्तेनस्थापितवती १४ सर्वतेजसंसर्वदेवतेजोमयं
यथोक्तंइंद्रात्मभुतेज्वनानापेक्षोधंयमोदूष्वगाच्चवितं आयुःकृतीवायुर्जनार्दनाम्मातापारानःशक्यतेशरीरमिति १५ वीरणस्यावीरण्या

तस्यातिमात्रामृद्धिंचमहिमानंनिरीक्ष्यच देवासुराणामाचार्यःश्लोकमप्युशनाजगौ १२ अहोऽस्यतपसोवीर्यमहो
श्रुतमहोद्भुतं यमद्यपुरतःकृत्वाध्रुवंसप्तर्षयःस्थिताः १३ तस्मात्श्लिष्टंचभव्यंचध्रुवाच्छंभुर्व्यजायत श्लिष्टेरा
धत्तसुच्छायापंचपुत्रानकल्मषान् १४ रिपुंरिपुंजयंपुष्पंवृकलंवृकतेजसं रिपोराधत्तबृहती चाक्षुषंसर्वतेजसं १५
अजीजनत्पुष्करिण्यांवीरण्यांचाक्षुषोमनुः प्रजापतेरात्मजायामरण्यस्यमहात्मनः १६ मनोरजायंतदशनड्वला
यांमहौजसः कन्यायामभवन्श्रेष्ठवैराजस्यप्रजापतेः १७ ऊरुःपूरुःशतद्युम्नस्तपस्वीसत्यवाक्कविः अग्निष्टुदतिरात्र
श्चसुद्युम्नश्चेतितेनव १८ अभिमन्युश्चदशमोनड्वलायाःसुताःस्मृताः १८ ऊरोरजनयत्पुत्रान्षडाग्नेयीमहाप्र
भान् अंगंसुमनसंख्यातिंक्रतुमंगिरसंगयं १९ अंगात्सुनीथापत्यंवैवेनमेकमजायत अपचारात्तुवेनस्यप्रको
पःसुमहानभूत् २० प्रजार्थमृषयोयस्यममंथुर्दक्षिणंकरं वेनस्यपाणौमथितेबभूवमुनिभिःपृथुः ११

दुहितरि १६ महौजसः महौजसःसंततस्य अस्यैवविशेषणंवैराजस्येति १७ सत्यवागित्यपिपठंति १८ पाठांतरेमहौजसःकन्यायामितिशेषः
आग्नेयीअग्निकन्या अंगिरसंशिबिमित्यपिपठंति १९ सुनीथायांअंगभार्यांमृत्योःपुत्री अजायतअजनयत् अपचारात्देवतादिद्रोहात्
प्रकोपोमुनीनामितिशेषः २० प्रजार्थसंतानार्थंयस्यमुनिप्रकोपस्मृतस्य ११ ॥:०:॥ ०:॥०॥

५२

ग्राम
५

एवंपृथुःप्रजाःमुदिताःकरिष्यतीत्यन्वयः २२ इमांपृथ्वीं ररक्षत्रपूर्वजः क्षत्रजातौप्रथममुत्पन्नः २३ तस्मात्तंनिमित्तीकृत्य पृथोर्यज्ञेहिस्तुतःसू
तमागधावुत्पन्नावितिअन्यत्रस्मर्यतेततस्तत्रतस्मान्निमित्तत्वे निपुणौक्रमात्राज्ञांकीर्त्तौवंशयोश्चकुशलौ २४ गौः गोरूपिणीपृथ्वीसस्या

तंदृष्ट्वामुनयःप्राहुरेषवैमुदिताःप्रजाः करिष्यतिमहातेजायशश्चप्राप्स्यतेमहत् २२ सधन्वीकवचीजातस्तेजसानिर्दहन्निव पृथुर्वैन्यस्तदाचेमांररक्षत्क्षत्रपूर्वजः २३ राजसूयाभिषिक्तानामाद्यःसवसुधाधिपः तस्माच्चैवसमुत्पन्नौनिपुणौसूत
मागधौ २४ तेनेयंगौर्महाराजदुग्धासस्यानिभारत प्रजानांवृत्तिकामेनदेवैर्ऋषिगणैःसह २५ पितृभिर्दानवैश्चैव
गंधर्वैःसाप्सरोगणैः सर्पैःपुण्यजनैश्चैववीरुद्भिःपर्वतैस्तथा २६ तेषुतेषुचपात्रेषुदुह्यमानावसुंधरा प्रादाद्यथेप्सि
तंक्षीरंतेनप्राणानधारयन् २७ पृथुपुत्रौतुधर्मज्ञौजज्ञातेंतर्द्धिपालितौ शिखंडिनीहविर्धानमंतर्धानाद्व्यजायत २८
हविर्धानात्षडाग्नेयीधिषणाजनयत्सुतान् प्राचीनबर्हिषंशुक्रंगयंकृष्णंव्रजाजिनौ २९ प्राचीनबर्हिर्भगवान्महाना
सीत्प्रजापतिः हविर्धानान्महाराजयेनसंवर्द्धिताःप्रजाः ३० ॥ः॥ः॥ः॥ ः॥

नीतिसर्ववस्तूपलक्षणं २६ तेषुतेषुपुराणांतरप्रसिद्धेषुतैस्तैर्देवादिभिस्तंतंसजातीयंवत्संकल्पयित्वातत्तत्पात्रेऽभीष्टंवस्तु पृथ्वीसकाशात्
दुग्ध्वागृहीतमित्यर्थः २७ अंतर्द्धानात्अंतर्द्धिसंज्ञात् २८ आग्नेयीअग्निकन्याधिषणानाम्नी व्रजश्चअजिनश्चव्रजाजिनौ २९ हविर्धा
नात्तस्यपितुरपिमहान् ३० ॥ः॥ः॥

ह.री.
१०

अथप्राचीनवर्हिषंव्याचष्टे प्राचीनाग्राइति यतः पृथिव्यांतस्यप्राचीनाग्राःकुशाः पृथिवीतलचारिणः भुवः स्वरूपेप्रसारितकृत्स्नभूमंडल
व्यापिनः आसन्नतः सप्राचीनवर्हिरित्यर्थः तलत्वमुपाश्रयोरितिविश्वः ३१ सवर्णायांकृतदायांकृतदारोऽभवदित्यध्यात्तपसोंऽस्य ३२

यं

प्राचीनाग्राःकुशास्तस्यपृथिव्यांजनमेजय प्राचीनवर्हिर्भगवान्पृथिवीतलचारिणः ३१ समुद्रतनयांतुकृतदारोऽभ
वत्प्रभुः महतस्तपसः पारेसवर्णायांमहीपतिः ३२ सवर्णाधत्तसामुद्रीदशप्राचीनवर्हिषः सर्वेप्रचेतसोनामधनु
र्वेदस्यपारगाः ३३ अपृथग्धर्मचरणास्तेतप्यन्तमहत्तपः दशवर्षसहस्राणिसमुद्रसलिलेशयाः ३४ तपश्चरत्सु
पृथिवींप्रचेतस्सुमहीरुहाः अरक्ष्यमाणामावव्रुर्वभूवाथप्रजाक्षयः ३५ नाशकन्मारुतोवातुंवृतंखमभवद्द्रुमैः
दशवर्षसहस्राणिनशेकुश्चेष्टितुंप्रजाः ३६ तदुपश्रुत्यतपसायुक्ताः सर्वेप्रचेतसः मुखेभ्योवायुमग्निंचतेसृजञ्जा
तमन्यवः ३७ उन्मूलानथतान्कृत्वावृक्षान्वायुरशोषयत् तानग्निरदहद्घोरएवमासीद्द्रुमक्षयः ३८ द्रुमक्षयम
थोबुद्ध्वाकिंचिच्छिष्टेषुशाखिषु उपगम्याब्रवीदेतान्राजासोमः प्रजापतीन् ३९ कोपंयच्छतराजानः सर्वेप्राचीनवर्हि
षः वृक्षशून्याकृतापृथ्वीशाम्येतामग्निमारुतौ ४०

सर्वप्रचेतसः प्रचेतःसंज्ञाः सर्वेपिएकनामानइत्यर्थः ३३ अपृथग्धर्मचर
णाः समानधर्माणः समानशीलाश्च ३४ ३५ प्रजाक्षयहेतुमाहनाशकदिति ३६ तपसातानवृक्षानुपश्रुत्यज्ञात्वायुक्ताः सन्नद्धाः ३७
उन्मूलानउद्धृतमूलान् ३८ राजावृक्षाणामितिशेषः एतान्प्रचेतःसंज्ञान् ३९ प्राचीनवर्हिषइतितत्पुत्राःसंबोध्यन्ते तद्राजस्येति
वहुत्वेतद्धितस्यलुक् ४० ॥

रामः
१०.

स्नेति वृक्षान्शोषयतावायुनातेषांआप्यःसारांशः पय्याहुकारणोसोरेसेनस्निग्धोहमः एवंमार्षिवः सारांशश्चस्मयेसोमेप्रदिमस्यक
न्याहूपंवाहोरेतः सोमस्यगर्भइत्यमितियुक्तं वृक्षैर्वैःकृष्ण्यावेद्गमसमनुप्रविशतीतिश्रुतेरपि ओषधिसाररूपेणाह्वृष्ट्युद्भवेयोगमते तस्मा
घुक्तैवेयसोमोक्तिः वृक्षाणामियंकन्यागर्भेणाधृतेति ४१ वृक्षाणांकन्येति वृक्षरेतोजत्वात्तेषामपत्यं ४२ तेजसः तपसः ४३

एवम्तावृक्षकन्येयंवृक्षाणांवरवर्णिनी भविष्यंजानतातातधृतागर्भेणचैवसा ४१ मारिषानामकन्येयंवृक्षाणामितिनि
र्मिताभार्यावोस्तुमहाभागाः सोमवंशस्यवर्द्धिनी ४२ युष्माकंतेजसोर्द्धेनममचार्द्धेनतेजसः अस्यामुत्पत्स्यतेपुत्रोदक्षो
नामप्रजापतिः ४३ सइमांदग्धभूयिष्ठांयुष्मत्तेजोमयेनवै अग्निनाग्निसमोभूयः प्रजाः संवर्द्धयिष्यति ४४ ततःसोमस्य
वचनाज्जगृहुस्तेप्रचेतसः संहृत्यकोपंवृक्षेभ्यः पत्नीधर्म्मेणमारिषां ४५ मारिषायांततस्तेतुमनसागर्भमादधुः दशभ्य
स्तुप्रचेतो भ्योमारिषायांप्रजापतिः दक्षोजज्ञेमहातेजाः सोमस्यांशेनभारत ४६ पुत्रानुत्पादयामाससोमवंशविवर्द्ध
नान् अचरांश्चचरांश्चैवद्विपदोथचतुष्पदः सःसृष्ट्वामनसादक्षः पश्चादसृजत्स्त्रियः ४७ ददौसदशधर्मायकश्यपायत्र
योदश शिष्टाः सोमायात्तेयनक्षत्राख्याददौप्रभुः ४८ तासुदेवाः खगागावोनागादितिजदानवाः गंधर्वाप्सरस
श्चैवजज्ञिरेन्याश्चजातयः ४९ ः॥

तेजोमयेनतत्प्रयोजन्येनाग्निना ४४ धर्मेणविवाहविधिना ४५ अंशेनतत्तयोर्द्धेन ४६ अचरा
दीन् सृष्ट्वापदार्थान्मनसादृष्ट्वाआलोच्यतेषांरक्षार्थंप्रथमतःबीजग्राहिणीःस्त्रियोसृजत् ४७ ४८ अन्याःस्थावराद्याः ४९
॥श्रीः॥ श्रीः॥ श्रीः॥ः

ह॰री॰
२१

दृशानां कथं एकस्त्री आस २ सेतामाशंकां इहावलोकनन्यायेन परिहरति ततइति संकल्पस्यैकरूपत्वात्सर्वेषां मोरस एव भवितुं युक्त इति भावः ५०
५१ अंगुष्ठादिति एकस्माज्जातयोः स्त्रीपुंसयोः कथं दांपत्यसंबंध इ सेत्याशंका ५२ कथमिति ब्रह्मपुत्रस्य सतः कथं प्राचेतसत्वमित्यपरा ५३
सोमदौहित्रस्य दक्षस्य कथं सोमश्वशुरत्वमिति याशंका ५३ एताः क्रमेणा निरस्यति श्लोकत्रयेण उत्पत्तिश्चेति भूतेषु पश्वादिषु उत्पत्तिर्निरोधः नित्यं

ततः प्रभृति राजेंद्र प्रजा मैथुनसंभवाः संकल्पाद्दर्शनात्स्पर्शात्पूर्वेषां सृष्टिरुच्यते ५० जनमेजय उवाच देवानां दा
नवानां च गंधर्वोरगरक्षसां संभवः कथितः पूर्वं दक्षस्य च महात्मनः ५१ अंगुष्ठाद्ब्रह्मणो जातो दक्षः प्रोक्तस्त्वया
नघ वामांगुष्ठात्तथा चैव तस्य पत्नी व्यजायत ५२ कथं प्राचेतसत्वं स पुनर्लेभे महातपाः एतन्मे संशयं विप्र व्याख्या
तुमर्हसि ५३ दौहित्रश्चैव सोमस्य कथं श्वशुरतां गतः ५३ वैशंपायन उवाच उत्पत्तिश्च निरोधश्च नित्यौ भूतेषु पा
र्थिव ऋषयोऽत्र न मुह्यंति विद्वांसश्चैव ये जनाः ५४ ॥ः॥

स्वाभाविकी सापिंड्यनियमं विना प्रवृत्तोत्पादनं स्वाभाविकं तथा मनुष्येषु निरोधः नियमः असपिंडामुद्वहेदिति नियमः स्वाभाविकः पशु
ष्वेव मनुष्यापत्यमनर्जयः प्रजापतयो दौहित्रसंबंधापादिष्टा स्मृतिदर्शिनः विद्वांसश्च सापि यथा शास्त्रस्यातिक्रमं विद्वांसो यं तत्त्वं
ज्ञाना नानमुह्यंति विरुद्धानां कार्याणां कारणात्तपोबलात्सा प्रियं शास्त्रस्यापि धर्मस्य उल्लंघनेन दोषः इत्यर्थः ५४

राम॰
२१

कस्मै दास्यामि श्रेयो माहूतीयं निःसृत इति पुत्रैरिति आह्लो दक्षोऽस्मः प्राचेतसो न्यग्रति भावः ५५ तपोयां निरस्यांते ज्येष्ठमिति पघासातिक कनिष्ठो वि
स्वामि अस्तमोवेलाद्धा भूतत्वजन्म कनिष्ठोपि दक्षो अपिरः साम्यलक्ष्मणतत्स्वबधिरगस्त्ता इति भावः प्रभावोऽस्मयोरि अस्मसंबंधे कारणं हेतुः ते

यो यो भवं संसृते सर्वं दृष्ट्वा दृपोनृप पुनस्तैव निरुध्यंते विद्वांस्तत्र न मुह्यति ५५ ज्येष्ठानां कनिष्ठमप्येषां पूर्वं नासीज्जनाधिप तपस्त्वा
गीयो भूत्प्रभावश्चैव कारणं ५६ इमां विसृष्टिं दक्षस्य यो विद्यात्सचराचरां प्रजावानायुरुत्तीर्णः स्वर्गलोके महीयते ५७ इति खिलेषु ह
रिवंशे द्वितीयोऽध्यायः २ जनमेजय उवाच देवानां दानवानां च गंधर्वोरगरक्षसां उत्पत्तिं विस्तरेणेमां वैशंपायन कीर्तय १ वैशं
पायन उ प्रजाः सृजेति व्यादिष्टः पूर्वं दक्षः स्वयंभुवा यथा ससर्ज भूतानि तथा शृणु महीपते २ मानसान्येव भूतानि पूर्वमेवा
सृजत्प्रभुः ऋषीन्देवान्सगंधर्वानसुरान्यक्षराक्षसान् पन्नगान्पिशाचांश्च वयः पशुसरीसृपान् ३ यदास्य ता न मानस्यो
नन्यवर्द्धंत वै प्रजाः अपध्याता भगवता महादेवेन धीमता ४ ततः संचिंत्य तु पुनः प्रजाहेतोः प्रजापतिः स मैथुनेन धर्मे
णासिसृक्षुर्विविधाः प्रजाः ५ असिक्नीमावहत्पत्नीं वीरणस्य प्रजापतेः सुतां सुतपसा युक्तां महतीं लोकधारिणीं ६

न सोऽमकश्यपस्य सुरत्वं दक्षस्य सुक्तं ५६ ५७ इति द्वितीयोऽध्यायः देवानामिति १ व्यादिष्ट आज्ञप्तः भूतानि जरायुजादीनि २ मानसान्येवेति
सार्द्धश्लोकः ३ यदास्येति अवर्द्धो हेतुः अपध्याता इति पूर्वकल्पीयवैरस्मरता महादेवेन दक्षस्य मानस्यः प्रजा नाभ्यवर्द्धन्तामित्यन्यथाध्याताः
४ प्रजाहेतोः प्रजावृद्ध्यर्थं सिसृक्षुः सन् असिक्नीमावहदित्युत्तरेण संबंधः ५६ ॥: ॥: ॥ :॥ :॥ ⁘ ॥ :८०॥

वीरण्यामिति जन्मजनकभावलक्षणो पुत्रयोगेऽपीष ८७ प्रियोऽभीप्सितः संवादः ज्ञानाधिकारिभिः सह संलापो यस्य तथाभूतो ह देवर्ष्यमाणां वचनं श्रा
ब्रवीदिति सोऽर्हुन संबंधः ८ ९ परमेष्ठी ब्रह्मा पुत्रत्वेन वीरण्यां जाता ननतं नारदाख्यं कश्यपो मुनिर्दत्तशापभयात् दक्षस्यैव दुहितरि भार्यायाः कन्यकाप्रव
तां पित्रेष्टा भ्राता पितुः समत्वात्सैव दुपचाराद्दुहिता तस्यामुत्पाते तस्यां वीरण्यां जनितमिति संबंधः अन्ये तु दक्षस्यैव कन्या दक्षभार्यायासन्नाम्नी निघ्या चन्द्रांशेन ब्री

अथ पुत्रसहस्राणि वीरण्यां पंचवीर्यवान् असिक्न्यां जनयामास दक्ष एव प्रजापतिः ७ तांस्तु दृष्ट्वा महाभागान् संविवर्द्धयि
षून् प्रजाः देवर्षिः प्रियसंवादो नारदः प्राब्रवीदिदं ८ नाशाय वचनं तेषां शापायैवात्मनस्तथा ९ यं कश्यपः सुतवरं परमेष्ठी
व्यजीजनत् दक्षस्यैव दुहितरि दक्षशापभयान्मुनिः १० पूर्वं स हि समुत्पन्नो नारदः परमेष्ठिना असिक्न्यामथ वीरण्यां भू
यो देवर्षिसत्तमः तं भूयो जनयामास पितेव मुनिपुंगवं ११ तेन दक्षस्य पुत्रा वै हर्यश्वा इति विश्रुताः निर्मथ्य नाशिताः स
र्वे विधिना च न संशयः १२ तस्योद्यतस्तदा दक्षो नाशायामितविक्रमः महर्षीन्पुरतः कृत्वा याचितः परमेष्ठिना १३

रण्यामिति विशेषणानुपपत्तिः स्पष्टा १० एतदेव व्याचष्टे साद्वैन पूर्वमिति देवर्षिसत्तमः कश्यपः तं नारदं पितेव परमेष्ठीव ११ विधिना
शास्त्रीयमार्गेण ज्ञाननिर्मथ्य देहाभिमानतः मथ्यायेन नाशिता अदर्शनं नीताः १२ महर्षीन्मरीच्यादीन् परमेष्ठिना ब्रह्मणा याचितः प्रार्थितः
१३ ॥: ॥: ॥: ॥: ॥: ॥: ॥: ॥: ॥:

अपिसंधिमर्थितं नवब्रह्मणः पुत्रोनारदोमह्यं ममकन्यायां भवेत् उत्पद्यतामितिचक्रे अत्रापिकन्यायामित्यर्थः पूर्ववत् १४ अपोढशानां दक्षक
न्यानां कश्यपायदत्तानांमध्येवीरिणीं परमेष्ठिनेकश्यपायेतिशेषः प्रकृष्टः पुत्रः सुतवानितिउपक्रमात् १५ हर्यश्वाः स्रष्टुकामाः सृष्टिंकर्तुकामाः भुवः
अंतरूर्ध्वमधश्चप्रमाणमज्ञात्वा मूढाः सन्तः कथंप्रजाः स्रक्ष्यथेतिसंबंधः भवन्तीतिभूः प्रपंचः तस्यप्रमाणंसाधकंयद्वीपात्मप्रपंचस्यसिद्धिंतत्

ततोभिसंधिंचक्रेवैदक्षस्तुपरमेष्ठिना कन्यायांनारदोमह्यंतवपुत्रोभवेदिति १४ ततोदक्षस्सुतांप्रादात्कन्यांवैपरमेष्ठिने
सतस्यांनारदोजज्ञेदक्षशापभयादृषिः १५ जनमेजयउवाच कथंविनाशिताः पुत्रानारदेनसुरर्षिणा प्रजापतेर्द्विज
श्रेष्ठश्रोतुमिच्छामितत्वतः १६ वैशंपायनउ दक्षस्यपुत्राहर्यश्वाविवर्द्धयिषवः प्रजाः समागतामहावीर्यानारदस्ता
नुवाचह १७ बालिशावतयूयंवैनास्याजानीथवैभुवः प्रमाणंस्रष्टुकामाःस्थप्रजाः प्राचेतसात्मजाः १८ अंतरूर्ध्वमध
श्चैवकथंस्रक्ष्यथवैप्रजाः तेतुतद्वचनंश्रुत्वाप्रयाताः सर्वतोदिशं १९ वायोरनुशरणंमार्गंगतास्तेवैपराभवं अद्यापि
नानिवर्त्तन्तेसमुद्रेभ्यइवापगाः २१

दात्मानंकर्तुंलोपधौः ज्ञश्वसंतेभ्यज्ञानंतांयुष्माकंतुनास्त्यधिकारोनास्तीत्यर्थः १८
सर्वतोदिशंसर्वदिगभिमुखास्तेस्मोम्यगिरिप्रेक्षाः संतप्यात्मदर्शनार्थंप्रयाताइत्यर्थः १९ वायोरितिलयक्षोपेपंचमो वायुर्वेगेनमनतस्तत्रामिति
स्तुतेवायुसत्वात्मानसमाधिबलेनातात्संध्यानेनाव्यशनापायनीतस्युद्धवलप्राप्यपराभवंपरंचतदभवंवन्यासंपतिकंकैवल्यंगताः संतोऽद्यापिन
निवर्तंतइत्यर्थः दृष्टान्तः स्पष्टार्थः २१

ह॰टी॰
१३

२२ वचनं वक्रोक्तिविशेषैः नोदिताः गमनार्थं प्रेरिताः २३ पदवीं मार्गं २४ २५ नाशं सर्वात्मनो देहवियोगे गर्भवासं वा कुरु परमेष्ठिनामार्षि

हर्यश्वेष्वथ नष्टेषु दक्षः प्राचेतसः पुनः वीरिण्यामेव पुत्राणां सहस्रमसृजत्प्रभुः २१ विवर्द्धयिषवस्तेतु सबलाश्वाः
प्रजास्तदा पूर्वोक्तं वचनं तात नारदेनैव चोदिताः २२ अन्योन्यमूचुस्ते सर्वे सम्यगाह महामुनिः भ्रातृणां पदवीं ज्ञातुं गं
तव्यं नात्र संशयः ज्ञात्वा प्रमाणं पृथ्व्याश्च सुखं स्रक्ष्यामहे प्रजाः एकाग्राः स्वस्थमनसो यथावदनुपूर्वशः २४ तेऽपि तेने
व मार्गेण प्रयाताः सर्वतो दिशं अद्यापि न निवर्तन्ते समुद्रेभ्य इवापगाः २५ नष्टेषु शबलाश्वेषु दक्षः क्रुद्धोऽब्रवीद्वचः ना
रदं नाशमेहीति गर्भवासं वसेति च २६ तदाप्रभृति वै भ्राता भ्रातुरन्वेषणे नृप प्रयातो नश्यति हि मे तन्न कार्यं विपश्चि ता
२७ तांश्चैव नष्टान्विज्ञाय पुत्रान्दक्षः प्रजापतिः षष्टिं दक्षोऽसृजत्कन्या वीरिण्यामिति नः श्रुतं २८ तास्तदा प्रतिजग्राह भा
र्यार्थे कश्यपः प्रभुः सोमो धर्मश्च कौरव्य तथैवान्ये महर्षयः २९ ददौ स दश धर्माय कश्यपाय त्रयोदश सप्तविं
शतिं सोमाय चतस्रोऽरिष्टनेमिने ३० द्वे चैव बहुपुत्राय द्वे चैवाङ्गिरसे तथा द्वे कृशाश्वाय विदुषे तासां नामानि मे शृणु
३१ अरुन्धती वसुर्जामी लंबा भानुर्मरुत्वती संकल्पा च मुहूर्त्ता च साध्या विश्वा च भारत ३२

नेत्वात् आधिकारिकत्वेन नाशानर्हत्वाच्च २६ २७ दक्षो नलमः षष्टिं कन्याः नारदेन स्वीकारात् उपदेशानर्हाः दक्षोऽसृजत २८ २९ कश्य
पस्यैव बहुपत्नीत्वात् अरिष्टनेमिः इत्यतोऽप्यपशब्दोः चैव हशपेते ३० मेमम वचनात् शृणु इत्यध्याहृत्य योज्य ३१ ३२ ॥ ॥

राम॰
१३

अक्रमेण धर्मपत्नीनां संततिमाह धर्मपत्न्यइत्यादिना ३३ मुहूर्त्तजाः मुहूर्त्तायाः पुत्राः क्षणलवादिकालाभिमानिन्यो देवताः इत्यर्थः ३४
घोषो मंत्राभिमानिनी देवता नागवीथी संगमार्गाभिमानिनी देवता पृथिवीविषयं आस्यपस्थौषध्यादि ३५ संकल्पः मानसक्रियाभिमा
निनी देवः अज्ञाहिति पंचभ्यो यागदेवानां ततस्ततसम्भः क्रमेण कालमन्वन्तरार्यहविर्षां दशम्या सर्वेषां प्रनभूतस्य देवतोद्देशेन द्रव्यत्यागः हृपसी

धर्मपत्न्योदशत्वेतास्तासां प्रसवानिमं शृणु विश्वेदेवास्तु विश्वायाः साध्या साध्यान् अजायत ३३ मरुत्वत्यां मरुत्वंतो वसोस्तु
वसवस्तथा भानोस्तु भानवस्तात मुहूर्त्तायां मुहूर्त्तजाः ३४ लंबायाश्चैव घोषोऽथ नागवीथी च जामिजा पृथिवीविषयं स
र्वमरुन्धत्यां व्यजायत ३५ संकल्पायास्तु सर्वात्मा जज्ञे संकल्प एव हि नागवीथ्यास्तु जामिन्या हृषलंबा व्यजायत ३६ या
राजन् सोमप्रजास्तु दक्षः प्राचेतसो ददौ सर्वा नक्षत्रनाम्न्यस्ता ज्योतिषे परिकीर्त्तिताः ३७ ये त्वनेके सुरगणा देवा ज्योतिः
पुरोगमाः वसवोऽष्टौ समाख्यातास्तेषां वक्ष्यामि विस्तरं ३८ आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलो प्रत्यूषश्च प्रभा
सश्च वसवो नामभिः स्मृताः ३९ आपस्य पुत्रो वैतंड्यः श्रमः शान्तो मुनिस्तथा ध्रुवस्य पुत्रो भगवान् कालो लोकप्रका
लनः ४० सोमस्य भगवान् वर्चा वर्चस्वी येन जायते धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा मनोहरायाः शिशिरः प्राणो
ऽथ रमणस्तथा ४१ ॥

संकल्पस्य च सर्वात्मेति ज्ञा जामिन्या जामिपुत्राश्च अजीथ्याः सकाशात् वृषलंबा कालांतर
फलवृष्टिकर्त्री धर्मई श्वावा आलेवत इति अष्टवसवोईश्वर प्रीतिसत्तावा तदभिमानिनी देवता वृषलंवैसुच्यते हेषलं इति पाठेपि
वृषलाति आदत्त इति मुस्ततास एवार्थः ३६ नक्षत्रनाम्न्योः अश्विन्याद्याः कृत्तपयो तिष्य एवेतान्यपि ३७ ४० मनोहराः याः धारस्य

ह॰टी॰
१४

अनिलस्य शिवा भार्येत्येकं वाक्यं द्वौ पुत्रावनिलस्येत्यपरं ४२ इत्यग्नेः कुमारस्तु शरः अनलस्य चत्वारः पुत्रा इत्यर्थः ४३ कुमारश्च स्कंदापरनामा कार्त्तिकेय इत्याहापत्यमिति तेन स्कंद इत्याख्यात इति श्लोकद्वयादेपि सनत्कुमारस्येवं लक्ष्यत्वश्रवणात्सनत्कुमारश्च स एव अन्तरेण तेजसः पादेन वृ वत्पुर्थाज्ञो नाम्निनास्तुः एकवचनशायितावित्यपि ४४ पुत्रो दुहिता च पुत्रश्चेति पुत्रौ ४५ तावेवाह बृहस्पतेरिति बृहस्पतेस्तु भगिनी च ब्रह्मचारि

शा

अनिलस्य शिवा भार्या यस्याः पुत्रो मनोजवः अविज्ञातगतिश्चैव द्वौ पुत्रावनिलस्य तु ४२ अग्निपुत्रः कुमारस्तु शरस्तंबे श्रियावृतः तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजाः ४३ अपत्यं कृत्तिकानां तु कार्त्तिकेय इति स्मृतः स्कंदः सनत्कुमारश्च सृष्टः पादेन तेजसः ४४ प्रत्यूषस्य विदुः पुत्रमृषिं नाम्ना च देवलं द्वौ पुत्रौ देवलस्यापि क्षमावंतौ तपस्विनौ ४५ बृहस्पतेस्तु भगिनी वरस्त्री ब्रह्मचारिणी योगसिद्धा जगत्कृत्स्नमसक्ता विचरत्युत ४६ प्रभासस्य च भार्या सा वसूनामष्टमस्य च विश्वकर्मा महाभागस्तस्यां जज्ञे प्रजापतिः ४७ कर्ता शिल्पसहस्राणां त्रिदशानां च वर्द्धकिः भूषणानां च सर्वेषां कर्ता शिल्पवतां वरः ४८ यः सर्वेषां विमानानि दैवतानां चकार ह मनुष्याश्चोपजीवंति यस्य शिल्पं महात्मनः ४९ सुरभी कश्यपाद्रुद्रानेकादश व्यजायत महादेवप्रसादेन तपसा भाविता सती ५० ॥ ॥ ॥ ॥

णी नाम योगसिद्धा सा जगत्कृत्स्नमपि पृथगोकरणी प्रभासस्याष्टमस्य वसोर्भार्याभूत् तस्यां च विश्वकर्मा जज्ञ इति श्लोकद्वयार्थः ४६ ४७ वर्द्धकिः तक्षा ४८ ४९ कश्यपाय त्रयोदश कन्या दक्षो ददौ तेषु काचित्सुरभ्याः संततिमाह सुरभीति ५० ॥ ॥ ॥ ॥ राम॰
१४

अजैकपादित्येकः अहिर्बुध्न्य इत्येकः ५१ ५२ ज्यामा इमे तल्लोका इत्युत्तरस्थेन संबध्यते शतं अनंतं असंख्याताः सहस्राणि ये रुद्रा अ
धिभूम्यामिति श्रुतेः ५३ कश्यपस्य भार्या इति शेषः ५४ ५५ पूर्वमन्वंतरे इत्यस्य व्याख्यानं चाक्षुषस्यांतरे मनोरिति उपस्थिते स्वर्गमन्वंतरे सा

अजैकपादहिर्बुध्न्यः पिनाकी च परंतप हरश्च बहुरूपश्च त्र्यंबकश्चापराजितः ५१ वृषाकपिश्च कपर्दी रैवतस्तथा एकादशैते
कथिता रुद्रास्त्रिभुवनेश्वराः ५२ शतं त्वेतत्समाख्यातं रुद्राणाममितौजसां पुराणे भरतश्रेष्ठ यैर्व्याप्ताः सचराचराः ५३ लोका
मातश्चाहं कश्यपस्य निबोध मे अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा तथा ५४ सुरभिर्विनता चैव ताम्रा क्रोधवशा इराः ५
कद्रुर्मुनिः स्वसा चैव तास्वपत्यानि मे शृणु ५५ पूर्वमन्वंतरे तात द्वादशासन्सुरोत्तमाः तुषिता नाम तेऽन्योन्यमूचुर्वैवस्व
तेंतरे ५६ उपस्थितेतियशसश्चाक्षुषस्यांतरे मनोः हितार्थं सर्वलोकानां समागम्य परस्परं ५७ आगच्छत द्रुतं सर्वेऽ
दितिः संप्रविश्य वै मन्वंतरे प्रसूयामस्तन्नः श्रेयो भविष्यति ५८ वैशंपायन उवाच एवमुक्त्वा तु ते सर्वे चाक्षुषस्यांतरे
मनोः मारीचात्कश्यपाज्जातास्तेऽदित्या दक्षकन्यया ५९ तत्र शक्रश्च विष्णुश्च जज्ञाते पुनरेव ह अर्यमा चैव धा
ता च त्वष्टा पूषा तथैव च ६० विवस्वान्सविता चैव मित्रो वरुण एव च अंशो भगश्चातितेजा आदित्या द्वादश स्मृताः
६१ चाक्षुषस्यांतरे पूर्वमासन्ये तुषिताः सुराः वैवस्वतेंतरे ते वै आदित्या द्वादश स्मृताः ६२ याः सप्तविंशतिः प्रो
क्ताः सोमपत्न्योऽथ सुव्रताः तासामपत्यान्यभवन्दीप्तान्यमिततेजसां ६३ ॥:॥३:॥ ॥:

शंभुश्च

वसातावित्यर्थः ५७ मन्वंतरे वैवस्वतेऽइति शेषः ५८ ५९ जज्ञाते पुनरिति कश्यपाददितेरेव पूर्वं सुतपःपृश्निसंज्ञयोः हरेर्जातत्वात् ६० ६१
६२ ६३ ॥: ॥: ॥: ॥: ॥:

ह॰टि॰
२५

विद्युतः विद्युदादय विद्युतोऽशनिमेघांश्च रोहितेंद्रधनूंषि चेति पूर्वोक्ताः चतस्रः रोहितेंद्रधनुषोर्भेदात् वहुपुत्रस्य प्रजापतेर्विशेषस्य ६४
प्रत्यंगिरसजाः ऋगिरसोमवतीषु तास्त्रकामंत्रयम सोयथार्थंगिराः शौनकः प्रत्यंगिरसः शौनहोत्रो भूत्वा भार्गवः शौनकोऽभवदिति
स्मृतः तस्माज्जातास्तेन दृष्टा ऋचः मंत्राः प्रत्यंगिरसजाः आथर्वणवेदे सिशौनकीयशाखायां प्रसिद्धाः तत्रैव प्रत्यंगिरसमंत्राः शांतिक
ाः प्रसिद्धाः प्रहरणानि वज्रादि अभिमानिन्यो देवताः ६५ एते प्रजापतेर्वीर्यादीनामृतुलिंगवत्पुनर्पुनर्जायंत इत्यर्थः त्रयस्त्रिंशल्लेति
तुशब्दो विशेषार्थः त्रयस्त्रिंशद्देवेषु वसवः एकादशरुद्रा द्वादशादित्या इंद्रः प्रजापतिश्च तत्र पृथिव्यग्नी वायंतरिक्षद्युसूर्यचंद्रनक्षत्रा

अरिष्टनेमिपत्नीनामपत्यानीह षोडश वहुपुत्रस्य विदुषश्चतस्रो विद्युतः स्मृताः ६४ प्रत्यंगिरसजाः श्रेष्ठा ऋचो ब्र
ह्मर्षिसत्कृताः कृशाश्वस्य तु देवर्षेर्देवप्रहरणानि च ६५ एते युगसहस्रान्ते जायन्ते पुनरेव ह सर्वे देवगणास्तात त
त्रयस्त्रिंशत्तु कामजाः तेषामपीहराजेंद्र निरोधोत्पत्तिरुच्यते ६६ ॥ः॥ः॥ः॥ः

णि वसवः वाक्पाणिपादपायूपस्थानि पंचकर्मेंद्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि इति पंचज्ञानेंद्रियाणि सर्वेंद्रियाधारं मनस्त्वेते एकाद
शरुद्राः आदित्या मासाधिष्ठात्र्यो देवताः अनुपदोक्ता विष्ण्वादयः कालरूपिणश्च ३३ः पर्जन्यः प्रजापतिर्जीवः एते भोक्तृभोग्यात्मकात्र
यस्त्रिंशद्देवाः कामजाः सोऽकामयत बहुःस्यां प्रजायेयेति श्रुतेरिच्छातो जाता मनसा कामजाः एते प्रतिकल्पमहर्दे प्रजापतेरितरे तु ऋतुलिंगवदेकस्मिन्कल्पे
ऽसकृज्जायंत इत्यर्थः कामजानामस्मादिमतं इदं पातंत्रामिस्तु हेतुर्निरोधसहिता समानैर्निरोधोत्पत्तिरुच्यते वेदे इति शेषः ६६ ॥

राम॰
२५

एतद्देवदृष्टांतेनद्रढयति यथेति देवनिकायाः देवानांशरीराण्येवजायंते नतुतद्रूपाहित्त आत्मायद्वाकायाद्देहसंघे ६७ आदित्यानुक्रत्वारैसा

यथासूर्यस्यकौश्यउदयास्तमनेइह एवंदेवनिकायास्तेसंभवंतियुगेयुगे ६७ दितिःपुत्रद्वयंलेभेकश्यपादितिनः
श्रुतंहिरण्यकशिपुंचैवहिरण्याक्षंचवीर्यवान् ६८ सिंहिकाचाभवत्कन्याविप्रचित्तेःपरिग्रहः सैंहिकेयाइतिख्या
तास्तस्याःपुत्रामहाबलाः गणास्तेषांचाजेद्दशसाहस्रमुच्यते ६९ हिरण्यकशिपोःपुत्राश्चत्वारःप्रथितौजसः
अनुह्लादश्चह्लादश्चप्रह्लादश्चैववीर्यवान् ७० संह्लादश्चचतुर्थोभूत्ह्लादपुत्रोह्रदस्तथा ह्रादपुत्रोसुंदश्चनिसुंद
श्चैवतावुभौ ७१ अनुह्लादसुतोह्यायुः शिबिःकालस्तथैवच विरोचनश्चप्राह्लादिर्बलिर्जज्ञेविरोचनात् ७२ बलेः
पुत्रशतंचासीद्बाणज्येष्ठंनराधिप धृतराष्ट्रश्चसूर्यश्चचंद्रमाश्चेंद्रतापनः ७३ कुंभनाभोगर्दभाक्षः कुक्षिरित्ये
वमादयः बाणस्तेषामतिबलोज्येष्ठः पशुपतेःप्रियः ७४ पुराकल्पेहिबाणेनप्रसाद्योमापतिंप्रभुं पार्श्वतोविह
रिष्यामीत्येवंयाचितोवरः ७५ हिरण्याक्षसुताःपंचविद्वांसःसुमहाबलाः झर्झरःशकुनिश्चैवभूतसंतापनस्त
था महानाभश्चविक्रांतःकालनाभस्तथैवच ७६ अभवन्दनुपुत्राश्चशतंतीव्रपराक्रमाः तपस्विनोमहावीर्याः
प्राधान्येनानिबोधतान् ७७

नाहिरिणाद्दसादिना ६८ सैंहिकेयास्त्रयोदशवत्समाणायंसशल्यादयः ६९ ७६ इतोवंशमाह अभवन्नित्यादिना पुत्राइतिपौत्राणीनामप्युपल
क्षणंशतंअनंताः ७७ ॥ ॥ ॥

एतेषुप्रधानान्द्विमूर्द्धादीन्विप्रचित्तिसंतानएकषष्टिंगणयतिद्विमूर्द्धइत्यादिना ७८ ॥ ८३ ॥:॥:॥:॥:॥

द्विमूर्द्धाशकुनिश्चैवतथाशंकुशिराविभुः शंकुकर्णोविराधश्चगवेष्टोदुंदुभिस्तथा ७८ अयोमुखःशंबरश्चकपि
लोवामनस्तथा मरीचिर्मघवांश्चैवइराशंकुशिरावृकः ७९ विक्षोभणश्चकेतुश्चकेतुवीर्यशतह्रदौ इंद्रजित्सप्तजि
च्चैववज्रनाभस्तथैवच ८० महानाभश्चविक्रांतःकालनाभस्तथैवच एकचक्रोमहाबाहुस्तारकश्चमहाबलः ८१
वैश्वानरःपुलोमाचविद्रावणमहासुरौस्वर्भानुर्वृषपर्वाचतुहुंडश्चमहासुरः ८२ सूक्ष्मश्चैवनिचंद्रश्चऊर्णनाभोमहा
गिरिः असिलोमासुकेशीचशठश्चबलकोमदः ८३ तथागगनमूर्धाचकुंभनाभोमहासुरः प्रमदोमयःकुपथो
हयग्रीवश्चवीर्यवान् वैसृपःसविरूपाक्षःसुपथोथहराहरौ ८४ हिरण्यकशिपुश्चैवशतमायश्चशंबरः शरभःश
लभश्चैवविप्रचित्तिश्चवीर्यवान् ८५ एतेसर्वेदनोःपुत्राःकश्यपादभिजज्ञिरे विप्रचित्तिप्रधानास्तेदानवाःसुमहाबलाः
८६ एतेषांपुत्रपौत्रास्तुअशक्यन्नराधिपः प्रसंख्यातुंमहीपालपुत्रपौत्राह्यनेकशः ८७ स्वर्भानोस्तुप्रभाकन्यापुलो
म्नस्तुसुताशची उपदानवीहयशिराःशर्मिष्ठावार्षपर्वणी ८८ पुलोमाकालकाचैववैश्वानरसुतेउभे बहुपत्ये
महावीर्येमारीचेस्तुपरिग्रहः ८९ तयोःपुत्रसहस्राणिषष्टिंदानवनंदनाः चतुर्दशशतान्यासन्हिरण्यपुरवासिनः
मारीचिर्जनयामासमहतातपसान्वितः पौलोमाःकालकेयाश्चदानवास्तेमहाबलाः ९० अवध्यादेवतानांचहिरण्य
पुरवासिनःकृताःपितामहेनाजौनिहताःसव्यसाचिना ९१ प्रभायांनहुषःपुत्रोजयंतश्चशचीसुतः पूरुंजनयतेशर्मि
ष्ठादुष्यंतमुपदानवी ९३ ॥:॥

ततोपि महावीर्या दानवास्त्वतिदारुणाः सिंहिकायामथोत्पन्ना विप्रचित्तेः सुतास्तदा ९४ दैत्यादानवसंयोगाज्जातास्तीव्रपराक्रमाः
सैंहिकेयाइतिख्यातास्त्रयोदशमहाबलाः व्यंशः शल्यश्चबलिनोनभश्चैवतथापरः वातापिर्नमुचिश्चैवइल्वलः खसृमस्तथा ९६
आञ्जिकोनरकश्चैवकालनाभस्तथैवच शरः पोतरणश्चैववज्रनाभश्चवीर्यवान् ९७ राहुर्ज्येष्ठस्तुतेषांवैसूर्यचंद्रविमर्दनः स्रुकश्चैवहुंड
स्तःकुहस्पुत्रौबभूवतुः ९८ मारीचः सुरस्तुत्रसूताटकायाव्यजायत शिवमाणस्तथाचैवसुरकल्पश्चवीर्यवान् ९९ एतेवैदानवाः श्रेष्ठा
दनुवंशविवर्द्धनाः तेषांपुत्राश्चपौत्राश्चशतशोथसहस्रशः १०० प्रह्लादस्यतुदैत्यस्यनिवातकवचाः कुलेसमुत्पन्नाः सुतपसोमहा
तोभावितात्मनः १ तिस्रः कोट्यः सुतास्तेषांमणिमत्यांनिवासिनः तेप्यवध्यास्तुदेवानामर्जुनेननिपातिताः २ षट्सुतास्तुमहा
सत्वास्ताम्रायाः परिकीर्तिताः काकीश्येनीचभासीचसुग्रीवीशुचिगृध्रिका ३ काकीकाकानजनयदुलूकीप्रत्युलूककान् श्ये
नीश्येनांस्तथाः भासीभासानगृध्रांश्चगृध्र्यपि ४ शुचिरौदकानपक्षिगणानसुग्रीवीतुपरंतप अश्वानुष्ट्रानगर्दभांश्चताम्रा
वंशः प्रकीर्तितः ५ विनतायास्तुपुत्रौद्वावरुणोगरुडस्तथा सुपर्णः पततांश्रेष्ठोदारुणः स्वेनकर्मणा ६ सुरसायाः स
हस्रंतुसर्पाणाममितौजसां अनेकशिरसांतातखेचराणांमहात्मनां ७ काद्रवेयाश्चबलिनः सहस्रममितौजसः सुपर्णवश
गानागाजज्ञिरेऽनेकमस्तकाः ८ तेषांप्रधानाः सततंशेषवासुकितक्षकाः ऐरावतोमहापद्मः कंबलाश्वतरावुभौ ९ ए
लापत्रस्तथाशंखः कर्कोटकधनंजयौ महानीलमहाकर्णौधृतराष्ट्रबलाहकौ १० कुहरः

ह: दि: सुपर्णरश्चश्चद्दुमुखः सुमुखस्तथापरः खञ्चशंखपालश्च कपिलो वामनस्तथा ११ नहुषः शंखरोमा च पाणिरित्येवमादयः तेषां पुत्राश्च
२७ पौत्राश्च गरुडेन निपातिताः १२ चतुर्दश सहस्राणि क्रूराणां भुजगाशिनां गणं क्रोधवशं विद्धि तस्य सर्वे च दंष्ट्रिणः १३ स्थलजाः प-
क्षिणो जाश्च धरायाः प्रसवः स्मृतः गास्तु वै जनयामास सुरभिर्महिषीस्तथा इरा वृक्षलतावल्लीस्तृणजातीश्च सर्वशः खसा तु यक्षरक्षां-
सि मुनिरप्सरसस्तथा १५ अरिष्टा तु महासत्वा गंधर्वानमितौजसः एते कश्यपदायादाः कीर्तिताः स्थाणुजंगमाः १६ तेषां पुत्राश्च पौ-
त्राश्च शतशोथ सहस्रशः एष मन्वंतरे तात सर्गः स्वारोचिषे स्मृतः १७ वैवस्वते तु महति वारुणे वितते क्रतौ जुह्वानस्य ब्रह्मणो वै प्रजास-
स र्ग इहोच्यते १८ पूर्वं यत्र तु ब्रह्मर्षीनुत्पन्नान्सप्त मानसान् पुत्रत्वे कल्पयामास स्वयमेव पितामहः १९ ततो विरोधे देवानां दानवानां च भारत
दितिर्विनष्टपुत्रा वै तोषयामास कश्यपं २० तां कश्यपः प्रसन्नात्मा सम्यगाराधितस्तया वरेण छंदयामास सा च वव्रे वरं ततः २१
वरं पुत्रमिंद्रवधार्थाय समर्थममितौजसं स च तस्यै प्रादात् प्रार्थितं सुमहातपाः २२ दत्वा च वरमव्यग्रो मारीचस्तामभाषत भवि-
ष्यती सुतस्तेयं यद्येवं धारयिष्यसि २३ इंद्रं सुतो निहंता ते गर्भं वै शरदां शतं यदि धारयसे शौचा तत्परा व्रतमास्थिता २४
तथेत्यभिहितो भर्ता तया देव्या महातपाः धारयामास गर्भं तु शुचिः सा वसुधाधिप २५ ततोभ्युपगमाद्दित्याः गर्भमाधाय कश्यपः
रोचयन्वै गणश्रेष्ठं देवानाममितौजसं २६ तेजः संभृत्य दुर्धर्षमवध्यममरैरपि जगाम पर्वतायैव तपसे संशितव्रतः २७
तस्याश्चैवांतरप्रेप्सुरभवत्पाकशासनः ऊने वर्षशते चास्या ददर्शांतरमच्युतः २८ अकृत्वा पादयोः शौचं दितिः शयनमावि- रामः
शत ॥ निद्रां चाहाः ॥ : ॥ : ॥ २७

२६ तृतीयोऽध्यायः एवं सा भारूपेण नर्मदा तत्र छिपुकार्श्च पृथुर्वैन्य महातेजा वेमाररहस्तत्र पूर्वज राज्ञस्तपाभिषिक्तानामाद्यः सर्ववसुधाधिप इति प्रागुक्तं।२
योगपर्वविहरणोतेर्सर्वेषां राज्ञा नां तदानं तर्पदर्शयन् अभिषिच्येत्यादिना अधिराज्यराज्ञामपि राजत्वे वैमन्येनस्य पुत्रो राज्ञ नसोमादीनां व्यादेष्टुमा

रयामास तस्याः कुक्षिं प्रविश्य ह २८ वज्रपाणिस्ततो गर्भं सप्तधा तं न्यकृन्तत सपाट्यमानो वज्रेण गर्भस्तु प्ररुरोद ह २९ मा
रोदीरिति तं शक्रः पुनः पुनरथाब्रवीत् सोऽभवत्सप्तधा गर्भस्तमिन्द्रो रुषितः पुनः ३० एकैकं सप्तधा चक्रे वज्रेणारिविकर्शनः म
रुतो नाम देवास्ते बभूवुर्भरतर्षभ ३१ यथैवोक्तं मघवता तथैव मरुतोऽभवन् देवाः एकोनपञ्चाशत्सहाया वज्रपाणिनः ३२ तेषामेव प्रवृद्धा
नां भूतानां जनमेजय रोचयन्वै गणश्रेष्ठं देवानाममितौजसां ३३ निकायेषु निकायेषु हरिः प्रादात्प्रजापतीन् क्रमशस्तानि राज्या
नि पृथुपूर्वाणि भारत ३४ स हरिः पुरुषो वीरः कृष्णो जिष्णुः प्रजापतिः पर्जन्यस्तपनो व्यक्तस्तस्य सर्वमिदं जगत् ३५ भूत
सर्गमिमं सम्यक् जानतो भरतर्षभ मरुतां च शुभं जन्म शृणुयाद्यः पठेच्च वा नास्ति भयमस्तीह परलोकभयं कुतः ३६ इति
श्रीमहाभारते खिलेषु हरिवंशे तृतीयोऽध्यायः ३ वैशम्पायन उवाच अभिषिच्याधिराज्ये तु पृथुं वैन्यं प्रजापतिः ततः
क्रमेण राज्यानि [illegible] व्यादेष्टुमुपचक्रमे १ द्विजानां वीरुधां चैव नक्षत्रग्रहयोस्तथा यज्ञानां तपसां चैव सोमं राज्येऽभ्य
षेचयत् २ अपां तु वरुणं राज्ये राज्ञां वैश्रवणं प्रभुं आदित्यानां तथा विष्णुं वसूनामथ पावकं ३ प्रजापतीनां दक्षं तु
मरुतामथ वासवं दैत्यानां दानवानां च प्रह्लादममितौजसं ४ वैवस्वतं पितॄणां च यमं राज्येऽभ्यषेचयत् मातॄणां च व्रतानां

ज्ञापयितुं १ नक्षत्रग्रहयोः ज्ञातमध्यायेणादि द्विवचनं नक्षत्रजातीयग्रहजातीययोरित्यर्थः यज्ञानां १ वमन्त्राणां च तथा गवां ५
यज्ञाद्यधिष्ठात्रीणां देवतानां २ ३ ४ ५ ॥ ॥ ॥ ॥ ॥ ॥ ४४॥ ॥

शूलेनपाणिनातुल्यंचहन्तुंशीलमस्येतिशूलपाणीतंशूलपाणिनं ६ विष्णुश्शूलपाणिम्भ्यांश्चमावेमोनारायणावृषभध्वजोदेवौव्येष्यावीश्वरावेतावितरा
मनेकत्वात् ७ गंधानांगंधमात्ररूपाणांमरुतः सर्वेषामेकोनपंचाशतआप्यवतुमाणावायवोपहखुहार्थः अशरीराणांस्थूलशरीररहितानांप्रेतादीनां
मित्यर्थः शब्दस्याकाशस्यतद्गुणत्वात्तेभ्यो दीनांश्चमहादिशंरोगाणांचभुवामितिपाठेतयोः देवानामितिसएवार्थः सर्वंद्रष्टदृशाद्दितत्पत्रकाः इत्यनुत्या

यज्ञानांतपसांचैवपार्थिवानांतथैवच ५ सर्वभूतपिशाचानांगिरिशंशूलपाणिनं शैलानांहिमवन्तंचनदीनामथसागरं ६
नारायणंतुसाध्यानांरुद्राणांवृषभध्वजं विप्रचित्तिंतुराजानंदानवानामथादिशत् ७ गंधानांमरुतांचैवभूतानामशरीरिणां
शब्दाकाशभुवांचैववायुंबलवतांवरं ८ गंधर्वाणामधिपतिंचक्रेचित्ररथंविभुः नागानांवासुकिंचक्रेसर्पाणामथतक्षकं ९
वारणानांचराजानमैरावतमथादिशत् उच्चैःश्रवसमश्वानांगरुडंचपतत्रिणां १० मृगाणामथशार्दूलंगोवृषंतुचतुष्पदां
वनस्पतीनांराजानंप्लक्षमेवादिशत्प्रभुः ११ सागराणांनदीनांचमेघानांवर्षणस्यच आदित्यानामधिपतिंपर्जन्यमभि
षिक्तवान् १२ सर्वेषांदंष्ट्रिणांशेषंराजानंचाभ्यषेचयत् सरीसृपाणांसर्वेषांराजानंचैवतक्षकं सर्वाप्सरोगणानांचका
मदेवंतथाप्रभुः १२ ऋतूनामथमासानांदेवतानांतथैवच पक्षाणामुभयानांचमुहूर्ततिथिपर्वणां १३

दित्यपदेनअर्कस्यरश्मयोग्राह्याः येपृथिवीरसंशोषयित्वासहस्रगुणमुत्सृजन्ति तेषामधिपतिः पर्जन्यः ११ दंष्ट्रिणांनागानांसर्पाणांतद्विशेषाणांसु
रीसृपाणांडुंडुभादीनांनिर्विषाणां १२ ऋतूनामित्यादिषष्ठ्यन्तानांदेवतानामित्यनेनसंबंधः आत्मत्वाभिमानिनीनांदेवतानांसंवत्सरंसंवत्सराभि
मानिनंदेवं राजानमभ्यषेचयदित्यर्थः १३ ॥४७॥ ॥ ७ ॥ ॥ ॐ ॥ ४४ ॥

गणितस्यगत्यस्यदिप्रीमाणस्यउपयोगार्हेः १४ १८ पर्जन्यपुत्रमित्यनुषंगः २० अद्यापीत्येतावतांदेवतानामाधिकारितेनाकल्पस्थायित्वमिति

कलाकाष्ठाप्रमाणानांगतेरयनयोस्तथा गणितस्याथयोगस्यचक्रेसंवत्सरंप्रभुं १४ एवंविभज्यराज्यानिक्रमेणप्रपितामहः
दिशापालानथततःस्थापयामासभारत १५ पूर्वस्यांदिशिपुत्रंतुवैराजस्यप्रजापतेः दिशापालंसुधन्वानंराजानंसोभ्यषेच
यत १६ दक्षिणस्यांमहात्मानंकर्दमस्यप्रजापतेः पुत्रंशंखपदंनामराजानंसोभ्यषेचयत १७ पश्चिमायांदिशितथारजसः
पुत्रमच्युतं केतुमंतंमहात्मानंराजानंसोभ्यषेचयत १८ तथाहिरण्यरोमाणंपर्जन्यस्यप्रजापतेः उदीच्यांदिशिदुर्द्धर्षंराजानं
सोभ्यषेचयत १९ तैरियंपृथिवीसर्वासप्तद्वीपासपत्तना यथाप्रदेशमद्यापिधर्मेणपरिपाल्यते २० राजसूयाभिषिक्तस्तु
पृथुरेभिर्नराधिपैः वेददृष्टेनविधिनाराजराजोमहाराजभिः २१ ततोमन्वंतरेतीतेचाक्षुषेमिततेजसि वैवस्वतायमनवेब्रह्माराज्य
मथादिशत २२ तस्यविस्तरमाख्यास्येमनोर्वैवस्वतस्यह तवानुकूल्याद्राजेंद्रयदिशुश्रूषसेनघ २३ महदेतदधिष्ठानं
पुराणेपरिकीर्तितं पुराणंप्रशस्यमायुष्यंस्वर्गवासकरंशुभं २४ जनमेजयउवाच विस्तरेणाद्यपृथोर्जन्मवैशंपायनकीर्त
यथयामहात्मनातेनदुग्धाचेयंवसुधरा २५ यथाचपितृभिर्दुग्धायथादेवैर्यथर्षिभिः यथादैत्यैश्चनागैश्चयथायक्षैर्यथा
द्रुमैः २६ ॥:॥:॥:॥:

म

एभिःसोमादिभिःपृथुःराजराजसूयेऽभिषिक्तः सर्वेषुप्रजापतिनाऽभिषेकोऽसंगतउक्तः २१ २२ २३ एत
तत्सर्वंवाअधिष्ठानंप्रतिष्ठाहेतुः २४ २५ २६ ॥:॥:॥:॥:॥:॥४॥:

३३ नसशोचेत्कृताकृतमितिनयाकपर्यंकृतंधर्मेनकृतंइतिपश्चात्तापेनशोचेत्स्नस्नांसर्वपापनाशनंसर्वक्रतुफलप्रदंचेत्यर्थः ३३ इतिचतुर्थो

यथाशैलेःपिशाचैश्चगंधर्वैश्चद्विजोत्तमैः राक्षसैश्चमहासत्वैर्यथादुग्धावसुंधरा २७ तेषांपात्रविशेषांश्चवैशंपायनकीर्तय
त्सान्क्षीरविशेषांश्चसर्वेषामनुपूर्वशः २८ यस्मिंश्चकारणेपाणिर्वेनस्यमथितःपुरा क्रुद्धैर्महर्षिभिस्तातकारणंतच्चकीर्तय
२९ वैशंपायनउवाच हंततेकथयिष्यामिपृथोर्वैन्यस्यसंभवं एकाग्रःप्रयतश्चैवशृणुष्वजनमेजय ३० नाशुचेःक्षुद्रमनसो
नाशिष्यायाव्रतायच कीर्तयेयंमहाराजनकृतघ्नायाहितस्यच ३१ स्वर्ग्यंयशस्यमायुष्यंधन्यंवेदेनसंमितं रहस्यमृषिभिःप्रो
क्तंशृणुराजन्यथातथं ३२ यश्चेमंकथयेन्नित्यंपृथोर्वैन्यस्यसंभवं एकाग्रमानसश्चैवशुश्रूषुर्जनमेजय ब्राह्मणेभ्योनम
स्कृत्यनसशोचेत्कृताकृतं ३३ इतिखिलेषुहरिवंशेपृथूपाख्यानेचतुर्थोध्यायः वैशंपायनउ॰ आसीद्धर्मस्यगोप्ता
वैपूर्वमत्रिसमःप्रभुः अत्रिवंशसमुत्पन्नस्त्वंगोनामप्रजापतिः १ तस्यपुत्रोभवद्वेनोनात्यर्थंधर्मकोविदः जातोमृत्युसुता
यांवैसुनीथायांप्रजापतिः २ समातामहदोषेणवेनःकालात्मजात्मजः स्वधर्मंपृष्ठतःकृत्वाकामाल्लोभेष्ववर्तत ३ मर्यादां
स्थापयामासधर्मापेतांसपार्थिवः वेदधर्मानतिक्रम्यसोधर्मनिरतोभवत् ४ निःस्वाध्यायवषट्कारास्तस्मिन्राजनिशासति
प्रावर्तन्नपपुःसोमंहुतंयज्ञेषुदेवताः ५ नयष्टव्यंनहोतव्यमितितस्यप्रजापतेः आसीत्प्रतिज्ञाक्रूरेयंविनाशेप्रत्युपस्थिते ६
आयुः आसीत् २ कालात्मजायाः आत्मजः ३ प्रवृत्तंसेतोर्हेवेनसक्रं ५ अहमिज्यश्चयष्टाचयज्ञश्चेतिकुरूद्वह ॥ ॥ ॥
तत्र अग्रेमहि प्रमपिसोमंनपपुःयतोनिःस्वाध्यायवषट्काराः ५ तत्रहेतुमाह नेतिधर्मदृष्टीराजन्तेद्रव्यमपिहर्तव्यंदेवानमुंजनइतिभावः ६

मपिदेवतारूपेमत्रिमिन्नंतत्सन्मदेवतार्थमपिच्आग्निरूपे ७ ८ निधनेवंशेनैधनंकुलनाशयोरितिविश्वः १० १४ पाठांतरेअनुनेतुंअधर्मादिस्यारूढं १५

मपिपृहोविधातुन्मोमपिपृहोतस्यानिस्मपि ७ तमतिक्रांतमर्यादमाददानमसांप्रतं ऊचुर्महर्षयः सर्वेमरीचिप्रमुखास्तदा
८ वयंदीक्षांप्रवेक्ष्यामः संवत्सरगणान्बहून् अधर्मंकुरुमावेननैषधर्मः सनातनः ९ निधनेऽत्रेः प्रसूतस्त्वंप्रजापति
रसंशयं प्रजाश्चपालयिष्येहमितितेसमयः कृतः १० तांस्तथाब्रुवतः सर्वान्महर्षीनब्रवीत्तदा वेनः प्रहस्यदुर्बुद्धिरिद
मर्थमनर्थवित् ११ वेनउवाच स्रष्टाधर्मस्यकश्चान्यः श्रोतव्यंकस्यवामया श्रुतवीर्यतपःसत्यैर्मयावाकः समोभुवि १२ प्र
भवंसर्वभूतानांधर्माणांचविशेषतः संमूढानविदुर्नूनंभवंतोमांविचेतसः १३ इच्छन्दहेयंपृथिवींप्लावयेयंजलैस्तथा द्यांभु
वंचैवरुंधेयंनात्रकार्याविचारणा १४ यदानशक्यतेमोहादवलेपाच्चपार्थिवः अनुनेतुंतदावेनस्ततः क्रुद्धामहर्षयः १५ निगृह्य
तंमहात्मानोविस्फुरंतंमहाबलं ततोस्यसव्यमूरुंतेममंथुर्जातमन्यवः १६ तस्मिंस्तुमथ्यमानेवैराज्ञऊरौप्रजज्ञिवान् ह्रस्वोति
मात्रः पुरुषः कृष्णश्चातिबभूवह १७ सभीतः प्रांजलिर्भूत्वास्थितवान्जनमेजय तमत्रिर्विह्वलंदृष्ट्वानिषीदेत्यब्रवीत्तदा
१८ निषादवंशकर्तासबभूववदतांवर धीवरानसृजच्चापिवेनकल्मषसंभवान् १९ येचान्येविंध्यनिलयास्तुषारास्तुंबरास्तु
थास्तथा अधर्मरुचयोयेचविद्धितान्वेनकल्मषान् २० ततः पुनर्महात्मानः पाणिंवेनस्यदक्षिणं अरणीमिवसंरब्धामं
मंथुस्तंमहर्षयः २१

निगृह्यजीवंतमपिपातयित्वा १६ १७ धीवरान्नाविकान् १९ तुषारांस्तुंबरांश्चम्लेच्छदेशीयाः म्लेच्छविशे
षाः विंध्यनिलयाः पोंडेतिइतिकोलइतिचप्रसिद्धाः मध्यदेशीयाः २० २१

ह॰टी॰
२०

२२ गृह्यगृहीत्वारक्षार्थंप्रजानांस्थितइतिशेषः २३ २४ अपरांजिताःपीडिताःअनुरागादितिअनुरक्तास्तेतस्मिन्प्रजाइतिराजपदनिर्वचनंदर्शितं ३० तं
स्तंभिरेस्थलवत्कठिनाबभूवुःअभियास्यतोगंतुमिच्छतःध्वजभंगःशाखाभिर्गोपुरादिभिर्वा ३१ पुटकेपुटकेपत्रेपत्रे ३२ सूत्यांसो

पृथुस्तस्मात्समुत्पन्नःकराज्ज्वलनसंनिभः दीप्यमानःस्ववपुषासाक्षादग्निरिवज्वलन् २२ आद्यमाजगवंनामधनुर्गृह्यमहा
रवः शरांश्चदिव्यान्रक्षार्थंकवचंचमहाप्रभं २३ तस्मिन्जातेथभूतानिसंप्रहृष्टानिसर्वशः समापेतुर्महाराजवेनश्चत्रिदि
वंगतः २४ समुत्पन्नेनकौरव्यसत्पुत्रेणमहात्मना त्रातःसपुरुषव्याघ्रपुन्नाम्नोनरकात्तदा २५ तंसमुद्राःसमागम्यरत्नान्यादा
यसर्वशः तोयानिचाभिषेकार्थंसर्वएवोपतस्थिरे २६ पितामहश्चभगवान्देवैरांगिरसैःसहस्थावराणिचभूतानिजंगमा
नितथैवच २७ समागम्यतदावैन्यमभ्यषिंचन्नराधिपं महताराजराज्येनप्रजापालंमहाद्युतिं २८ सोभिषिक्तोमहातेजा
विधिवद्धर्मकोविदैः आधिराज्येतदाराज्ञांपृथुर्वैन्यःप्रतापवान् २९ पित्रापरंजितास्तस्यप्रजास्तेनानुरंजिताः अनुरा
गात्ततस्तस्यनामराजेत्यजायत ३० आपस्तस्तंभिरेतस्यसमुद्रमभियास्यतः पर्वताश्चददुर्मार्गंध्वजभंगश्चनाभवत् ३१
अकृष्टपच्यापृथिवीसिध्यन्त्यन्नानिचिंतया सर्वकामदुघागावःपुटकेपुटकेमधु ३२ एतस्मिन्नेवकालेतुयज्ञेपैतामहे
हशुभे सूतःसूत्यांसमुत्पन्नःसौत्येहनिमहाद्युतिः ३३ तस्मिन्नेवमहायज्ञेजज्ञेप्राज्ञोथमागधः पृथोःस्तवार्थंतौतत्र
समाहूतौसुरर्षिभिः ३४

माभिषवकालेत्वभिषवःसोमवल्ल्याःकंडनंसानिष्काशनार्थंअत्रतुवैन्यस्यैवयज्ञेग्निकुंडात्सूतमागधौजातौ
विप्रुक्तंतत्कालस्यभेदात्समाधेयं ३३ ३४ ॥:॥: ॥:॥: ॥: ॥:-॰: ॥ ॰: ॥ :॥ :॥

या॰मे॰
२०

३७ विद्वः जानीवः स्तुतनस्यादि द्विवचनं ३८ पश्चान्महत्स्मिन्कल्पे यानि कृतवांस्तैरेव अस्मिन्कल्पे भविष्यैः कर्मभिः स्तूयतामिति योजना प्रतिकल्पं समानत्वाम

तानूचुर्ऋषयः सर्वे स्तूयतामेष पार्थिवः कर्मैतदनुरूपं वां पात्रं चायं नराधिपः ३५ तावूचतुस्तदा सर्वांस्तानृषीन्सूतमागधौ आवां
देवानृषींश्चैव प्रीणयावः स्वकर्मभिः ३६ न चास्य विद्वो वै कर्म न तथा लक्षणं यशः स्तोत्रं येनास्य कुर्वो वै राज्ञस्तेजस्विनो द्विजाः ३७
ऋषिभिस्तौ नियुक्तौ तु भविष्यैः स्तूयतामिति यानि कर्माणि कृतवान्पृथुः पश्चान्महाबलः ३८ सत्यवाग्दानशीलोयं सत्यसंधो
नरेश्वरः श्रीमाञ्जैत्रः क्षमाशीलो विक्रान्तो दुष्टशासनः ३९ धर्मज्ञश्च कृतज्ञश्च दयावान्प्रियभाषणः मान्यो मानयिता यज्वा ब्रह्मण्यः
सत्यसंगरः ४० शमः शान्तश्च निरतो व्यवहारस्थितो नृपः ततः प्रभृति लोकेषु स्तवेषु जनमेजय आशीर्वादाः प्रयुज्यन्ते सूतमा
गधबंदिभिः ३९ तयोः स्तवान्ते सुप्रीतः पृथुः प्रादात्प्रजेश्वरः अनूपदेशं सूताय मगधान्मागधाय च ४० तं दृष्ट्वा परमप्रीताः प्रजा
प्राहुर्महर्षयः वृत्तीनामेष वो दाता भविष्यति न संशयः ४१ ततो वैन्यं महाराजं प्रजाः समभिदुद्रुवुः त्वं नो वृत्तिं विधत्स्वेति महर्षि
वचनात्तदा ४२ सोभिद्रुतः प्रजाभिस्तु प्रजाहितचिकीर्षया धनुर्गृह्य पृषत्कांश्च पृथिवीमार्दयद्बली ४३ ततो वैन्यभय
त्रस्ता गौर्भूत्वा प्राद्रवन्मही तां पृथुर्धनुरादाय द्रवन्तीमन्वधावत ४४ सा लोकान्ब्रह्मलोकादीन्गत्वा वैन्यभयात्तदा प्रदद
र्शाग्रतो वैन्यं प्रगृहीतशरासनं ४५ ज्वलद्भिर्निशितैर्बाणैर्दीप्ततेजसमच्युतं महायोगं महात्मानं दुर्धर्षममरैरपि ४६

रूपायाख्यत्वष्टेः सूर्याचंद्रमसोर्धातातायाथाप्स्वेभकल्पयादितिस्थवाणात् ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ५:॥:॥
श्रीरामः॥४७॥ ॥:॥:॥:॥२॥

४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ इतिपंचमोध्यायः श्लोकसं ७ संपषष्ठदितमहद्याकल्पय ८ ९ ॥ः॥ः॥ः॥ः॥

अलभंतीतुसात्राणंवैन्यमेवान्वपद्यत कृतांजलिपुटाभूत्वापूज्यालोकैस्त्रिभिःसदा ४७ उवाचवैन्यंनाधर्मंस्त्रीवधंकर्तुमर्हसि
कथंधारयिताचासिप्रजाराजन्विनामया ४८ मयिलोकाःस्थिताराजन्मयेदंधार्यतेजगत् मद्विनाशेविनश्येयुःप्रजाःपार्थिवविद्धि
तत् ४९ नत्वमर्हसिमांहंतुंश्रेयश्चेत्त्वंचिकीर्षसि प्रजानांपृथिवीपालशृणुचेदंवचोमम ५० उपायतःसमारब्धाःसर्वेसिद्ध्यंत्युपक्र
माः उपायंपश्ययेनत्वंधारयेथाःप्रजान्नृप ५१ हत्वापिमांनशक्तस्त्वंप्रजानांधारयितुंनृप अन्नभूताभविष्यामियच्छकोपंमहाद्युते
५२ अवध्याश्चस्त्रियःप्राहुस्तिर्यग्योनिगतेष्वपि सत्वेषुपृथिवीपालनधर्मंत्यक्तुमर्हसि ५३ एवंबहुविधंवाक्यंश्रुत्वाराजामह
हात्मनाःकोपंनिगृह्यधर्मात्मावसुधामिदमब्रवीत् ५४ इतिश्रीमहाभारतेखिलेषुहरिवंशेपंचमोध्यायः पृथुरुवाच एकस्यार्था
यपोहन्यादात्मनोवापरस्यवा बहून्वाप्राणिनोनेकान्भवेन्नस्येहपातकं १ सुखमेधंतिबहवोयस्मिन्स्तुनिहतेसति तस्मिन्हतेऽशु
भेनास्तिपातकंचोपपातकं २ एकस्मिन्यत्रनिधनंप्रापितेदुष्टकारिणि बहूनांभवतिक्षेमंतत्रपुण्यप्रदोवधः सोहंप्रजानि
मित्तंत्वांहनिष्यामिवसुंधरे यदिमेवचनान्नाद्यकरिष्यसिजगद्धितं ३ त्वांनिहत्याद्यबाणेनमच्छासनपराङ्मुखीं आत्मानंप्रथ
यित्वाहंप्रजाधारयिताचिरं ४ सात्वंशासनमास्थायममधर्मभृतांवरे संजीवयप्रजाःसर्वाःसमर्थाह्यसिधारणे ५ दुहितृत्वं
चमेगच्छततएनमहंशरं नियच्छेयंत्वद्वधार्थमुद्यतंघोरदर्शनं ६ वसुधरोवाच सर्वमेतदहंवीरविधास्यामिनसंशयः उपायतः
समारब्धाःसर्वेसिध्यंत्युपक्रमाः ७ उपायंपश्ययेनत्वंधारयेथाःप्रजाइमाः वत्संतुममतंपश्यक्षरेयंयेनवत्सला ८ समांच
कुरुसर्वत्रमांत्वंधर्मभृतांवर यथाविष्यंदमानंमेक्षीरंसर्वत्रभावयेत् ९ ॥ः॥ः॥ः॥ः॥ः॥ः॥ः॥

तेनशैलोपशैलेलंस्याप्रयानाशैलाः विवृद्धिंप्रापिताः इष्टकाभिरिवत् १० १३ सामान्तंवागीशं १४ १६ तदावैन्येनभूमेर्दोहनात्प्राक् १७ पृथि

वैशंपायन उ० ततउत्सारयामासशैलान्शतसहस्रशः धनुःकोट्यानृपोवैन्यस्तेनशैलाविवर्द्धिताः १० उपृथुर्वैन्यस्तदाचक्रे
महींराजासमांततः मन्वंतरेष्वतीतेषुवक्रासीद्वसुंधरा ११ स्वभावेनाभवंस्तस्याःसमानिविषमाणिच चाक्षुषस्यांतरेपूर्वमासी
देवंतदाकिल १२ नहिपूर्वविसर्गेवैविषमेपृथिवीतले प्रविभागःपुराणांवाग्रामाणांवातदाभवत् १३ नसस्यानिनगोरक्षंनकृषि
र्नवणिक्पथः नैवसत्यानृतंतत्रनलोभोनचमत्सरः १४ वैवस्वतेंतरेचास्मिन्सांप्रतंसमुपस्थिते वैन्यात्प्रभृतिराजेंद्रसर्वस्यैत
स्यसंभवः १५ यत्रयत्रसमंत्वस्याभूमेरासीत्तदानघ तत्रतत्रप्रजाःसर्वानिवासंसमरोचयन् १६ आहारःफलमूलानिप्रजा
नामभवत्तदा कृच्छ्रेणमहतानित्यमित्येवमनुशुश्रुम १७ संकल्पयित्वावत्संतुमनुंस्वायंभुवंप्रभुं स्वपाणौपुरुषव्याघ्रोदुदोह
पृथिवींततः १८ सस्यजातानिसर्वाणिपृथुर्वैन्यःप्रतापवान् तेनान्नेनप्रजास्तातवर्त्ततेद्यापिसर्वशः १९ ऋषिभिःश्रूय
तेचापिपुनर्दुग्धावसुंधरा वत्सःसोमोभवत्तेषांदोग्धाचांगिरसःसुतः २० बृहस्पतिर्महातेजाःपात्रंछंदांसिभारत
दोहमासीत्तुपयंतपोब्रह्मचशाश्वतं २१ पुनर्देवगणैःसर्वैःपुरंदरपुरोगमैः कांचनंपात्रमादायदुग्धेयंश्रूयतेमही २२

वींपृथिवीतःसस्यजातानिव्रीह्यादीनिदुदोहप्रतीतवान् १८ सोमःब्राह्मणराजत्वात्वत्सः २० छंदांसिवेदाः तदुहितत्पेभूतंतपोब्रह्मचकृच्छ्र
चांद्रायणाग्निहोत्रादिकंचशाश्वतंनविहीनीकल्पितं २१ २२

ऊर्जस्वलंश्चमत्तंयक्षिपंहविरित्यपावत् १३ १९ द्विमूर्द्धंतिमपोर्विशेषणां २० तेनचांतर्धानेनतेयज्ञाः वर्त्तयंतिपराशरीमादिप्रपश्चामयज्ञाः

वत्सःकृत्वामघवानासीद्दोग्धाचसविताप्रभुः क्षीरमूर्जस्करंचैवयेनवर्त्तंतिदेवताः २३ पितृभिःश्रूयतेचापिपुनर्दुग्धावसुंधरा
राजतंपात्रमादायस्वधांचामितविक्रम २४ यमोवैवस्वतस्तेषामासीद्वत्सःप्रतापवान् अंतकश्चाभवद्दोग्धाकालोलो
कप्रकालनः २५ नागैश्चश्रूयतेदुग्धावत्संकृत्वातुतक्षकं अलाबुपात्रमादायविषंक्षीरंनरोत्तम २६ तेषामैरावतोदोग्धा
धृतराष्ट्रःप्रतापवान् नागानांभरतश्रेष्ठसर्पाणांचमहीपते २७ तेनतेवर्त्तयंत्युग्रामहाकायाविषोल्बणाः तदाहारास्तद
चारास्तद्वीर्यास्तदाश्रयाः २८ असुरैःश्रूयतेचापिपुनर्दुग्धावसुंधरा आयसंपात्रमादायमायांशत्रुनिबर्हणीं २९ विरो
चनस्तुप्राह्लादिर्वत्सस्तेषांमतस्तदा ऋत्विक्द्विमूर्धादैत्यानांमधुर्दोग्धामहाबलः ३० तयैतेमाययाद्यापिसर्वेमाया
विनोऽसुराः वर्त्तयंत्यमितप्रज्ञास्तदेषाममितंबलं ३१ यक्षैश्चश्रूयतेराजन्पुनर्दुग्धावसुंधरा आमपात्रेमहाराजपु
रांतर्द्धानमक्षयं ३२ वत्सवैश्रवणंकृत्वायक्षैःपुण्यजनैस्तथा तेनतेवर्त्तयंतीहतदेषांपरमंबलं ३३ राक्षसैश्चपिशा
चैश्चपुनर्दुग्धावसुंधरा शावंकपालमादायप्रजाभोक्तुंनराधिप ३४ दोग्धारजतनाभस्तुतेषामासीत्कुरूद्वह वत्सः
सुमालीकौरव्यक्षीरंरुधिरमेवच ३५ तेनक्षीरेणयक्षाश्चराक्षसाश्चामरोपमाः वर्त्तयंतिपिशाचाश्चभूतसंघास्तथैवच ३६

संतोदीवंतीत्यर्थः ३३ प्रजाभोक्तुंसमंतातानितर्पयितुं ३४ ३५ ३६ ॥: ॥: ॥: ॥: ॥: ॥: ॥: ॥:

गंधानसुभिद्रव्याणि ३७ ओषधीज्योतिष्मत्यादिकाः ३९ शैलं शिलामयं ४० ४१ धात्री पाययित्री माता एव पोषणकारी विधात्री

पद्मपात्रे पुनर्दुग्धा गंधर्वैरप्सरोगणैः वत्सं चित्ररथं कृत्वा शुचीनृगंधान्नरर्षभ ३७ तेषां वसुरुचिस्त्वासीद्दोग्धा भरतसत्तम गंध
र्वाणामतिबलो महात्मा सूर्यसन्निभः ३८ शैलैस्तु श्रूयते राजन्पुनर्दुग्धा वसुंधरा ओषधीस्तु मूर्तिमती रत्नानि विविधानि च
३९ वत्सस्तु हिमवानासीन्मेरुर्दोग्धा न संशयः पात्रं तु शैलमेवासीत्तेन शैला विवर्द्धिताः ४० वीरुद्भिः श्रूयते राजन्पुनर्दुग्धा व
सुंधरा पालाशं पात्रमादाय छिन्नदग्धप्ररोहणं दोग्धा तु पुष्पितः शालो वत्सः प्लक्षोऽभवन्नृप ४१ सेयं धात्री विधात्री च पावनी
च वसुंधरा चराचरस्य सर्वस्य प्रतिष्ठा योनिरेव च ४२ सर्वकामदुघा दोग्ध्री सर्वसस्यप्ररोहिणी आसीदियं समुद्रान्ता मेदिनी
ति परिश्रुता ४३ मधुकैटभयोः कृत्स्ना मेदसाभिपरिप्लुता तेनेयं मेदिनी देवी प्रोच्यते ब्रह्मवादिभिः ४४ ततोऽभ्युपगमाद्रा
ज्ञः पृथोर्वैन्यस्य भारत दुहितृत्वमनुप्राप्ता देवी पृथ्वीति चोच्यते ४५ पृथुना प्रविभक्ता च शोधिता च वसुंधरा सस्या
करवती स्फीता पुरपत्तनमालिनी ४६ एवंप्रभावो वैन्यः स राजासीद्राजसत्तम नमस्यश्चैव पूज्यश्च भूतग्रामैर्न संशयः
४७ ब्राह्मणैश्च महाभागैर्वेदवेदांगपारगैः पृथुरेव नमस्कार्यो ब्रह्मयोनिः सनातनः ४८ ॥

तद्रूपीतानात्मन्नुपसंहरति सर्वैः प्रतिष्ठा आश्रयः योनिः नारीक्रमेण उत्पत्तिस्थानं ४२ दोग्ध्री धेनुरूपा ४३ अभ्युपगमात् पुत्रीत्वेनं अं
गीकारात् ४५ पुरं राजधानी पत्तनं महापणिकनगरं ४६ ४७ ४८

५३ वेनांगमथनोत्थत्वमत्र जन्मेति धीधर्मनाशे कृते संतः सत्सु पृथुः पृथग्वधुरितस्तद्दत्तो धीसूंमत्वा क्रांतमनौ वनिश्रियपथः संकल्पवत्साजनाश्चोपात्ते

पार्थिवैश्च महाभागैः पार्थिवत्वमभीप्सुभिः आदिराजो नमस्कार्यः पृथुर्वैन्यः प्रतापवान ४९ योधैरपि च विक्रांतैः प्राप्तुकामैर्जयं यु
धि पृथुरेव नमस्कार्यो योधानां प्रथमो नृपः ५० यो हि योद्धा रणं याति कीर्तयित्वा पृथुं नृपं स घोररूपान्संग्रामान्क्षेमी तरति कीर्ति
मान ५१ वैश्यैरपि च वित्ताढ्यैः पापहीनैर्मनुष्यैः पृथुरेव नमस्कार्यो वृत्तिदाता महायशाः ५२ तथैव शूद्रैः शुचिभिस्त्रिवर्णपरि
चारिभिः पृथुरेव नमस्कार्यो वृत्तिदाता महायशाः ५३ एते वत्सविशेषाश्च दोग्धारः क्षीरमेव च पात्राणि च मया प्रोक्तानि किं
भूयो वर्णयामि ते ५४ इति खिलेषु हरिवंशे पृथिवीदोहो नाम षष्ठोध्यायः जनमेजय उवाच मन्वंतराणि सर्वाणि विस्तरेण त
पोधन तेषां पूर्वविसृष्टिं च वैशंपायन कीर्तय १ यावंतो मनवश्चैव यावंतं कालमेव च मन्वंतराणि तथा ब्रह्मन्श्रोतुमिच्छामि तत्व
तः २ वैशंपायन उ॰ न शक्यो विस्तरस्तात वक्तुं वर्षशतैरपि मन्वंतराणां कौरव्य संक्षेपं त्वेव मे शृणु ३ स्वायंभुवो मनुस्ता
त मनुः स्वारोचिषस्तथा उत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा ४ वैवस्वतश्च कौरव्य सांप्रतो मनुरुच्यते सावर्णिश्च म
नुस्तात भौत्यो रौच्यस्तथैव च ५ ॥ ६ ॥ श्रीरामः ॥ श्रीरामः ॥ श्रीरामः ॥ ॐ ॥

दुदुहुर्यथैवमितरैः मौत्स्यातुष्टीमतां आख्यापिकायामन्वंतरं तात्स्वयंभुपुराणभाजिनात्ति पृथ्वीरीनानि प्रशस्ते पार्थिवनियमनीति ५४ इति नैल
कंठीये हरिवंशभावदीपे पृथूपाख्यानंनामषष्ठप्रकाशः ६

मेरुसावर्णाश्चत्वारः ब्रह्मसावर्णिः रुद्रसावर्णिः मेरु सावर्णिः दक्षसावर्णिश्च एते मेरौ तपः कृत्वा सिद्धिं गता इति सर्वेपि मेरुसावर्णा इत्युच्यन्ते ६ एषांमनूनांपुत्रान्प्रथममन्वंतरागतान् ७ आग्न्यादीनाह मरीचिरिति चतुर्भिः ८ अपरे मरीच्यादि ८ यामे ९ पुत्रइतिनाम १० ११ और्वइतिसा

तथैवमेरुसावर्णाश्चत्वारोमनवःस्मृताः अतीतावर्त्तमानाश्च तथैवानागताश्च ये ६ कीर्त्तितामनवस्तातमयैतेतुयथाश्रुति
ऋषींस्तेषांप्रवक्ष्यामिपुत्रान्देवगणांस्तथा ७ मरीचिरत्रिर्भगवानंगिराःपुलहःक्रतुःपुलस्त्यश्चवसिष्ठश्चसप्तैतेब्रह्मणःसुताः
८ उत्तरस्यांदिशितथाराजन्सप्तर्षयोऽपरे देवाश्चशांतरजसस्तथाप्रकृतयोऽपरेयामानामतथादेवाआसन्स्वायंभुवेंतरे ९
आग्नीध्रश्चाग्निबाहुश्चमेधामेधातिथिर्वसुः ज्योतिष्मान्द्युतिमान्हव्यःसवनःपुत्रएवच १० मनोःस्वायंभुवस्यैतेदशपुत्राम
हौजसः एतत्तेप्रथमंराजन्मन्वंतरमुदाहृतं ११ और्वोवसिष्ठपुत्रश्चस्तंबःकश्यपएवच प्राणोबृहस्पतिश्चैवदत्तोत्रिश्च्यवन
स्तथा १२ एतेमहर्षयस्तातवायुप्रोक्तामहाव्रताः देवाश्चतुषितानामस्मृताःस्वारोचिषेंतरे १३ हविर्ध्रःसुकृतिर्ज्योति
रापोमूर्त्तिरयस्मयः प्रथितश्चनभस्यश्चनभऊर्जस्तथैवच १४ स्वारोचिषस्यपुत्रास्तेमनोस्तातमहात्मनःकीर्त्तिताःपृथि
वीपालमहावीर्यपराक्रमाः १५ द्वितीयमेतत्कथितंतवमन्वंतरंमया इदंतृतीयंवक्ष्यामितन्निबोधनराधिप १६ वसिष्ठ
पुत्राःसप्तासन्वासिष्ठाइतिविश्रुताः हिरण्यगर्भस्यसुताऊर्जानामसुतेजसः १७

दूषत्तुष्टयेनद्वितीयमन्वन्तरागतानाहस्पष्टार्थाः वसिष्ठपुत्रऔर्वनामा १२ १६
वसिष्ठेति येसप्तवसिष्ठपुत्राआसन्सर्वेते तृतीयेमन्वंतरे हिरण्यगर्भपुत्राऊर्जसंज्ञाःसप्तर्षयोमयाप्रोक्ताइतिपूर्वेणान्वयि १७ ॥:॥:॥:॥

कीर्त्यमानान् औत्तमेयान्निबोधेपुत्रोणान्वयः १८ १९ चतुर्थमाहमन्वंतरमिति २० २४ पंचममाहरैवतादिति २५ सोमजःऊर्ध्वबाहुःआत्रेयःसप्तर्षि

ऋषयोत्रमयाप्रोक्ताःकीर्त्यमानान्निबोधमे औत्तमेयान्महाराजदशपुत्रान्मनोरिमान् १८ इषऊर्जस्तनूर्जश्चमधुर्माधवएवच शु
चिःशुक्रःसहश्चैवनभस्योनभएवच १९ भानवस्तत्रदेवाश्चमन्वंतरमुदाहृतं मन्वंतरंचतुर्थंतेकीर्तयिष्यामितच्छृणु २० का
व्यः पृथुस्तथैवाग्निर्जह्नुर्धाताचभारतकपीवानकपीवांश्चतत्रसप्तर्षयोपरे २१ पुराणेकीर्तितास्तातपुत्राःपौत्राश्चभारत स
प्तैतेगणाश्चापितामसस्यांतरेमनोः २२ पुत्रांश्चैवप्रवक्ष्यामितामसस्यमनोर्नृप द्युतिस्तपस्यःसुतपास्तपोमूलस्तपोश
नः २३ तपोरतिरकल्माषस्तन्वीधन्वीपरंतपः तामसस्यमनोरेतेदशपुत्रामहाबलाः २४ वायुप्रोक्तामहाराजचतुर्थंचैतदं
तरं वेदबाहुर्यदुध्रश्चमुनिर्वेदशिरास्तथा २५ हिरण्यरोमापर्जन्यऊर्ध्वबाहुश्चसोमजः सत्यनेत्रस्तथात्रेयएतेस
प्तर्षयःपरे २६ देवाश्चाभूतरजसस्तथाप्रकृतयोपरे पारिप्लवश्चरैभ्यश्चमनोरंतरमुच्यते २७ अथपुत्रानिमांस्त
स्यनिबोधगदतोमम धृतिमानव्ययोयुक्तस्तत्वदर्शीनिरुत्सुकः २८ आरण्यश्चप्रकाशश्चनिर्मोहःसत्यवाक्कविः रै
वतस्यमनोःपुत्राःपंचमंचैतदंतरं २९ षष्ठंतेसंप्रवक्ष्यामितन्निबोधनराधिप भृगुर्नभोविवस्वांश्चसुधामाविरजास्तथा
३० अतिनामासहिष्णुश्चसप्तैतेचमहर्षयः चाक्षुषस्यांतरेतातमनोर्देवानिमान्शृणु ३१ ॥

त्रः २६ तथाप्रकृतयःअभूतरजःस्वभावाः पारिप्लवोरैभ्यश्चदेवतागणविशेषो २७ २८ २९ षष्ठंतरमिति ३० ३१ ॥ ॥

आद्यादयः पंचदेवगणाः दिवौकस इति सर्वेषां विशेषणं आद्याइत्यत्रालाआप्याइति गौडाः पठंति ३२ नड्वलायाः पुत्रा नाड्वलेयाः ३३ सप्तमं वैव
स्वतमन्वंतरमाह अत्रिरिति ३४ ३७ प्राग्दिशः पूर्वकल्पप्रकाराः सप्तसप्तकाः एकोनपंचाशन्मरुतो देवाः प्रयुक्ता अपि प्रांतमन्वंतरे भवंतीति शेषः ३८

आद्याः प्रभूता ऋभवः पृथग्भावा दिवौकसः लेखाश्च नाम राजेंद्र पंच देवगणाः स्मृताः ऋभोरंगिरसः पुत्रा महात्मानो महर्षयः ३२
नाड्वलेया महाराज दश पुत्रास्तु विश्रुताः उरुप्रभृतयो राजन्षष्ठमन्वंतरे स्मृते ३३ अत्रिर्वसिष्ठो भगवान्कश्यपश्च महानृषिः
गौतमश्च भरद्वाजो विश्वामित्रस्तथैव च तथैव पुत्रो भगवानृचीकस्य महात्मनः सप्तमो जमदग्निश्च ऋषयः सांप्रतं दिवि ३४ साध्या
विश्वे च रुद्राश्च वसवो मरुतस्तथा आदित्याश्चाश्विनौ चैव देवौ वैवस्वतौ स्मृतौ ३५ मनोर्वैवस्वतस्यैते वर्त्तंते सांप्रतं ततो इक्ष्वा
कुप्रमुखाश्चैव दश पुत्रा महात्मनः ३६ एतेषां कीर्त्तितानां तु महर्षीणां महौजसां राजन्पुत्राश्च पौत्राश्च दिक्षु सर्वासु भा
रत ३७ मन्वंतरेषु सर्वेषु प्राग्दिशः सप्तसप्तकाः स्थिता लोकव्यवस्थार्थं लोकसंरक्षणाय च ३८ मन्वंतरे व्यतिक्रांते चत्वारः
सप्तका गणाः कृत्वा कर्म दिवं यांति ब्रह्मलोकमनामयं ३९ ततोऽन्ये तपसा युक्ताः स्थानमापूरयंत्युत अतीतावर्त्तमा
नाश्च क्रमेणैतेन भारत ४० एतान्युक्तानि कौरव्य सप्तातीतानि भारत मन्वंतराणि सर्वाणि निबोधानागतानि मे ४१

तेषां मध्ये चत्वारः सप्तका अष्टाविंशतिर्महतः मन्वंतरसमाप्तौ क्रममुक्तिं परं ब्रह्म स्थानं प्राप्नुवंति ३९ ततोऽन्ये यजमानाः तपोबलान्मन्वंतरांतरे तत्सम
माहृत्य स्थानं पूरयंतीति तेन सप्तसप्तकाः सर्वत एवं प्रतिमन्वंतरं शेषं एतेन कर्मिणामपि पुरंधरपाप्यमुक्तिरस्तीति दर्शितं ४० सप्तातीतानि एकं चानागतमित्यष्टा
वुक्तानीति द्रष्टव्यं अनागतानि षट् मे मत्तः निबोध बुध्यस्व ४१

ह·टि·
२५

सावर्णाः पंचतेषुमेकोवैवस्वतउक्तः ४२ परमेष्ठीसुताइतिनामैकदेशस्यापिविशेषणंप्रजापतेरितिलुप्तविभक्तिकंवापरमेष्ठिपदंद्रष्टव्यं ४३ तेषांचतुर्णा
मपिमेरुसावर्णित्वेयोगमाहमहतेति यतोमेरौतपश्चक्रुस्ततोमेरुसावर्णास्तेजाताइत्यर्थः ४४ समेरुमहर्षयः प्रोक्तमन्वंतरमितिशेषः ४५ अष्टमेमाहमनो

सावर्णामनवस्तातपंच तांश्चनिबोधमे एकोवैवस्वतस्तेषांचत्वारस्तुप्रजापतेः ४२ परमेष्ठिसुतास्तातमेरुसावर्णतांगताः दक्षस्यैतेहि
दौहित्राः प्रियायास्तनयानृप ४३ महातपसायुक्तामेरुपृष्ठेमहौजसः रुचेःप्रजापतेःपुत्रोरौच्योनाममनुःस्मृतः ४४ भूत्यांचोत्पादितो
देव्यांभौत्योनामरुचेःसुतः अनागतास्तुसप्तैतेस्मृताइहमहर्षयः ४५ मनोरंतरमासाद्यसावर्णस्येहतान्शृणु रामोव्यासस्तथात्रेयो
दीप्तिमानितिविश्रुतः ४६ भारद्वाजस्तथाद्रौणिरश्वत्थामामहाद्युतिः गौतमस्यात्मजश्चैवशरद्वान्गौतमःकृपः ४७ कौशिकोगाल
वश्चैवरुरुःकाश्यपएवच एतेसप्तमहात्मानोभविष्यामुनिसत्तमाः ४८ ब्रह्मणःसदृशाश्चैतेधन्याःसप्तर्षयस्थिताः अभिजात्या
चतपसामंत्रव्याकरणैस्तथा ४९ ब्रह्मलोकप्रतिष्ठास्तुस्मृताब्रह्मर्षयोमलाः भूतभव्यभवज्ज्ञानंबुद्ध्वाचैवस्वयंप्रभं ५० तपसातुप्र
सिद्धायेसंगताःप्रवृत्तिचिंतकाः मंत्रव्याकरणाद्यैश्चऐश्वर्यात्सर्वशस्तुये ५१ आद्याःप्रवृत्तधर्माणोगोत्रप्रावर्तकास्तथा कृतादि
युगाख्येषुसर्वेष्वेवपुनःपुनः ५२ प्रवर्तयंतितेवर्णान्नाश्रमांश्चैवसर्वशः सप्तर्षयोमहाभागाःसत्यसत्वपरायणाः ५३ तेषांचैवा
न्वयोत्पन्नाजायंतीहपुनःपुनः मंत्रब्राह्मणकर्तारोधर्मेप्रशिथिलेतथा ५४ तस्मादुदाहृताःसर्वेपर्यायपरस्परताः तस्मात्तुकालेनवयः
प्रमाणमृषिभावने तेनपारंपसावर्णान्भविष्यान्शृणुभारत ५५ धृतिवांश्चाश्रीवांश्चसम्मतोधृतिमान्वसुः वीरत्युगीर्योधृष्टश्चना
नःसुमतिर्वसु ५६ सावर्णस्यमनोःपुत्राभविष्यादशभारत अपरमेरुसावर्णस्तात्रस्यामिनुर्निरूपिताः ५७ मेधातिथिस्तुपौल
स्त्योवसुःकाश्यपएवच ज्योतिष्मान्भार्गवश्चैवद्युतिमानंगिरास्तथा ५८ सवनश्चैववासिष्ठआत्रेयोहव्यवाहनः पौलहःसप्तइत्येतेमुनयोरो

रिति दीप्तिमानततृतीयः ४६ अश्वत्थामाचतुर्थः कृपःपंचमः ४७ गालवःषष्ठःरुरुःसप्तमः इत्यतीतपदानितेषामेवविशेषणानि ४८ ५८ अपरमेरुसाव
र्णाख्येनवमे ५७ मेधातिथ्यादीनांगोत्राणिपौलस्त्यादीनिराहितत्वइसखेवमनोनामांतरं ५८ अथयपुत्रिकापुत्रेपिदक्षपुत्रस्तुच्यते ५९

६
हरि

ता·म·
२५

पृथुश्रवैकः ५ द्वितीयस्यस्तुतासावर्णस्य हविष्यदादीनांगोत्राणिपौलहादीनि वशिष्ठपुत्राणांशक्त्यादीनांमध्येअष्टमएषुइमेकेअष्टमइतिसंदेहेवाह
सा ५ नभसःनभःसंज्ञस्यअंगिराःपुत्रःसत्योनामसप्तमः अंगनामसइतिपोगादोसःपुत्रोऽगिराइत्युच्यते नभसइतिषष्ठ्येवपुत्रेलब्धेतस्यइत्यंगिरस

देवतानांगणास्तेत्रचयस्यवराधिप दक्षपुत्रस्यपुत्रास्तेरोहितस्यप्रजापतेः ५ मनोःपुत्रोधृष्टकेतुःपंचहोत्रोनिराकृतिः पृथुः
श्रवाभूरिद्युम्नऋचीकोबृहतोगयः ५ प्रथमस्यतुसावर्णेर्नवपुत्रामहौजसः दशमेत्वथपर्यायेद्वितीयस्यान्तरेमनोः ५ हविष्मा
न्पौलहश्चैवसुकृतिश्चैवभार्गवः आपोमूर्तिस्तथात्रेयोवासिष्ठश्चाष्टमःस्मृतः पौलस्त्यःप्रमतिश्चैवनभोगश्चैवकाश्यपः अं
गिरानभसःसत्यश्चैवपरमर्षयः ५ देवतानांगणौद्वौतौऋषिमेतश्चयेस्मृताः मनोःसुतोत्तमौजाश्चकुनिषंजश्चवीर्यवान् ५
शतानीकोनिरामित्रोवृषसेनोजयद्रथः भूरिद्युम्नःसुवर्चाश्चदशत्वेतेमनोःसुताः एकादशेतुपर्यायेतृतीयस्यांतरेमनोः तस्य
सप्तऋषींश्चापिकीर्त्यमानान्निबोधमे ६ हविष्मान्काश्यपश्चापिहविष्मान्यश्चभार्गवः तरुणश्चतथात्रेयोवासिष्ठस्त्वनघ
तथा ६ अंगिराश्चापिधिष्ण्यश्चपौलस्त्योनिश्चरस्तथा पुलहश्चाग्नितेजाश्चभार्गवाःसप्तमहर्षयः ६ त्रयस्तुगणास्तसुरादेवा
गणास्तेषांत्रयःस्मृताः सर्वगःसुशर्मादेवानीकःपुरुद्वहः क्षेमधन्वादृढायुश्चआदर्शःपंडकोमनुः सावर्णस्यतुपुत्रावैतृती
यस्यनवस्मृताः ६ चतुर्थस्यतुसावर्णेर्ऋषीन्सप्तनिबोधमे द्युतिर्वासिष्ठपुत्रश्चआत्रेयःसुतपास्तथा अंगिरास्तपसोमूर्तिस्त
पस्वीकाश्यपस्तथा

स्तावर्ण्यविशेषणात्तस्यवाचौद्वौगणौऋतुनाणोजरमाणोभिमानिनोऽज्यम्यादिधर्मादिऋषिमंतोऽत्रप्रतिपाद्याः
वाः मनोःसुतश्रुतिश्रेष्ठः मनोःसुतइत्येवप्रथमस्यपर्यायेणकरणम् वीर्यवान्तृतीयः अन्यथादशसंख्यापात्रपूर्णैर्निर्मोहःसुतासुतपस्यपुनरुक्तिमधुःसमाधेयाः
स्यात् ५ ततोयस्यहेतुत्वंवर्णितस्य ६ हविष्मान्तौद्वौकाश्यपोभार्गवश्च ६ अंगिराःपुलहःप्रांशुः तद्भूतलाग्न्यादिः ६ नवेतिपित्रासहनवात्तेऽयं

ह०टी०
२६

ह० अध्यायः मन्वंतरस्येति अध्यायः सर्वस्यकालपरिछेददर्शनार्थेः १ ॥ ४४॥ ४४॥ ॥: ॥ ॥: ॥: ॥: ॥: ॥: ॥: ॥:

तपोशनश्च पौलस्त्यः पौलहश्च तपोरविः भार्गवः सप्तमस्तेषां विज्ञेयस्तु तपोधृतिः ६६ पंचदेवगणाः प्रोक्ता मानसा ब्रह्मणा स्मृताः
देववायुरदूरश्च देवश्रेष्ठो विदूरथः ६७ मित्रवान्मित्रदेवश्च मित्रसेनश्च मित्रकृत मित्रबाहुः सुवर्चाश्च द्वादशस्य मनोः सुताः ६८
त्रयोदशे पर्याये भाव्ये मन्वंतरे मनोः अंगिराश्चैव धृतिमान्पौलस्त्यो हव्यपस्तथा पौलहस्तत्वदर्शी च भार्गवश्च निरुत्सुकः
निःप्रकंपस्तथात्रेयो निर्मोहः काश्यपस्तथा ७० सुतपाश्चैव वासिष्ठः सप्तैते —— गुप्तर्षयः त्रयएवगणाः प्रोक्ता देवतानां स्व
यंभुवा ७१ त्रयोदशस्य पुत्रास्ते विज्ञेयास्तु रुचेः सुताः चित्रसेनो विचित्रश्च तपोधर्मरतो धृतः ७२ सुनेत्रः क्षत्रवृद्धिश्च सुत
पा निर्भयो दृढः रौच्यस्यैते मनोः पुत्रा अन्तरे तु त्रयोदशे ७३ चतुर्दशेथ पर्याये भौत्यस्यैवान्तरे मनोः अग्नीध्रः काश्यपश्चै
व पौलस्त्यो मागधस्तथा भार्गवो ह्यतिबाहुश्च शुचिरांगिरसस्तथा ७४ युक्तश्चैव तथात्रेयो शुक्रो वासिष्ठ एव च अ
जितः पौलहश्चैव अन्त्याः सप्तर्षयस्त्वेते ७५ एतेषां कल्पमाप्याथ कीर्तनात्सुखमेधते यशः प्राप्नोति सुमहदायुष्मांश्च भवे
न्नरः ७६ अतीतानागतानां वै महर्षीणां सदा नरः देवतानां गणाः प्रोक्ताः पंचवै भरतर्षभ ७७ तरंगभीरुर्बुध्नश्च तर
स्वानुग्र एव च अभिमानी प्रवीणश्च जिष्णुः संक्रंदनस्तथा ७८ तेजस्वी सबलश्चैव भौत्यस्यैते मनोः सुताः भौत्यस्यैवाधिकारे
तु पर्याप्ते कल्पः संपद्यते ७९ इत्येते नामतोतीता मनवः कीर्तिता मया तैरियं पृथिवी नाना ससमुद्रा सपत्तना ८० पूर्णं युगस
हस्रं तु परिपाल्या नराधिप प्रजाभिस्तपसा चैव संहारस्तेषु भागशः ८१ इति श्रीखिलेषु हरिवंशे मनुवर्णनं नाम सप्तमोध्यायः ज
नमेजय उ० मन्वंतरस्य संख्यानं युगानां च महामते ब्रह्मसर्गात्तु प्रमाणं च वक्तुमर्हसि मे द्विज १

राम:
२६

देवादीनामहोरात्राणि विभजते वैशंपायन उ० अहोरात्रं विभज्य वर्तते इति शेषः । लौकिकं मनुष्यदीर्घं मानवं मनोः पंचाशल्लौकिकमिति संगणनामनु । ह्रा पञ्चपञ्जीवदेवाहोरात्राणां संख्यां शृणु १ अष्टादश निमेषास्तु काष्ठा इत्यस्य मूलं नृपविहसुगणोपि काष्ठा निमेषा दश पञ्च चैवेत्येतावन्मात्रं वक्ष्याम्या दर्शनात् तैर्मुहूर्तैस्त्रिंशताहोरात्रमिति स्फुटोऽस्तु तोऽयम् ३ अहोरात्रलक्षणमाह द्वे इति विपरीतगतयो हश्यमानाचंद्रसूर्ययोर्गतिहेतुर्द्यां तनावधिः

वैशंपायन उ० अहोरात्रं विभजते मानवं लौकिकं परं । तामुपादाय गणनां शृणु संख्यामरिंदम १ निमेषैः पंचदशभिः काष्ठा त्रिंशत्तु ताः कलाः । त्रिंशत्कला मुहूर्तस्तु त्रिंशता तैर्मनीषिणः २ अहोरात्रमिति प्राहुर्ह्रस्वदीर्घं सूर्यगतेर्नृप विशेषेणानुसंवेमु अहोरात्रे च नित्यशः ४ अहोरात्राः पंचदश पक्ष इत्यभिधीयते पक्षौ द्वौ तु स्मृतो मासो द्वौ मासावृतुरुच्यते ५ अब्दं द्व्ययनमुक्तं च अयनं ऋतुभिस्त्रिभिः दक्षिणं चोत्तरं चैव संख्यानार्थं विशारदैः ६ मानेनानेन यो मासः पक्षद्वयसमाहितः पितॄणां तदहोरात्रमिति कालविदो विदुः ७ कृष्णपक्षस्त्वहस्तेषां शुक्लः स्वप्नाय शर्वरी कृष्णपक्षे त्वहः प्राहुः पितृगणा वर्तते नृपः ८ ॥:॥:॥:

णां तावन्तं कालं सर्वेषु मेरोः पार्श्वेषु प्रदेशेषु अहोरात्रे इति शेषः । इत्यनुषज्यते नित्यशब्दात् सार्वदेशिकत्वमेतयोरुक्तं ४ ७ कृष्णेति चंद्रलोकस्थाः पितरः शुक्लपक्षे चंद्रांशान्हीनतया सूर्यं न पश्यंति कृष्णे तु चंद्रस्य सूर्याभिमुख्यात्सान्तानपश्यतीति शुक्लकृष्णपक्षौ तेषां क्रमेण रात्र्यहनी अतएव कृष्णपक्षः सपूर्णिमादिना तेषां रात्रिरूपकत्वादमावास्यामध्याह्नकाल इत्यर्थः ८ ॥७॥ ७॥ ७॥ ७॥ ७॥ ७॥:॥

मानुषेणेतिसार्द्धः मकरादिमिथुनांतं विषुवात्तारंभ्यो ध्रुवेशाकर्षणेनुदितोक्रियमाणो उत्तराभिमुखः सूर्यो मेरुमूर्द्धस्थानं १० देवानां दृश्यो भवतीति तेषां अहर्दिनं कर्कादिधनुरंतं तयोरेव स्थो ध्रुवेशाकृष्यमाणो दक्षिणाभिमुखः सूर्यो देवानामदृश्यो भवतीति तदा तेषां रात्रीति ९ दिव्यमिति देवानां दशभिर्वर्षैर्मनोरहोरात्र एकः दशाभिस्तैः पक्षः दशभिः पक्षैर्मासः १० तैर्द्वादशभिर्मासैः तैः वार्षैः संवत्सरः द्वासप्ततिसहस्राणि दिव्यान्ह्य एकं मनोर्वर्षमित्यर्थः ११

मानुषेणानुमानेन षष्टैर्वत्सरः स्मृतः स्मृतः देवानां तदहोरात्रं दिवा चैवोत्तरायणं दक्षिणायनं स्मृता रात्रिः मासैस्तत्त्वाब्दकोविदैः ९
दिव्यमब्दं दशगुणमहोरात्रं मनोः स्मृतं अहोरात्रं दशगुणं मानवः पक्ष उच्यते १० पक्षो दशगुणो मासो मासैर्द्वादशभिर्गुणैः मानुषेणा-
ब्दो मनोरुक्तः मानोऽब्दस्तत्त्वार्थदर्शिभिः ११ मनुद्वयेन कल्पेन तदेव चत्वारि वर्षसहस्राणि वर्षाणां तु कृतं युगं तावच्छतीश्च वै संध्या
संध्यांशश्च तथाविधः १२ त्रीणि वर्षसहस्राणि त्रेतास्याच्छतीसमाः तत्पादत्रिशती संध्या संध्यांशश्च तथापरः १३ तथा वर्षस-
हस्रे द्वे द्वापरं प्रकीर्तितं तस्यापि द्विशते संध्या संध्यांशश्च तथाविधः १४ कलिर्वर्षसहस्रं तु संख्यातो ऋषिभिः तस्यापि
शतिका संध्या संध्यांशश्च तथाविधः १५ एषा द्वादशसाहस्री युगसंख्या प्रकीर्तिता दिव्येन मानेन युगं संख्या निबोध मे १६
कृतं त्रेता द्वापरं च कलिश्चैव चतुर्युगं प्रोक्तं तदेकसप्तत्या गुणितं नृपसत्तम १७ ॥:॥:॥:॥:॥:॥:

संध्यांशांतः संध्यांशस्तस्य पूर्वापरौ भागौ १२ १५ द्वादशसाहस्री वर्षाणां युगमित्युच्यते १६ युगपर्यायमाह कृतमिति चतुर्युगीयुगशब्दार्थः तत्र युगं एक-
सप्तत्या गुणितं किंचिदधिकं मन्वंतरं प्रोक्तं सहस्रस्य चतुर्दशांशत्वात् १७ ॥:॥:॥:॥:॥:॥:॥:॥:॥:॥:॥:॥:॥:॥:॥:॥

एतावतः कालस्यांते मनोर्ब्रह्मलोकं गमनेनादर्शनं भवतीति तदेव स्थापनमित्युच्यते तस्यापि मनोः द्वे स्थापने भवतः पूर्वं प्रमाणं अपभावः इतः पूर्वं धूमादिमार्गेणागतादेवलोकं प्राप्याधिकारं निर्वर्त्य तदंते अधः पतनं मतो गौणं उत्तरायणमार्गेण ब्रह्मलोके गच्छतीति तथा चोक्तं आधिकारिकान् प्रकृत्य महर्लोकं मे दिवं यांति ब्रह्मलोकं सनातनमिति १८ अपरः लीनस्य मनोः यथा गमनकालेन मासेन पक्षस्याप्येमसाति १९ समनीतेषिति सार्द्धः अनेनैव क्रमेणान्यनेकेषु मनुष्वतीतेषु मन्वन्तरमाणा ब्रह्मणः संवत्सराः प्रोक्तः किंपदुमिन्वतौः संवत्सराः पूर्यंतद्ब्रह्मतेदेशेति अयुतमन्वन्तराणि ब्रह्मणोऽहोरात्रमुक्तं तदु

मन्वन्तरमिति प्रोक्तं संख्यानार्थविशारदैः अयनं चापि तत्प्रोक्तं द्व्ययनेदक्षिणोत्तरे १८
मनुः प्रलीयते यत्र समामेवायनेऽभयोः ततोऽपरो मनुः कालमेतावंतं भवत्युत १९ स
मतीतेषु गतेष्वेव प्रोक्तः संवत्सरः सवै तदेव चायुतं प्रोक्तं मुनिना तत्त्वदर्शिना २० ॥

पातेन अहरपि ब्रह्मणः कल्पस्य कथ्यत इति योजना अयंभावः षष्ट्यधिकशतत्रयं संवत्सरस्यांशाः प्रत्यंशं चतुर्दश मनवः तेन चतुर्दशाभिर्गुणितं षष्ट्यधिकशतत्रयं चत्वारिंशदधिकं सहस्रपंचकं मनूनामहो भवतीति तावानेव च कालो रात्रिरिति अशीत्यधिकमयुतं मनवः ब्रह्मणोऽहोरात्रे भवति अत्र चांशानां दिनानि किंचिदधिकानि परं च वर्द्धते तानि संत्यज्य अहोषष्ट्यधिकशतत्रयेणाद्यावंतोंशाः मनूनामयुतेन पूर्यंते तावान् ब्रह्मणोऽहोरात्रमर्द्धं चाहारिति २० ॥::॥:::॥०

२१ युगसहस्रे चतुर्युगसहस्रे २२ २५ संहारसंभवयोर्यायांश्चांतरं विच्छेदो ब्रह्मणस्तु वक्तुमशक्यं तत्तानं विना च न धाराविच्छेदोऽस्तीति भावः २६ प्रजानां ज
युगादीनां सृष्टिसंहारौ मन्वंतरेषु चतुर्दशस्वपि न यथा मध्ये उपरतो भवत २७ शेषः स्थूलभूतानि तत्संहिताद्देवः क्लिष्टं नितरां हेतुस्तपसेति २८ निःशेषत्वमेवा

ब्रह्मणस्तदहः प्रोक्तं कल्पश्चेति स कथ्यते सहस्रयुगपर्यंता या निशा प्रोच्यते बुधैः २१ निमज्जत्यप्सु यत्रोर्वी सशैलवनकानना त-
स्मिन्युगसहस्रे तु सर्वाभरतसत्तम २२ ब्रह्मणो दिवसपर्यंते कल्पोऽनिःशेष उच्यते युगानि सप्ततिस्तानि साग्राणि कथितानि ते २३
कृतत्रेतादियुक्तानि मन्वंतरमुच्यते चतुर्दशैते मनवः कीर्तिताः कीर्तिवर्धनाः २४ वेदेषु सपुराणेषु सर्वेषु प्रभविष्णवः प्रजा-
नां पतयो राजन्धर्मसेयाश्च कीर्तनं २५ मन्वंतरेषु संहाराः संहारांतेषु संभवाः न शक्यमंतरं तेषां वक्तुं वर्षशतैरपि २६ वि-
सर्गस्य प्रजानां च संहारस्य च भारत मन्वंतरेषु संहाराः श्रूयंते भरतर्षभ २७ सशेषास्तत्र तिष्ठंति देवाः सप्तर्षिभिः सह तप-
सा ब्रह्मचर्येण श्रुतेन च समाहिताः २८ पूर्णे युगसहस्रे तु कल्पो निःशेष उच्यते तत्र सर्वाणि भूतानि दग्धान्यादित्यते-
जसा २९ ब्रह्माणमग्रतः कृत्वा सहादित्यगणैर्विभुं प्रविशंति सुरश्रेष्ठं हरिं नारायणं प्रभुं ३० यः स्रष्टा सर्वभूतानां क-
ल्पांतेषु पुनः पुनः अव्यक्तः शाश्वतो देवस्तस्य सर्वमिदं जगत् ३१ ॥:॥:॥:॥:॥:॥:॥:॥

ह गच्छंतीति २९ आदित्याश्चापि सर्वेषां दहनानंतरं तत्र स्वात्मानमुपसंहृत्य ब्रह्मणा सह विभुं प्रविशंति तेन स्थूलानां दाह्यत्वमेव न सूक्ष्माणां नाशो दर्शितः ३०
३१ ॥:॥:॥:॥

अं पंचभूतलयः सृष्टिसमहशरस्माहात्मेमासि ३२ ३४ देवानांसूर्याहीनांचतुरादीनांचब्रह्मांडेपिंडेचतात्म्येनकिंचिद्दृष्टंदृश्यतेकेवलंविपर्ययः दर्शनानांअवर्णनैः
महाविपर्ययाम [illegible]मवास्थास्याप्यात्रापिसर्वः ३६ दग्धानिपूर्वंनाशमनतानिदेवादयस्तुपापानिसोलीनाः संतःपुनर्जायंते ३७ अनुलिंगानिशीतोष्णदृष्ट्यादी
नि ३८ निष्क्रामितानारायणात्निष्क्रम्यरूपस्यप्रजाकाराः प्रजाकर्तारःपुनर्भूतानिसहजेशचचतुर्थेनसंबंधः किंसर्वोगामृता अविशेषेणापुनरु

तत्रसंवर्ततेरात्रिःसकलेकालोभवत्तदा नारायणोदरीनिद्रांजातोवर्षसहस्रकं ३२ तांततमितिकालंतुरात्रिंतत्वभिशाश्वतानिद्रायोग
मनुभावेनाप्यस्मिन्पितामहः ३३ सैषारात्रिःप्रक्रांतासहस्रयुगपर्यया तदाप्रबुद्धोभगवान्ब्रह्मालोकपितामहः ३४ पुनःसिसृ
क्षयायुक्तःसर्वाण्यानिदधेमनः सैवप्रकृतिःपुराणापनहूतंतद्विचेष्टिते ३५ देवस्यानानिनामानिकेवलंचविपर्ययः ततोदग्धानिभूतानि
सर्वाण्याविशस्राशिभिः ३६ देवर्षिपक्षगंधर्वपिशाचोरगराक्षसाः जायंतेचपुनस्तातयुगेभरतसत्तम ३७ पथ्यर्गाद्यन्नुलिंगानि
नानारूपाणिपर्यये दश्यंतेतानितान्येवतथाब्राह्मीषुरात्रिषु ३८ निष्क्रमिताप्रजाकाराः प्रजापतिरसंशयं पेचैवमानवा
देवाःसर्वेचैवमहर्षयः ३९ तेसंगताःशुद्धसंगाःशश्वद्धर्मेविहागतिः नभवंतिपुनस्तातयुगेभरतसत्तम ४० ॥ ः॥ः

ज्ञातेनेताहयेचेतिसार्द्धेन ४९ शुद्धेनब्रह्मणामहसंगएकीभावेनगतिर्येषांतेतत्वविदः शुद्धसंगाः शुद्धसत्वेहेतुःशाश्वदिति शश्वद्धर्मःस्वाभाविकोगुणो
देहादिष्वात्मबुद्धिः तस्याविसर्गतत्यागात्पुनर्नभवंतिअन्येतुन विष्णुमायामात्रापिमोहकत्वकाप्यनयनाभावाज्जायंतइत्यर्थः ४० ॥ः॥ः॥ः
श्रीरामः॥ः॥ श्रीरामः॥ः॥ ॥ः॥ श्रीः

तत्सर्वं तत्प्रकाराद्युगसंख्याने ४१ ४२ व्यक्ताव्यक्तः स्थूलसूक्ष्मरूपः तस्य मनोः तद्वंशस्य मनोः विसर्गं कीर्तयिष्यामीत्यनुषंगेण संबंधः ४३ ४४ यत्र हृ
ष्णिवंशे ४५ इति अष्टमः वैवस्वतस्य मनोः विसर्गं कीर्तयिष्यामीत्युक्तं तदेवाह विवस्वानित्यादिना दाक्षायण्यां दक्षकन्यायां अदित्यां त्वाष्ट्री त्वष्टुः पुत्री १ सु

तत्सर्वं रूपयोगेन कालसंख्याविभागवित् सहस्रयुगसंख्यानं कृत्वा दिवसमीश्वरः ४१ रात्रिं युगसहस्रांतां कृत्वा तु भगवान्
विभुः संहारार्थं भूतानां समवस्थेव पुनः पुनः ४२ व्यक्ताव्यक्तो महादेवो हरिर्नारायणः प्रभुः तस्य ते कीर्तयिष्यामि मनोर्वैवस्व
तस्य ह ४३ विसर्गं भारतश्रेष्ठ सांप्रतस्य महाद्युतेः वृष्णिवंशप्रसंगेन कथ्यमानं पुरातनं ४४ यत्रोत्पन्नो महात्मा स हरिर्वृष्णि
कुले प्रभुः सर्वासुरविनाशाय सर्वलोकहिताय च ४५ इति खिलेषु हरिवंशे मन्वंतरानुकीर्तनं नामाष्टमोध्यायः ८ वैशंपाय
न उवाच विवस्वान् कश्यपाज्जज्ञे दाक्षायण्यां परंतप तस्य भार्याभवत् संज्ञा त्वाष्ट्री देवी विवस्वतः १ सुरेणुरिति वि
ख्याता त्रिषु लोकेषु भामिनी सा वै भार्या भगवतो मार्तंडस्य महात्मनः २ भर्तृरूपेण नातुष्यद्रूपयौवनशालिनी
संज्ञा नाम सुतपसा दीप्तेनेह समन्विता ३ आदित्यस्य हि तद्रूपं मंडलस्य तु तेजसा गात्रेषु प्रतिदग्धं वै नातिकांतमि
वाभवत् ४

रेणुरिति संज्ञापर्यायनामांतरं भामिनी कोपना भाविनीति पाठे प्रबुद्धचित्ता २ दीप्तेन अत्युष्णेन तद्रूपेण ३ तद्रूपं तस्याः संज्ञायाः रूपं मंडलस्य तेज
सा गात्रेषु दग्धं ४ ॥०॥ ॥ ॥

दृष्टेहेतुमाहनखल्वितिद्वाभ्यांमित्रार्थंअज्ञानेनदुःखेनगर्भेगोमृताभवत्तत्सौऽग्रेमिस्ताममयघ्नमीत्यदितिः शमानदतामर्थंपुत्रयनामितिःऽस्त्रुलाव्याकुलामदि
तिप्रतिभार्यात्स्नेहात्कश्यपः स्वसाभ्यषातनुपशापनिवार्यअभाषत अपंखलुइतिमियुवेननमृतः अपितुऽस्थयत्वात्तोत्तिसभाद्दिहितोरज्ञानात्मप्ममश्चांडेन
तमितिप्तवंरूपानविप्रोतज्ञानात्अयंमांतेऽइशुख्यतेन तंअडमस्येतिअंस्तेऽनत्साज्ज्ञालोमात्तेडः शक्तंध्वादितिास्परहप ५ तेजऽइतितरयवंकश्यपमाह्यस्माज्जो

नखल्वयंमृतोंडस्थइतिस्नेहादभाषत अज्ञानात्काश्यपस्तस्मान्मार्तंडइतिचोच्यते ५ तेजस्त्वभ्यधिकंतातनित्यमेवविव
स्वतः येनातितापयामासत्रीन्लोकान्कश्यपात्मजः ६ त्रीण्यपत्यानिसोरव्यसंज्ञायांतपतांवरः आदित्योजनयामासकन्यां
द्वौचप्रजापती ७ मनुर्वैवस्वतः पूर्वंश्राद्धदेवः प्रजापतिः यमश्चयमुनाचैवयमजौसंबभूवतुः ८ साविवर्णंतुतद्रूपंदृष्ट्वासंज्ञा
विवस्वतः असहंतीचस्वांछायांसवर्णांनिर्ममेततः ९ मायामयीतुसासंज्ञातस्याःछायासमुत्थिता प्रांजलिः प्रणताभूत्वा
छायासंज्ञांनरेश्वर १० उवाचकिंमयाकार्यंकथयस्वशुचिस्मिते स्थितास्मितवनिर्देशेशाधिमांवरवर्णिनि ११ संज्ञोवाच
अहंयास्यामिभद्रंतेस्वमेवभवनंपितुः त्वयेहभवनेमह्यंवस्तव्यंनिर्विकारया १२ ॥:॥:॥: ॥: ॥: ॥: ॥:

वितोजिते अपीसंज्ञांप्रतिसात्रिधाद्रसंतंतापयामासेतिभावः ६ ७ प्रजापतीव्याहमनुरितिमनुः श्राद्धदेवाख्योयमश्च यमजौयमलौ ८ विवर्णोविषम
वर्णः सहाकारं स्वांछायांस्वस्यप्रतिमांसवर्णांसमानरूपां ९ छायासंज्ञांउवाचेतिसंबंधः १० शाधिआज्ञापय ११ मह्यंमम १२ ॥:॥:॥
श्रीः॥ श्रीः॥:॥ श्रीः॥:॥ श्रीः॥:॥

तेतया इदंमन्मक्षसंभगवन्नेतत्त्वोय १३ नुम्यंतव १४ ब्रीडितेवलज्जितेवयतस्तपस्विनी आलोचनवती अनाकारिता याममइह गमनंभर्तुस्त्यागस्त्रा की
र्तिकरइत्याशयः १५ १६ आच्छाद्यगोपयित्वा १७ १८ पूर्वस्यभ्रातुः समानवर्णो सावर्णसंज्ञा वर्णाद्र्यनुज्ञोनतुसवर्णाया अपत्यत्वादिसमर्थः १९ पृथिवीमि

इमौचबालकौमह्यंकन्याचेयंसुमध्यमा संभाव्यास्तेनचाख्येयमिदंभगवतेत्वया २३ छायोवाच आकचग्रहणाद्देवि आशा
पान्नैवकर्हिचित आख्यास्यामिमतंतुभ्यंगच्छदेवियथासुखं २४ वैशंपायन उ॰ समाश्वास्यसवर्णांतांतथेत्युक्ताचसातया
त्वष्टुः समीपमगमद्व्रीडितेवतपस्विनी २५ पितुः समीपगासातुपित्रानिर्भर्त्सितातदाभर्तुः समीपंगच्छेति नियुक्ताचपुनःपुनः
२६ अगच्छद्वडवाभूत्वाछाद्यरूपमनिंदिता कुरूनथोत्तरान्गत्वातृणान्येवचचारह २७ द्वितीयायांतुसंज्ञायांसंज्ञेयमितिचि
तयन् २८ आदित्योजनयामासपुत्रमात्मसमंतदा पूर्वजस्यमनोस्तातसदृशोयमितिप्रभुः २९ मनुरेवाभवन्नाम्नासावर्णि
रितिचोच्यते द्वितीयोयःसुतस्तस्याःसविज्ञेयःशनैश्चरः ३० संज्ञातुपार्थिवीतातस्वस्यपुत्रस्यवैतदा चकाराभ्यधिकं
स्नेहंनतथापूर्वजेषुवै ३१ मनुस्तस्याक्षमत्तत्तुयमस्तस्यानचक्षमे तांरोषाच्चबाल्याच्चभावितोर्थस्यगौरवात् पदासंतर्ज
यामाससंज्ञांवैवस्वतोयमः ३२ तंशशापततःक्रोधात्सावर्णिजननीनृप चरणःपततामेषतवेतिभृशदुःखिता ३३

चिंतयन्सूर्यएवसंज्ञाख्यातस्याइयंमतिः पार्थिवीद्वितीयासंज्ञा अन्येतुछायानिपतितदृष्टिव्याउस्थितत्वात्पार्थिवीत्याहुः २० तस्याःमनुःक्षमतत्ताम
वान् आर्षत्वाद्भावादिसाधुः २१ २३ ॥ ॥ श्रीः ॥ ॥ श्रीः ॥ ॥ ॥ ॥

मतोर्दितः क्षपितः क्लिन्नित इतिपाठेतापितः २४ २५ बुभूषति भूषयितुमिच्छति २६ २७ २८ अभ्यधिकः स्नेहः कनीयसि ३१ संज्ञा हस्तं परिहरंती गूहमाना सु

यमस्तत्ततः पितुः सर्वं प्रांजलिः प्रत्यवेदयत् प्रशोशाय मनोद्विग्नः संज्ञावाक्यमतोर्दितः शापो मे विनिवर्तेत प्रोवाच पितरं तदा मात्रा स्ने
हेन सर्वेषु वर्तितव्यं सुतेषु वै २५ सेयमस्मानपास्याद्य यवीयांसं बुभूषति तस्यां मयोद्यतः पादो न तु देहे निपातितः बाल्याद्वा यदि वा मो
हात्तद्भवान् क्षंतुमर्हति २६ शप्तोहमस्मिंलोके शजनन्या तपतां वर तव प्रसादाच्चरणो न पतेन्मम गोपते २७ विवस्वानुवाच अ
संशयं पुत्र महद्भविष्यत्यत्र कारणं येन त्वामाविशत्क्रोधो धर्मज्ञं सत्यवादिनं २८ अशक्यमन्यथा कर्तुं मया मातृवचस्तव कृमयो मां
समादाय यास्यंति धरणीतलं तव पादान्महाभाग ततः संप्राप्स्यसे सुखं २९ कृतमेवं वचः सत्यं मातुस्तव भविष्यति शापस्य प
रिहारेण त्वं च त्रातो भविष्यसि ३० आदित्यो थाब्रवीत्संज्ञां किमर्थं तनयेषु वै तुल्येष्वभ्यधिकः स्नेहः क्रियते तु पुनः पुनः ३१
सा तत्परिहरंती स्म नाचचक्षे विवस्वतः आत्मानं स समाधाय योगात्तथ्यमपश्यत ३२ तां शप्तुकामो भगवान्नाशाय कुपितं रवि
मूर्धजेषु निजग्राह समयेति गते तु सा ३३ ततः सर्वं यथावृत्तमाचचक्षे विवस्वतः विवस्वानथ तच्छ्रुत्वा क्रुद्धस्त्वष्टारमभ्ययात् ३४

समाधाय सुस्थिरं कृत्वा योगात् ध्यानात् ३२ समये आकेशग्रहणात् आशापादैर्नैतत्प्रकाशयिष्यामीति नियमे अतिगते अतिक्रांते सति ३३ ३४

श्रीः श्रीः श्रीः श्रीः

राम. ३

ह·टि·
३१

३५ शार्दूलेहरिजिह्वागो ३६ भवान् दृष्ट्वा दूरसाति ३७ हस्तिहस्तेन नागेन्द्रशुण्डादण्डेन परिक्लिष्टां पद्मिनीमिव ३८ ततः प्रहृष्टः करणात्स्थैर्यमतं अघातवहूनं
कांतमनोहरं निवर्तयामि संपादयामीति ३९ तेन स्वर्गात्तु हेमगर्भमूतः संपूर्णः ४० ४१ अर्णिसमापनायोः आरोपयहृपं शान्तपामाससत्त्वरूपकृतवान् पृष्ठमाहेतार्थः

त्वष्टा तु तं पथान्मार्गमचेपि तावि भावसु । निर्दिष्टुकामो येगासां लपामास नैतदा ३५ त्वष्टोवाच नमाति ते समाविष्टमिदं हृपं न शोभ
ते अमहं तीततः संहावेने चानिशौ तुले ३६ दृष्टाहि तं भवानघ्वं सांभार्यां प्रभुभवारितां निसेतपुरस्मितां वहुबाहुपधारिणी ३७
पार्गहा क्रुशां हीना अहिलां मलधारिणी हस्तिहस्तपरिक्लिष्टां व्याकुलां पद्मिनीमिव स्नाप्यां योगवलोपेतां योगमास्थाय पुरोगो
पते ३८ अनुकूलं तु हे वृत्तपादिसान्न मतन्मतं स्पोनिवर्तयामि तत्कांतमारेहम ३९ स्पर्शविभ्रमन्समासेति पेगुर्धमरि
हम तेनासौ समभूतो देवो हपेणानुविभावसुः ४० तस्मात्वष्टुः सर्वेवा कंस्व हुमेनेमन्ता पतेः समनुतामवाम्बाणिपत्वष्ट्र स्पेणसु दृष्टे ४१
ततो प्रभुपं गमात्वष्टामांतेरूपाविवत्सतः भूमिमारोप्य तत्रैनः शांतपामास भारत ४२ ततोनिर्भर्त्सितं हृपंतेअसोमंहृनेनवै कोमा
त्कांततरं दृष्टमपि धेकंप्रभुमेतदा ४३ सुर्वेनिवर्तितं हृपं तस्पदेव स्पणपतेः नहात्मभ्भन्ति देवस्पसुरवमासीनृतोहि ते ४४ सु
स्पाणानुपस्वर्वमांतेरूपसुरवसुते अपतेदितहातहृपेसविहसं भूत्समुवसभवाः ४५ धातार्यमा चमित्रस्च वरुणोशोभगस्तथा
इंद्रोविवस्वान्पूषा च पर्जन्यो हृशमस्तथा ४६ ॥ः ॥ः ॥ः ॥ः ॥ः

घ

राम·

निर्भर्त्सितं भर्त्सितं कृतं अत्रसंहतोनपृथक्कृतेनतेजसा हेतुना संहृतेनेतिस्पष्टार्थं ४३ निर्वर्तितं व्यामणायेणाविकर्षणेनसंयादितं ४४ ४५ ४६

३१

४९ स्वभार्याद्रूपलीलया भार्यायै अनुरूपालीलाश्च स्वरूपेणासंचारहां ५० समभावयत संगतिमकरोत् ५१ विचेष्टंती मैथुनप्रतिकूलां चेष्टां कुर्वाणा ५२

ततस्त्वष्टततोविष्णु(जपन्मोजघमजः हर्षंलेभेततोदेवोहृष्टादिमानसर्वदेहृज्ञान् ४७ गंधैःपुष्पैरलंकारैर्भोस्वजामुकुटेनच एवंसं
म्लप्यामासलब्धावाक्यमुवाचह ४८ गच्छदेवनिजांभार्यांकुरुस्त्रांतिसोत्रान् वृरवाहूपमास्थायवनेचरतिशाद्वले ४९ सतथा
रूपमास्थायस्वभार्याहरिलोलया २२शौयेगमास्थायस्वभार्याविदुवांततः ५० अभूष्यांसर्वभूतानांतेजसानियमेनच सोऽस्व
रूपेणाभूणवान्तांमुरवेसमभावयत ५१ मेथुनायविवेष्टंतीपापुसःपराकृया सांतानिरवमष्टुकेनासिकायाविचक्षणः ५२ देवो
तस्यापनजापेताषस्मिनोभिवनागौ नामसर्वेवहृत्वस्मतोद्वावस्मिनावीत मार्इस्याममनोचेतावष्टमस्यप्रजापतेः ५३ सुतो
पांजनयामासवृडवायामभारत तोनुरूपेणाकोनेनदर्शयामासभास्करः सोनुदृष्टेवभनोतुतोषजनमेजय ५४ यमस्तकर्मणा
तेनभृशंपीडितमानसः धर्मणारंजयामासधर्मोजृद्दमाः प्रजाः ५५ सलेभेकर्मणातेनपरमेशाममहाद्युतिः पितृणामाधिपत्यं
चलोकपालत्वमेवच ५६ मनुःप्रजापतिस्त्वासीत्सावर्णःसतपोधनः भाव्यःसानागतेकालेमनुःसावर्णिकेंतरे ५७ मेरु
पृष्ठेतपोघोरमद्यापिचरतिप्रभुः भ्रातास्यशनैश्चरोस्तत्पश्रहत्वमुपलब्धवान् नासत्योयौसमाख्यातौस्वर्वैद्यौतुबभूवतुः रेवतो
पितथाराज्ञःसंज्ञातोशायतेदोभवत्तलक्ष्यत्तुत्तेजसातेनविस्माक्तुद्रक्रमवत्तेयत् तदंगानिहंतपुंडेदानचानविकोर्षया ५८ य
वीयसीनयोर्यातुयमीकन्यायशस्विनी अभवत्सासरिच्छेष्ठायमुनालोकभाविनी ५९ ॥:॥::॥

पुंसोऽपशंकयाप्युक्तंनिरवमत ५२ ५४ तेनमातृशापजक्लेशेनममाप्येवंमामभूदितिधर्मेणवाप्रपरिहारार्थे ५५ ५८ तपोमेतुयमयोः ५९ ॥:॥

श्रीः॥:॥ श्रीः॥::॥

६० देवानांपमादीनामश्विनोश्च ६१ नवमः मनोः १ नाभागारिष्टस्य नरिष्टइत्यपि तिनाभानेदिष्टं वैमानवमितिश्रुतेः नाभानेदिष्टइति पाठः प्रामादिकः २

मनुरित्युच्यते लोके सावर्णइति चोच्यते द्वितीयोपि पुनस्तस्य मनोर्भ्राता शनैश्चरः ग्रहत्वं स तु लेभे वै सर्वलोकाभिपूजितः ६० य
इदं जन्म देवानां शृणुयाद्वापि धारयेत् आपद्भ्यः स विमुच्येत प्राप्नुयाच्च महद्यशः ६१ इति महाभारते खिलेषु हरिवंशे नवमो
ध्यायः वैशंपायनउ० मनोर्वैवस्वतस्यासन्पुत्रा वै नव तत्समाः इक्ष्वाकुश्चैव नाभागो धृष्टः शर्यातिरेव च १ नरिष्यन्तस्तथा प्रां
शुर्नाभागारिष्टसप्तमाः करूषश्च पृषध्रश्च नवैते भरतर्षभ २ अकरोत्पुत्रकामस्तु मनुरिष्टिं प्रजापतिः मित्रावरुणयो
स्तात पूर्वमेव विशांपते ३ अनुत्पन्नेषु नवसु पुत्रेष्वेतेषु भारत तस्यां तु वर्तमानायामिष्ट्यां भरतसत्तम ४ मित्रावरुणयो
रंशे मनुराहुतिमाजुहोत् तत्र दिव्याम्बरधरा दिव्याभरणभूषिता ५ दिव्यसंहनना चैव इडा जज्ञेति श्रुतिः तामिडेत्येव हो वि
वाच मनुर्दण्डधरस्तदा ६ अनुगच्छस्व मां भद्रे तमिडा प्रत्युवाच ह धर्मयुक्तमिदं वाक्यं पुत्रकामं प्रजापतिं ७ इडोवाच
मित्रावरुणयोरंशे जातास्मि वदतां वर तयोः सकाशं यास्यामि न मां धर्मो हतो वधीत् ८ सैवमुक्त्वा मनुं देवं मित्रावरुण
योरिडा गत्वान्तिकं वरारोहा प्राञ्जलिर्वाक्यमब्रवीत् ९ अंशेऽस्मि युवयोर्जाता देवौ किं करवाणि वां मनुना चाह
मुक्तानुगच्छस्व मामिति १ तां तथा वादिनीं साध्वीमिडां धर्मपरायणां १०

५ इडानाम्नीकन्या दंडधरोराजा भद्रेमांअनुगच्छस्वेतितामिडाप्रत्युवाचेतिपूर्वेणसंबंधः ६ तंमनुंइडाप्रत्युवाचेत्युत्तरेणसंबध्यते ७ ८ ९ १०

११ मानवी इलपदी मैत्रावरुणीति मंत्रलिंगादिडाया उभयसंबंधो घटते तत्राधमाहुस्याववयोरिति १२ द्वितीयमाह मनोरिति १३ ततमित्रावरुणयोर्वाक्यं श्रुत्वा
पितुर्मनोः १४ १७ प्रविष्टे इति मनोस्तर्यमाविष्टपुत्रान् ज्येष्ठाधमकाधिकारेणाते इक्ष्वाकुप्रभृतयो दश मनोः पुत्राः पृथिवीं दशधा विभज्य गृहीतवंतः १८ ॥

विनयपत्र

मित्रश्च वरुणश्चोभावूचतुस्ते निबोध तत् अनेन तव धर्मेण स्वरूपेण इमे न च ११ मसेनैव सुपुत्रोऽणि भीतौ स्वो वरवर्णिनि आवयो-
स्त्वं महाभागे कान्त्या ख्यातिं गमिष्यसि १२ मनोर्वंशधरः पुत्रस्त्वमेव च भविष्यसि सुद्युम्न इति विख्यातस्त्रिषु लोकेषु शोभने १३ उ-
गान्नियो धर्म्मशीला मनोर्वंशविवर्द्धनः निवृत्ता सा तु तच्छ्रुत्वा गच्छंती पितुरन्तिकं १४ बुधेनांतरमासाद्य मैथुनायोपमंत्रिता सोम-
पुत्राद्बुधाद्राजंस्तस्यां जातः पुरूरवाः १५ जनयित्वा सुतं तात पितुः सुगृहमागता सुद्युम्नस्य तु दायादास्त्रयः परमधार्मिकाः उत्क-
लश्च गयश्चैव विनतश्च महावीर्यवान् १६ उत्कलस्योत्कला राजन्विनतस्यापि पश्चिमा दिक्पूर्वा भरतश्रेष्ठ गयस्य तु गया पु-
री १७ प्रविष्टे तु मनौ तात दिवाकरमरिंदम दशधा तद्दधत्क्षत्रमकरोत्पृथिवीमिमां १८ एषां किंज्ञा वसुमती यस्येयं
सवनाकरा इक्ष्वाकुर्ज्येष्ठदायादो मध्यदेशमवाप्तवान् १९ कन्याभावाच्च सुद्युम्नो नैनं गुणमवाप्तवान् वसिष्ठवच-
नात्त्वासीत्प्रतिष्ठाने महात्मनः २० प्रतिष्ठा धर्मराजस्य सुद्युम्नस्य कुलोद्वह तत्पुरूरवसे प्रादाद्राज्यं प्राप्य महायशाः
२१ सुद्युम्नः कारयामास प्रतिष्ठाने नृपक्रियां धृष्टकश्चाम्बरीषश्च दंडश्चेति सुतास्त्रयः २२ ॥

सुद्युम्नएनं गुणं मध्यदेशराज्यं वसिष्ठं तु ग्रहात्तु सुद्युम्नोपि तत्समीपदेशार्धं लेभे तस्माद्वसिष्ठेति प्रतिष्ठाने प्रयागैकदेशे २० २१ नृपक्रियां राज्यं
कारयामास पुरूरवस्समृतः २२ ॥ः॥ः ॥

२३ इंडोपलक्षार्थः २४ नरिष्यन्तनाभागौ मनोः पंचमषष्ठौ पुत्रौ २६ धृष्टेः तृतीयस्य २७ २८ २९ ३० आनर्त्तविषयो द्वारकादेशः कुशस्थली

पस्त्रकामघ्रहात्मावैरंडकारापमुत्तमं वनंतल्लोकविख्याततापसानामनुत्तमं २३ यत्रप्रविष्टमात्रस्तुनरःपापात्प्रमुच्यते
सुद्युम्नश्चादिवयातएलसुताधमात्र २४ मानवेयोमहाराजस्त्रीपुंसोर्लक्षणैर्युतः धृत्वासइलेत्येवंसुद्युम्नश्चातिविश्रुतः
२५ नरिष्यतःशकाःपुत्रानाभागस्यतुभारत अंबरीषोभवत्पुत्रःपार्थिवर्षभसत्तमः २६ धृष्टस्यधार्ष्टकंक्षत्रंरणधृष्टंब
भूवहकरूषस्यतुकारूषाःक्षत्रियायुद्धदुर्मदाः २७ सहस्रंक्षत्रियगणोविक्रांतःसंबभूवह नाभागारिष्टपुत्राश्चक्षत्रियावैश्य
तांगताः २८ प्रांशोरेकोभवत्पुत्रःप्रजापतिरितिविश्रुतः २९ शर्यातेर्मिथुनंत्वासीदानर्त्तोनामविश्रुतःपुत्रःकन्यासुकन्याख्या
यापत्नीच्यवनस्यतु ३० आनर्त्तस्यतुदायादोरेवोनाममहाद्युतिः आनर्त्तविषयश्चासीत्पुरीचास्यकुशस्थली ३१ रे
वस्यरैवतःपुत्रःककुद्मीनामधार्मिकः ज्येष्ठःपुत्रशतस्यासीद्राज्यंप्राप्यकुशस्थलीं ३२ सकन्यासहितःश्रुत्वागांध
र्वंब्रह्मणोंतिके मुहूर्त्तभूतंदेवस्यमर्त्यंबहुयुगंप्रभो आजगामयुवैवाथस्वांपुरींयादवैर्वृतां ३३ कृतांद्वारवतींनामब
हुद्वारांमनोरमां भोजवृष्ण्यंधकैर्गुप्तांवासुदेवपुरोगमैः ३४ ततस्तद्रैवतोज्ञात्वायथातत्त्वमरिंदम कन्यांतांबलदे
वायसुव्रतांनामरेवतीं ३५ दत्वाजगामशिखरंमेरोस्तपसिसंस्थितः रेमेरामोपिधर्मात्मारेवत्यासहितःसुखी ३६
॥इतिखिलेषुहरिवंशेदशमोध्यायः १० ॥ : ॥ :॥ : ॥:

द्वारवती ३१ ३२ युवैवजरादिपरिणामाभावात्
३३ ३४ ३५ ३६ इशमः ॥:॥: ॥ श्रीः श्रीः ॥ॐ:॥ श्रीः श्रीः ॥ :: श्रीः श्रीः ॥

कथमिति तन्मस्वृतः प्राणिनामावश्यंभावात्कथं तयोर्जराया अभावमिति प्रश्नः १ शार्यातेः शर्यातिप्रपौत्रस्य रैवतस्य २ क्षुत्क्षामाहन जरेति जाठराग्नि
मवेत्तु धारयो भवतीति जरा विना तेन प्राणिनां जायते ब्रह्मलोके न पाति तेजो जायन्ते अनेन भवत्येककालः सर्वोहि निर्वर्त्यः ब्रह्मलोकं तु स्यां

जनमेजय उवाच कथं बहुतिथे काले समतीते द्विजोत्तम न जरा रेवतीं प्राप्ता रैवतं च ककुद्मिनं १ मेरुं गतस्य वा तस्य शार्यातेः संततिः
कथं स्थिता पृथिव्यामद्यापि श्रोतुमिच्छामि तत्वतः २ वैशंपायन उ॰ न जरा क्षुत्पिपासे वा न मृत्युर्भरतर्षभ ऋतुचक्रं प्रभवति ब्रह्म
लोके सदानघ ३ ककुद्मिनः स्म तं लोकं रैवतस्य गतस्य ह हृता पुण्यजनैस्तात राक्षसैः सा कुशस्थली ४ तस्य भ्रातृशतं चासीद्धा
र्मिकस्य महात्मनः तद्वध्यमानं रक्षोभिर्दिशः प्राद्रवदच्युत ५ विद्रुतस्य च राजेन्द्र तस्य भ्रातृशतस्य वै तेषां तु ते भयाक्रान्ताः क्ष
त्रियास्तु महीपते अन्ववायस्तु सुमहांस्तत्र तत्र विशांपते ६ येषामेते महाराज शार्याता इति विश्रुताः क्षत्रिया भरत
श्रेष्ठ दिक्षु सर्वासु धार्मिकाः सर्वशः पर्वतगणान्प्रविष्टाः कुरुनंदन नाभागारिष्टपुत्रौ द्वौ वैश्यौ ब्राह्मणतां गतौ करूषस्य
तु कारूषाः क्षत्रिया युद्धदुर्मदाः ८ प्रांशोरेकोऽभवत्पुत्रः प्रजापतिरिति श्रुतः पृषध्रो हिंसयित्वा तु गुरोर्गां जनमेजय ९ शापा
च्छूद्रत्वमापन्नो नवैते परिकीर्तिताः वैवस्वतस्य तनया मनोर्वै भरतर्षभ १० क्षुवतस्तु मनोस्तात इक्ष्वाकुरभवत्सुतः तस्य पुत्रशतं
त्वासीदिक्ष्वाकोर्भूरिदक्षिणं ११ ॥ ॥ श्रीः ॥ श्रीः ॥ ॥ श्रीः ॥ ॥ श्रीः ॥ श्रीः ॥

घमावान्न तत्सूतकाः कालाग्निरुद्रा इत्यर्थः ३७ वैश्यौ वैश्यभार्यासूत्पन्नत्वात् मातृजातयः पुत्राः स्युरिति वचनात् ब्राह्मणतां तपसा तौ गतौ ८ १० क्षु
वतः क्षुतं कुर्वतः ११ ॥ ॥ ॥ ॥ ॥

विकुक्षित्वात् विपुलकुक्षित्वात् अयोधतां अप्रतियोद्धृतां १२ १४ आद्येति एतेनयदर्थंयदुद्दिष्टंतस्मैतत्प्रदायान्नत्वविनियुक्तस्तेनैवद्दोषायभवतीतिदर्शितं
मृगयांगतः मृगयात आगतः १६ इक्ष्वाकुणापरीत्यक्तः इत्युक्तोगाद्वृषः १७ वसिष्ठवचनात् हविर्हि पुरोहितं न पितृयोग्यमित्येवंरूपात् संस्थितेमृते १८

तेषांविकुक्षिर्ज्येष्ठस्तुविकुक्षित्वादयोधतां प्राप्तःपरमधर्मज्ञःसोऽयोध्याधिपतिर्विभो १२ शकुनिप्रमुखास्तस्यपुत्राःपंचश
तंस्मृताः उत्तरापथदेशस्यरक्षितारोमहाबलाः १३ चत्वारिंशत्तथाष्टौचदक्षिणस्यांतथादिशि वसातिप्रमुखाश्चान्येरक्षिता
१ रोविशांपते १४ इक्ष्वाकुस्तुविकुक्षिंवैअष्टकायामथादिशत् मांसमानयश्राद्धार्थंमृगान्हत्वामहाबल १५ श्राद्धकर्मणिचो
द्दिष्टेअकृतेश्राद्धकर्मणि भक्षयित्वाशशंतातशशादोमृगयांगतः १६ इक्ष्वाकुणापरित्यक्तोवसिष्ठवचनात्प्रभुः इक्ष्वाकौ
संस्थितेराजन्शशादःपुरमावसत् १७ शशादस्यतुदायादःककुत्स्थोनामवीर्यवान् इंद्रस्यवृषभूतस्यककुत्स्थोजयतःपु
रा. १८ पूर्वंदेवासुरेयुद्धेककुत्स्थस्तेनसस्मृतः अनेनास्तुककुत्स्थस्यपृथुरानेनसःस्मृतः १९ विष्टराश्वःपृथोःपुत्रस्तस्मा
दार्द्रस्त्वजायत आर्द्रस्ययुवनाश्वस्तुश्रावस्तस्तस्यचात्मजः २० जज्ञेश्रावस्तकोराजाश्रावस्तीयेननिर्मिता श्रावस्तस्य
तुदायादोबृहदश्वोमहायशाः २१ कुवलाश्वःसुतस्तस्यराजापरमधार्मिकः यःसधुंधुवधाद्राजाधुंधुमारत्वमागतः २२
जनमेजयउ० धुंधोर्वधंमहाप्राज्ञश्रोतुमिच्छामितत्वतः यदर्थंकुवलाश्वःसन्धुंधुमारत्वमागतः २३ वैशंपायनउ० बृहदश्व
स्यपौत्राणांशतमुत्तमधन्विनां सर्वेविद्यासुनिष्णाताबलवंतोदुरासदाः २४ ॥ ॥ ॥ ॥

ककुत्स्थः तत्रनिष्ठीतिककुत्स्थः १८ २० श्रावस्तीपुरी २१ २२ २३ २४ ॥ ॥ ॥ ॥

२६ रक्षां यस्याक्षमिति शेषः २७ समेषु सर्वकालप्रभवात्रिम्नोन्नतवर्जितेषु मरुषु निर्जलेषु धन्वसु अल्पोदकेषु उज्जानकः जनसमूहो ज्ञानकं तद्रहित उज्जा

बभूवुर्धार्मिकाः सर्वे यज्वानो बहुदक्षिणाः कुवलाश्वं सुतं राज्ये बृहदश्वो न्यवेशयत् २५ पुत्रसंक्रामितश्रीस्तु वनं राजा समाविशत
तमुत्तंकोऽथ ब्रह्मर्षिः प्रयांतं प्रत्यवारयत २६ उत्तंक उवाच भवता रक्षणं कार्यं तत्तावत्कर्तुमर्हसि निरुद्विग्नस्तपश्चर्तुं न हि शक्नोमि
पार्थिव २७ ममाश्रमसमीपे हि समेषु मरुधन्वसु समुद्रो वालुकापूर्ण उज्जानक इति स्मृतः २८ देवतानामवध्यश्च महाकायो
महाबलः अंतर्भूमिगतस्तत्र वालुकांतर्हितो भवत् २९ राक्षसस्य मधोः पुत्रो धुंधुर्नाम सुदारुणः शेते लोकविनाशाय तप आ
स्थाय दारुणं ३० संवत्सरस्य पर्यंते स निश्वासं प्रमुंचति यदा तदा मही तत्र चलति सशैलवनकानना ३१ तस्य निश्वासवातेन रज उद्धू
यते महत् आदित्यपथमावृत्य सप्ताहं भूमिकंपनं ३२ सविस्फुलिंगं सज्वालं सधूममतिदारुणं तेन तात न शक्नोमि तस्मिन्स्थातुं
स्व आश्रमे ३३ तं मारय महाकायं लोकानां हितकाम्यया लोकाः स्वस्था भवंत्वद्य तस्मिन्विनिहते त्वया ३४ त्वं हि तस्य वधाये
कः समर्थः पृथिवीपते विष्णुना च वरो दत्तो मह्यं पूर्वयुगेऽनघ ३५ यस्त्वं महासुरं रौद्रं तं हनिष्यसि महाबलं तस्य त्वं वरदानेन
तेजस्त्वाप्याययिष्यति ३६ न हि धुंधुर्महातेजास्तेजसाल्पेन शक्यते निर्दग्धुं पृथिवीपाल दिव्यवर्षशतैरपि वीर्यं हि सुमहत्त
स्य देवैरपि दुरासदं ३७ स एवमुक्तो राजर्षिरुत्तंकेन महात्मना कुवलाश्वसुतं प्रादात्तस्मै धुंधुनिवारणे ३८

नकः उज्जालक इति पाठे जलसमूहवर्जितः २८ २९ निर्वाणो विनाशो निमित्तं ३० ३१ ॥ ७ ॥

ह॰टी॰
३५

५४ वालुकार्णवंवालुकापूर्णमुदकमयंवालुकापूर्णमितिगौडाः ५५ ५७ मुखजेनाग्निनातस्यपुत्रशतंदग्धमित्यन्वयः सद्वगासुस्रावस्वदेहजलेनधु

बृहदश्वउवाच भगवन्न्यस्तशस्त्रोहमयंतुतनयोमम भविष्यातिद्विजश्रेष्ठधुंधुमारोनसंशयः ४९ सतंव्यादिश्यतनयंराजर्षिर्धुंधुमारणे
जगामपर्वतायैवतपसेसंशितव्रतः ५० कुवलाश्वस्तुपुत्राणांशतेनसहपार्थिव प्रायादुत्तंकसहितोधुंधोस्तस्यनिबर्हणे ५१ तमा
विशत्तदाविष्णुर्भगवांस्तेजसाप्रभुः उत्तंकस्यनियोगाद्वैलोकानांहितकाम्यया ५२ तस्मिन्प्रयातेदुर्धर्षेदिविशब्दोमहानभूत् ए
षश्रीमानवध्योद्यधुंधुमारोभविष्यति ५३ दिव्यैर्माल्यैश्चतंदेवाः समंतात्समवाकिरन् देवदुंदुभयश्चापिप्रणेदुर्भरतर्षभ ५४
सगत्वाजयतांश्रेष्ठस्तनयैः सहवीर्यवान् समुद्रंखानयामासवालुकार्णवमव्ययं ५५ नारायणेनकौरव्यतेजसाप्यायितःसवै
बभूवसुमहातेजाभूयोबलसमन्वितः ५६ तस्यपुत्रैः खनद्भिस्तुवालुकांतर्हितस्तदा धुंधुरासादितोराजन्दिशमाश्रित्यपश्चिमां
५७ मुखजेनाग्निनाक्रोधाल्लोकानुद्वर्तयन्निव वारिसुस्राववेगेनमहोदधिरिवोदये ५८ सोमस्यभरतश्रेष्ठधारोर्मिकलिलोमह
त् तस्यपुत्रशतंदग्धंत्रिभिरूनंतुरक्षसा ५९ ततः सराजाकौरव्यराक्षसंतंमहाबलं आससादमहातेजाधुंधुंधुंधुनिबर्हणः ६०
तस्यवारिमयंवेगमापीयसनराधिपः योगीयोगेनवह्निंचशमयामासवारिणा ६१ निहत्यतंमहाकायंबलेनोदकराक्षसं उत्तंकं
दर्शयामासकृतकर्मामहायशाः ६२ उत्तंकस्तुवरंप्रादात्तस्मैराज्ञेमहात्मनेअददच्चाक्षयंवित्तंशत्रुभिश्चाप्यधृष्यतां ६३ धर्मे
रतिंचसततंस्वर्गेवासंतथाक्षयं पुत्राणांचाक्षयांल्लोकान्स्वर्गेयेरक्षसाहताः ६४ इतिश्रीखिलेषुहरिवंशेएकादशोध्यायः ११

वमासादितवानित्यर्थः ५८ ६४ एकादशः ॥ छ॥ छ॥ छ॥ छ॥ छ॥ ॥ छ॥ ॥ ॥

राम
३५

तस्यधुंधुमारस्य २ ३ तस्यसंहताश्वस्यार्वाहैमवतीहैमवतःकन्यात्मसांप्रसेनजितजातइतिशेषः ४ ११ पाणिग्रहणमंत्राणांतावेहिसंभवावहैसहरेतोदधावहैपुंसेपु

वैशंपायनउ० तस्यपुत्रास्त्रयःशिष्टादृढाश्वोज्येष्ठउच्यते चंद्राश्वकपिलाश्वौतुकुमारौद्वौकनीयसौ १ धौंधुमारिर्दृढाश्वस्तुहर्यश्वस्तस्य
चात्मजः हर्यश्वस्यनिकुंभोभूत्क्षत्रधर्मरतःसदा २ संहताश्वोनिकुंभस्यपुत्रोरणविशारदः अकृशाश्वःकृशाश्वश्चसंहताश्वसुतौनृ
प ३ तस्यहैमवतीकन्यासतांमातादृषद्वती विख्यातात्रिषुलोकेषुपुत्रश्चास्याःप्रसेनजित् ४ लेभेप्रसेनजिद्भार्यांगौरींनामपतिव्रतां
अभिशप्तातुसाभर्त्रानदीवैबाहुदाकृता ५ तस्याःपुत्रोमहानासीद्युवनाश्वोमहीपतिः मांधातायुवनाश्वस्यत्रैलोक्यविजयीसुतः
६ तस्यचैत्ररथीभार्याशशबिंदोःसुताभवत् साध्वीबिंदुमतीनामरूपेणासदृशीभुवि ७ पतिव्रताचज्येष्ठाचभ्रातॄणामयुतस्यसा
तस्यामुत्पादयामासमांधाताद्वौसुतौनृप ८ पुरुकुत्संचधर्मज्ञंमुचुकुंदंचधार्मिकं पुरुकुत्ससुतस्त्वासीत्त्रसदस्युर्महीपतिः ९ नर्म
दायामथोत्पन्नः संभूतस्तस्यचात्मजः संभूतस्यचरापादः सुधन्वारिपुमर्दनः १० सुधन्वनःसुतश्चासीत्त्रिधन्वानामपार्थिवः पु
त्रस्त्रिधन्वनस्त्वासीद्विद्वांस्त्रय्यारुणःप्रभुः ११ तस्यसत्यव्रतोनामकुमारोभून्महाबलः पाणिग्रहणमंत्राणांविघ्नंचक्रेसुदुर्मतिः
१२ येनभार्याहृतापूर्वंकृतोद्वाहापरस्यवै बाल्यात्कामाच्चमोहाच्चसंहर्षाच्चापलेनवै १३

त्रीपवैत्रवेदइसाग्यानांविघ्नमतिबंधंचक्रे १२ परस्यपरेणपूर्वंकृतोद्वाहाऊढाकन्यासभार्याकृतेनन्नृपः सत्यामसप्तपदीमवेसंज्ञिममंत्रातेभार्यात्वमुत्पद्यतेनत्वतः
प्राक्अतस्तांभार्यामजहार संहर्षोहर्षाभिनिवेशात् १३ ॥८॥ ७२॥

शंकुना पापरूपेण कीलेन विद्धत्वात्त्रय्यारुणोऽत्यजत् १४ हे अपध्वंस विलोमज इति वदन् संबोधयन् १५ वर्तय वस १६ तं स्वं वदंतं पितरं १७ १८ तेनाधर्मेण विश्वविकारहारिणा गुरो
न पितृशापेन गुरुणा द्वादशः प्रजा शापेन अभूत् ततो विषयस्य दोषाभावात् तस्मिन् पापितो बोधः पितुराज्ञा दिशो दिशो बद्ध्वा १९ तस्य विश्वामित्रस्य विषये देशे स्वस्य स्वस्य नाश

मयपतिष्यामिदेवेशतृप्तियापार्थिवसंशयः यथाभागंचराज्यंचनचिरात्प्रतिलप्स्यसे २८ तथाताततकरिष्यामियथाप्नोविहितंमनः ततःकर्म
चकारास्यतेजसोवर्द्धनंतदा २९ तेषांबुद्धिसंमोहमकरोद्बृहस्पतिसत्तमः नास्तिवादार्थशास्त्रंहिधर्मविद्वेषणंपरं ३० परमंतर्कशास्त्राणा
मसतांतन्मनोनुगं नहिधर्मप्रधानानांरोचतेतत्कथांतरे ३१ तेतद्बृहस्पतिकृतंशास्त्रंश्रुत्वाल्पचेतसः पूर्वोक्तधर्मशास्त्राणामभवन्द्वे
षिणःसदा ३२ अवक्तुमौघाहितंजन्मतेवह्नमीरिरे तेनाधर्मेणतेपापाः सर्वेएवक्षयंगताः ३३ त्रैलोक्यराज्यंशक्रस्तुप्राप्यदुःप्रापमे
वच बृहस्पतिप्रसादाद्धिपरांनिर्वृतिमभ्यगात् ३४ तेपुरातुसुखेमहाराजेन्मत्ताविधर्मिणः ब्रह्मद्विषश्चसंवृत्ताहतवीर्यपराक्रमाः ३५
ततोलेभेपुनःस्वर्गमिंद्रःस्थानंसुरोत्तमः हत्वारजिसुतान्सर्वान्कामक्रोधपरायणान् ३६ यइदंच्यावनंस्थानात्प्रतिष्ठांचशतक्रतोः शृ
णुयाद्धारयेद्वापिनसदौरात्म्यमाप्नुयात् ३७ इतिश्रीहरिवंशेक्षत्रवृद्धवंशानुकीर्तनेनामाष्टाविंशः वैशंपायनउ॰ रंभोऽनपत्य
स्तत्रासीद्वंशंवक्ष्याम्यनेनसः अनेनसःसुतोराजाप्रतिक्षत्रोमहायशाः १ प्रतिक्षत्रसुतश्चापिसृंजयोनामविश्रुतः सृंजयस्य
जयःपुत्रोविजयस्तस्यचात्मजः २ विजयस्यकृतिःपुत्रस्तस्यहर्यश्वतःसुतः हर्यश्वतसुतोराजासहदेवःप्रतापवान् ३ सह
देवस्यधर्मात्मानदीनइतिविश्रुतः नदीनस्यजयत्सेनोजयत्सेनस्यसंकृतिः ४ ॥:॥:॥:॥:॥:॥:

३५ ३६ ३७ अष्टविंशएमो १२ २ ३ ४ ॥:॥:॥:॥ श्रीः श्री॥:॥:॥ :॥ श्रीः॥ :॥ :॥ :॥ :॥ :॥:

वैतहव्यस्य हैहयशर्मोपरमणोपायस्य ५ । ७ गृत्समदसंततौ शुनकाद्यो ब्राह्मणाः अन्ये क्षत्रियादयश्च पुत्रा जाताः शलः मध्यमः सुनहोत्रपुत्रः तस्यात्मजः शलात्म
जः ८ काशः सुनहोत्रस्य प्रथमः पुत्रस्तस्य ९ अपत्यानि काशयः तेषु दीर्घतपाः प्रथम इति शेषः ततो धन्वा तस्माद्धन्वन्तरिर्जातः ९ पुनरिति समुद्रादुत्पत्तिमपेक्ष्य

सहत्तोपिधर्मात्मातत्रधर्मोमहायशाः अनेनसः समाख्याताः क्षत्रवृद्धस्यमेशृणु ५ क्षत्रवृद्धात्मजस्तत्रसुनहोत्रोमहायशाः सुन
होत्रस्यदायादास्त्रयः परमधार्मिकाः ६ काशः शलश्चद्वावेतौतथागृत्समदः प्रभुः पुत्रोगृत्समदस्यापिशुनकोयस्यशौनकाः ७
ब्राह्मणाः क्षत्रियाश्चैववैश्याः शूद्रास्तथैवच शलात्मजस्त्वार्ष्टिषेणः सुतस्तस्याथचात्मजः ८ काशस्यकाशयोराजन्पुत्रोदीर्घत
पास्तथा धन्वस्तुदीर्घतपसोविद्वान्धन्वन्तरिः सुतः ९ तपसोऽन्तेसुमहतोजातोवृद्धस्यधीमतः पुनर्धन्वन्तरिर्देवोमानुषेष्विहजज्ञिवान्
१० जनमेजयउवाच कथंधन्वन्तरिर्देवोमानुषेष्विहजज्ञिवान् एतद्वेदितुमिच्छामितन्मेब्रूहियथातथं ११ वैशंपायनउवाच धन्वन्त
रेः संभवोयंश्रूयतांभरतर्षभ जातः सहिसमुद्रात्तुमथ्यमानेपुरामृते १२ उत्पन्नः कलशात्पूर्वंसर्वतश्चश्रियावृतः अभ्यमतः सिद्धकार्यं
हिविष्णुंदृष्ट्वाहितस्थिवान् १३ अब्जस्त्वमितिहोवाचतस्मादब्जस्तुसस्मृतः अब्जः प्रोवाचविष्णुंवैतवपुत्रोस्मिवैप्रभो १४ वि
धत्स्वभागंस्थानंचममलोकेसुरेश्वर एवमुक्तः सदृष्ट्वावैतथ्यंप्रोवाचतंप्रभुः १५ कृतोयज्ञविभागोहियज्ञियैर्हिसुरैः पुरा दे
वेषुविधिहोत्रंवैविनियुक्तंमहर्षिभिः १६ ॥:॥ श्रीः ॥ श्रीः ॥ श्रीरामः ॥ ७ ॥

द्वितीयवारंजज्ञिवान्जातः १० १२ कलशात्समुद्रात् अभ्यसनाविष्णुंजपन्ध्यायन्वा १३ अप्सुजातत्वादब्जस्त्वमितिहोवाचविष्णुरितिशेषः १४
१५ होत्रंहोम्यंविनियुक्तंविद्धिजानीहि १६ ॥

उपहोमाः नाशिष्टादयश्चुद्रान्तुम्भं महान्ते दातुमपोऽपाइतिभावः मुख्यहोममेवमर्थ्यंकल्पयेमाशंकायामाहस्त्रवागिसिद्धेपुत्रत्वंरहानीजनोमिष्यतात्तदर्थेन्मद
वैदिकं प्रधानं कल्पयितुमशक्यमित्यर्थः १७ संभूताजन्मनि १८ तेनैवंद्वितीयेनैवत्र्यपभावः सोपानारोहक्रमेणाधिकाधिक्येोक्तध्रुपदमाहतेसमनोभूमौक्ता
कर्मीतत्स्थानमारोहतियथोक्तमंवतारोध्यायेत्रैव हताकमेदिवंयातित्रस्त्लेलोकसनांततोमतसापुत्राः स्थानमापूरयंत्युतेति १९ अष्टधेतिचिकित्सांगानामे

मशक्यमुपहोमैश्चतुम्यं कर्तुं कथं च न अब्रवीत्सोसि देवानां पुत्रस्त्वं हि महीश्वरः १७ द्वितीयायां तु संभूतो लोके ख्यातिं गमिष्यसि
अणिमादिश्च ते सिद्धिर्गर्भस्थस्य भविष्यति १८ तेनैव त्वं शरीरेण देवत्वं समवाप्स्यसे प्रभो चरुमंत्रैर्व्रतैर्जाप्यैर्यक्ष्यंति त्वां द्विजातयः १९
अष्टधा त्वं पुनश्चैव आयुर्वेदं विधास्यसि अवश्यभावी ह्यर्थोयं प्राग्दृष्टस्त्वब्जयोनिना २० द्वितीयं द्वापरं प्राप्य भविता त्वं न संशयः
इमं तस्मै वरं दत्त्वा विष्णुरंतर्दधे पुनः २१ द्वितीये द्वापरे प्राप्ते सौनहोत्रिः स काशिराट् पुत्रकामस्तपस्तेपे धिवन्दीर्घमथाकरत् २२

दायुर्वेदस्याष्टधात्वमंगानि चैवैकेउक्तानि कायबालग्रहोर्ध्वांगशल्यदंष्ट्राजरावृषान् अष्टावंगानितस्याहुश्चिकित्सायेषुसंश्रितेति कायचिकित्सा
बालचिकित्सादिग्रहोभूतप्रेतादिः ऊर्ध्वांगंशिरोनेत्रादि शल्यंशस्त्रघातादि दंष्ट्रास्थावरजंगमात्मकंविषं तेषांचिकित्साजारसा यनदिनाजरायाःदू
रीकरणं वृषःवाजीकरणंतंत्रं अवश्यंभावित्वंसर्वकल्पसदृशताद्रुताकल्पस्यतत्प्रजापतिरेववेद २० २१ धिन्वन्नमीतायनदेवादीनितिशेषः २३

जन्मप्रभृतिधन्वंतरिंदेवंज्ञानाधिगतवान् २३ २९ एतस्मिन्दिवोदासराज्यस्यकालेशून्यांसतींपश्चाद्राक्षसोहद्रानुबः निवासयामास ३० शून्यत्वेहेतुमाहशाप

प्रपद्येदेवमब्जंतंतपसामेपुत्रंप्रदास्यति अब्जंदेवंसुतार्थायतदाराधितवान्नृपः २३ ततस्तुष्टःसभगवानब्जोवाक्यंततोनृपं यदीच्छसि
वरंसर्वंतत्तेदास्यामिसुव्रतः २४ नृपउवाच भगवन्यदितुष्टस्त्वंपुत्रोमेख्यातिमान्भवेत् तथेतिसमनुज्ञाप्यतत्रैवांतरधीयत २५
तस्यगेहेसमुत्पन्नोदेवोधन्वंतरिस्तदा काशिराजोमहाराजःसर्वरोगप्रणाशनः २६ आयुर्वेदंभरद्वाजात्प्राप्येहभिषजांक्रियांतम
ष्टधापुनर्व्यस्यशिष्येभ्यःप्रत्यपादयत् २७ धन्वंतरेस्तुतनयःकेतुमानितिविश्रुतः अथकेतुमतःपुत्रोवीरोभीमरथःस्मृतः २८
भीमरथस्यापिसुतोदिवोदासःप्रजेश्वरः दिवोदासस्तुधर्मात्मावाराणस्यधिपोऽभवत् २९ एतस्मिन्नेवकालेतुपुरींवाराणसींनृ
प शून्यांनिवासयामासक्षेमकोनामराक्षसः ३० शप्ताहिसामतिमतानिकुंभेनमहात्मना शून्यावर्षसहस्रंवैभवित्रीनात्रसं
शयः ३१ तस्यांतुशप्तमात्रायांदिवोदासःप्रजेश्वरः विषयांतेपुरींरम्यांगोमत्यांसंन्यवेशयत् ३२ भद्रश्रेण्यस्यपूर्वंतुपुरीवा
राणसीभवेत् भद्रश्रेण्यस्यपुत्राणांशतमुत्तमधन्विनां ३३ हत्वानिवेशयामासदिवोदासोनरर्षभः भद्रश्रेण्यस्यतद्राज्यंहृतं
तेनबलीयसा ३४ जनमेजयउ॰ वाराणसींनिकुंभस्तुकिमर्थंशप्तवान्प्रभुः निकुंभःकश्चधर्मात्मासिद्धिक्षेत्रंशशापयः ३५

हीति निकुंभेनरुद्रगणेन ३१ विषयांतेगोमत्यां स्वदेशसीमनिगोमतीतीरे ३२ भद्रश्रेण्यस्ययदुवंश्यमहिष्मत्सुतस्य ३३ ३४ सिद्धिक्षेत्रंमोक्षक्षेत्रं ३५

३६ श्वशुरस्यहिमालयस्यांतिकेयदाःवसन्नदेवःदिवोदासोवाराणसींमासमवर्तिनिलभ्ये ३७ ३८ मेनापार्श्वस्थाः जननीजुगुप्सतेनिंदति ३९ निंदामेवाहस्वप
क्षेइति ४० अवाढाअवाताबालशिवनिंदकामहत्वादीनयत्तितव्यंइत्यर्थः इतितथा सर्वेशिवनिंदकःपिनाकहृतः इदानींतांद्रष्टोमातःएकाहिंसेयमिस्यमिध्यापा

वैशंपायनउ दिवोदासस्तुराजर्षिर्नगरींमाप्यपार्थिवः वसतिस्ममहातेजाःस्फीतायांतुनराधिपः ३६ एतस्मिन्नेवकालेतुकृतदा
रोमहेश्वरः देव्याःसप्रियकामार्थंमवसत्श्वशुरांतिके ३७ देवाज्ञयापार्षदायेत्वभिरूपास्तपोधनाः पूर्वोक्तैरूपवेषैश्चतोषयंति
स्मपार्वतीं ३८ हृष्यतेतिमहादेवीमेनानैवप्रहृष्यति जुगुप्सत्यसकृत्तांवैदेवींदेवंतथैवसा ३९ सपार्षदस्त्वनाचारस्तवभर्तामहे
श्वरः दरिद्रःसर्वदैवासौशीलंतस्यनविद्यते ४० मात्रातथोक्तावरदास्त्रीस्वभावाच्चचुक्रुधे स्मितंकृत्वाचवरदाभवपार्श्वमथागम
त ४१ विवर्णवदनादेवीमहादेवमभाषत नेहवत्स्याम्यहंदेवनयमांस्वंनिवेशनं ४२ तथाकर्तुंमहादेवःसर्वांल्लोकानवेक्षत
वासार्थंरोचयामासपृथिव्यांकुरुनंदन ४३ वाराणसींमहातेजाःसिद्धक्षेत्रंमहेश्वरः दिवोदासेनतांज्ञात्वानिविष्टांनगरींभ
वः ४४ पार्श्वेतिष्ठंतमाहूयनिकुंभमिदमब्रवीत् गणेश्वरपुरींगत्वाशून्यांवाराणसींकुरु ४५ मृदुनैवाभ्युपायेनह्यतिवीर्यः
सपार्थिवः ततोगत्वानिकुंभस्तुपुरींवाराणसींतदा ४६ ।।ः।।ः।।ः ।।ः श्रीः ।। श्रीः ।। श्रीः

शिवपार्श्वमुपागमत ४१ ४२ वासार्थंवाराणसीमितिसंबंधः ४३ ४४ ४५ ४६ ।। श्रीः श्रीः श्रीः श्री ः श्रीः

निदर्शयामासमत्स्यंञ्जसादत्तवान् ४७ ४८ राज्ञानंविज्ञाप्यप्रयोद्दिष्टंस्थानप्रतिमादिकंनगर्यंतेनगाढ्हर्निकटेकारितवानितियोजना ४८ ५०

स्वप्नेनिदर्शयामासकंटकंनामनापितं अयंतेहंकरिष्यामिस्थानंमेरचयानघ ४७ मद्रूपांप्रतिमांकृत्वानगर्यंतेतथैवचततः
स्वप्नेयथोद्दिष्टंसर्वंकारितवान्नृप ४८ पुरीद्वारेतुविज्ञाप्यराजानंचयथाविधि पूजांतुमहतींतस्यनित्यमेवप्रयोजयत् गंधैःसुधू
पमाल्यैश्चनैवेद्यैर्विविधैस्तथैवच अन्नपानप्रयोगैश्चअद्भुतमिवाभवत् ५० एवंसंपूज्यतेतत्रनित्यमेवगणोत्तमः ततोवर्षसहस्रेतुना
गराणांप्रपश्यति पुत्रान्हिरण्यमायुश्चसर्वान्कामांस्तथैवच ५१ राज्ञस्तुमहिषीश्रेष्ठासुयशानामविश्रुता पुत्रार्थमागतादे
वीसाधीराज्ञासंचोदिता ५२ पूजांतुविपुलांकृत्वादेवीपुत्रमयाचतपुनःपुनर्याचमानबहुशःपुत्रकारणात् ५३ नप्रयच्छतिपुत्रंहि
निकुंभःकारणेनहि राज्ञातुपरिसंक्रुद्धेलार्यसिद्धिस्ततोभवेत् ५४ अथदीर्घेणकालेनक्रोधोराजानमाविशत् भूतमेतन्म
हद्वारिनागराणांप्रपश्यति ५५ प्रीतोवान्नृपशतशोममकिंनप्रयच्छति मामकैःपूज्यतेनित्यंनगर्यामेषदेववत् ५६ विज्ञापितो
मयात्वर्थेदेव्याःपुत्रस्यकारणात् नददातिचपुत्रंमेकृतघ्नःकेनहेतुना ५७ ततोनाहंनिजस्थानमस्यकाश्यांविशेषतः तस्मात्तु
नाशयिष्यामिस्थानमस्यदुरात्मनः ५८ एवंसतुविनिश्चित्यदुरात्माराजकिल्बिषी स्थानंगाणपतेस्तस्यनाशयामासदुर्मतिः
५९ भग्नमायतनंदृष्ट्वाराजानमशपत्प्रभुः यस्मादनपराधस्यत्वयास्थानंविनाशितं पुर्यकस्मादियंशून्यातवनूनंभविष्यति ६०
ततस्तेनतुशापेनशून्यावाराणसीतदा शप्त्वापुरींनिकुंभस्तुमहादेवमथागमत् ६१ ॥ः॥७॥७॥

राजावासौकिल्बिषीतिसमासः ५९ प्रभुःनिकुंभः ६० शून्याभविष्यतीतिशेषः द्वितीयांतपाठेशप्त्वात्पुर्यस्यशापेनकृत्स्नेत्यर्थः इष्ट्वात्स्वर्गंगतइत्यन्येवक्ष्यमाणस्यथेस्यकारणा
सेनेवान्वयः ६१ ॥ः॥श्रीः॥श्रीः॥

पदंस्थानंमोहनात्लक्ष्मीविलासास्पदंप्रासादम् ९२ देवःस्वरूपानुरूपेतत्ररमतेदेवीतुमायात्स्वरूपालोकेद्वैतोनतत्रहोवेनरमतइतिभावः गृहविस्मयात् गृहेऽविमुक्ते
योविस्मयःआश्चर्यंअनधिकारिणामपिमुक्तिप्रदाने तस्माद्धेतोर्नरमतेअत्रपूर्णोमितिसंबंधः सार्द्धः ९३ नाहंवेश्मनिवत्स्यामिअविमुक्तोहिमेगृहंतत्रगमिष्यामि
गच्छदेविगृहंप्रतिअहंनित्यमुक्तईश्वरोवेश्मगृहंशरीरारंभनंननिवत्स्यामिनिवासमपिंतुनेच्छामि हियस्मात्मेममगृहंअविमुक्तंयत्कालत्रयेपिनविमुक्तंअहंयानुपादेया
त्मस्वरूपत्वात्तत्देवप्रकैतत्संममगृहंस्वमहिम्निप्रतिष्ठितोहंदेहस्यातिशयेनभविष्यामीत्यर्थः तत्रत्वदिष्टेसमाप्यदेशे गृहंत्वमितिगृहामितिकथयश्चेत्अस्थान

अकस्मात्तुपुरीसातुविद्धृतासर्वतोदिशं तस्यांपुर्यांततोदेवोनिर्ममेपदमात्मनः ९२ रमतेतत्रवैदेवोरमयाराशोगिरेःसुतानारतिंतत्रवै
देवीलभतेगृहविस्मयात् वसाम्यत्रनपुर्यांतुदेवमप्यब्रवीत् ९३ देवउवाच नाहंवेश्मविमोक्ष्यामिअविमुक्तंहिमेगृहं नाहं
तत्रगमिष्यामिगच्छदेविगृहंप्रति ९४ हसन्नुवाचभगवान्त्र्यंबकस्त्रिपुरांतकः तस्मात्तदविमुक्तंहिप्रोक्तंदेवेनवैस्वयं ९५

मेवदेहंप्राप्नुहिअहंत्वसंगएवास्मीत्यर्थः एतेनकाशीत्यागएवसंसारस्वीकारः तदत्यागएवमोक्षाख्यात्वरूपस्थितिरितिदर्शितं ९४ त्रीणिश्रवणमनन
ध्यानानिअंबकानिनेत्राणिवत्तापकानियस्यसत्र्यंबकः तथात्रंकातिरात्मानात्मादिरूपः श्रोतव्योमन्तव्योनिदिध्यासितव्यइत्यात्मदर्शनसाधनत्वेनप्र
वणात्रयंविधत्तेअतएवत्रिपुरांतकः त्रयाणांस्थूलसूक्ष्मकारणानांपुराणांशरीराणांअन्तकोविनाशकः प्रविलापनकर्ताविद्यास्वरूपात्येयाणुरात्ततेननजाना
तीतिहसनयस्मान्महादेवेनअविमुक्तंहिमेगृहमितिसुक्तंतस्मात्तदविमुक्तसंज्ञंवाराणसीक्षेत्रं ९५ ॥ : ॥ : ॥ : ॥ : ॥ : ॥ :॥:॥:

ह॰टी॰
७१

अत्राप्रकृतस्याविमुक्तस्य कीर्तनं उपोद्घातन्यायेन वाराणस्या मुख्यमविमुक्तत्वं दर्शयति तथाहि जाबालाः सोविमुक्ते प्रतिष्ठित इत्यविमुक्तप्रतिष्ठत्वमात्मन उप
दिश्य पुनस्तत्र अविमुक्तं किमित्याशंक्य वरणायां नास्यां च मध्ये प्रतिष्ठित इत्याधिभौतिकमविमुक्तमुक्त्वा कतमच्चास्य स्थानं भ्रुवोर्घ्राणस्य च यः संधिरिति प्रश्नपूर्वकं शरी
रेऽस्य स्थानं भ्रूघ्राणसंधिरित्याम्नातं विरक्तत्वमात्मकृतायामविमुक्तानिहन्तोऽस्य द्रष्टव्यः ६६ ६७ अन्तर्हितमिति सार्द्धः पुरमस्यास्तीति पुरी महादेवः अन्तर्हितो याति न पुरु
र्याः स्वयमेवान्तर्हितः सन्वसति देवताप्रतिमागृहेषु देवतासान्निध्यं न निवर्तत इत्यर्थः पुनः कृतयुगादिमेतपुरीं वाराणसीं वसत इति व्याख्यानेप्यन्तर्हितो न मात्रं युयोजन्नं नत्स्येदः

एवंवाराणसीशप्तात्रविमुक्तंचकीर्तितं ६६ यस्मिन्वसतिवैदेवः सर्वदेवनमस्कृतः युगेषु त्रिधर्मात्मासहदेव्यामहेश्वरः ६७ अंतर्हितो
नकलौयातितत्पुरंहिमहात्मनः अंतर्हितेपुरेतस्मिन्पुरीतुवसतेपुनः एवंवाराणसीशप्तानिवेशंपुनरागता ६८ भद्रश्रेण्यस्यपुत्रो
वैदुर्दमोनामविश्रुतः दिवोदासेनबालेतिघृणयासौविसर्जितः ६९ हैहयस्यतुदायाद्यंहृतवान्वैमहीपतिः आजह्रे पितृदायाद्यंदि
वोदासहृतंबलात् ७० भद्रश्रेण्यस्यपुत्रेणदुर्दमेनमहात्मना वैरस्यांतंमहाराजक्षत्रियेणाभिधित्सता ७१

एवं पुरपतेरपि दृश्यं किंच यावत्कलेः संध्यांशोऽस्ति तावत्तत्र द्वापरधर्माणां कियतामप्यनुवृत्तेः षट्त्रिंशत्सहस्रवत्सरपर्यंतं कलावपि पुरी नांतर्हिता भवति
तत्र हि तैर्केवलस्य कलेः महत्त्वात्सामेव भवति च अस्या आसमन्तादुपलंभो न पुनर्भवतीति हिक् ६८ भद्रश्रेण्यस्य पुत्रशतैर्हतास्तेषु वरमो दुर्दमो बालत्वादुपेक्षितः बा
ल इति संधिरार्षः घृणया दयया ६९ दायाद्यं पुत्रत्वेन कृतवान् स्वीकृतवान् आजह्रे आहृतं दुर्दमेनेत्युत्तरश्लोकान्वयः ७० ७१ ॥:॥:॥ :॥:

राम॰
७१

तेनबालेनैवप्रहृतंअपहृतंतस्यदुर्दमस्यराज्यमितिशेषः ७१ ७५ लोपामुद्राअगस्त्यभार्याशापस्यनिकुंभदत्तस्य ७६ क्षेमिति सहस्रवर्षपर्यंतं राक्षसाधिष्ठितत्वादारम्यैवपुरआसीदितिगम्यते सचतोलर्कपुत्रस्य ७० ८१ क्षेमस्यअलर्कपितृपुत्रत्वंनामाहवत्सभूमिरिति भार्गवातवंसभ्रातुः ८१

दिवोदासात्दृषद्वत्यांवीरोजज्ञेप्रतर्दनः तेनपुत्रेणबालेनप्रहृतंतस्यवैपुनः ७२ प्रतर्दनस्यपुत्रौद्वौवत्सभार्गौबभूवतुः वत्सपुत्रोह्यलर्कस्तुसन्नतिस्तस्यचात्मजः ७३ अलर्कःकाशिराजस्तुब्रह्मण्यःसत्यसंगरः अलर्कंप्रतिराजर्षिंश्लोकोगीतःपुरातनैः ७४ षष्टिंवर्षसहस्राणिषष्टिंवर्षशतानिच युवारूपेणसंपन्नआसीत्काशिकुलोद्वहः ७५ लोपामुद्राप्रसादेनपरमायुरवापसः तस्यासीत्सुमहद्राज्यंरूपयौवनशालिनः शापस्यान्तेमहाबाहुर्हत्वाक्षेमकराक्षसं ७६ रम्यांनिवेशयामासपुरींवाराणसींपुनः सन्नतेरपिदायादःसुनीथोनामधार्मिकः ७७ सुनीथस्यतुदायादःक्षेम्योनाममहायशाः क्षेम्यस्यकेतुमान्पुत्रःसुकेतुस्तस्यचात्मजः ७८ सुकेतोस्तनयश्चापिधर्मकेतुरितिस्मृतः धर्मकेतोस्तुदायादःसत्यकेतुर्महारथः ७९ सत्यकेतुसुतश्चापिविभुर्नामप्रजेश्वरः आनर्तस्तुविभोःपुत्रःसुकुमारस्ततःसुतः ८० सुकुमारस्यपुत्रस्तुधृष्टकेतुःसुधार्मिकः धृष्टकेतोस्तुदायादोवेणुहोत्रःप्रजेश्वरः ८१ वेणुहोत्रसुतश्चापिभर्गोनामप्रजेश्वरः वत्सस्यवत्सभूमिस्तुभृगुभूमिस्तुभार्गवात ८२ एतेह्यांगिरसःपुत्राजातावंशेथभार्गवे ब्राह्मणाःक्षत्रियावैश्यास्तयोःपुत्राःसहस्रशः इत्येतेकाश्यपःप्रोक्तानहुषस्यनिबोधमे ८३ इतिखिलेषुहरिवंशेएकोनत्रिंशः

अंगिरसःगालवस्यांगिरसत्वात् भार्गवेविश्वामित्रस्यभार्गवत्वात्तयोः वत्सभूमिभृगुभूम्योःकाशयःकाशवंश्याः ८३ एकोनत्रिंशः॥ः॥ः॥ः॥ः॥ः॥ः

ह॰ टी॰
७२

उत्पन्नाः पितरः सुखधामंतः वैष्णव्यात्तेषां कन्यायां विरजायां ११ मोक्षं मोक्षमार्गं २ ययातेर्भार्यांतरमाह देवयानीमिति ४ ५ असंगस्तं

वैशंपायन उवाच उत्पन्नाः पितृकन्यायां विरजायां महौजसः नहुषस्य तु दायादाः षडिंद्रोपमतेजसः १ यतिर्ययातिः संयाति
रायातिः पांचिरुद्धव सुयातिः षष्ठस्तेषां ययातिः पार्थिवोऽभवत् यतिर्ज्येष्ठस्तु तेषां वै ययातिस्तु ततः परं २ ककुत्स्थकन्यां
गां नाम लेभे धर्मभृत्तावरः यतिस्तु मोक्षमास्थाय ब्रह्मभूतो भवन्मुनिः ३ तेषां ययातिः पंचानां विजित्य वसुधामिमां देवयानी
मुशनसः सुतां भार्यामवाप सः शर्मिष्ठामासुरीं चैव तनयां वृषपर्वणः ४ यदुं च तुर्वसुं चैव देवयानी व्यजायत द्रुह्युं चानुं च पूरुं च शर्मि
ष्ठा वार्षपार्वणी ५ तस्मै शक्रो ददौ प्रीतो रथं परमभास्करं असंगं कांचनं दिव्यं दिव्यैः परमवाजिभिः ६ युक्तं मनोजवैः शुभ्रै
येन कार्यं समुद्वहन् ७ स तेन रथमुख्येन षड्रात्रेणाजयन्महीं ययातिर्युधि दुर्धर्षस्तथा देवान्सवासवान् ८ स रथः पौरवा
णां तु सर्वेषामभवत्तदा यावत्तु वसुनाम्नो वै कौरवाज्जनमेजयात् कुरोः पुत्रस्य राजेंद्र राज्ञः पारीक्षितस्य ह जगाम स रथो नाशं शापा
द्गार्ग्यस्य धीमतः १० गार्ग्यस्य हि सुतं बालं स राजा जनमेजयः वाक्क्रूरं हिंसयामास ब्रह्महत्यामवाप सः ११ स लोहगंधी
राजर्षिः परिधावन्नितस्ततः पौरजानपदैस्त्यक्तो न लेभे शर्म कर्हिचित् १२ ततः स दुःखसंतप्तो नालभत्संविदं क्वचित् इं
द्रोतः शौनकं राजन् शरणं प्रत्यपद्यत १३

वासवलिंगेनेति ६ ११ शापे कारणमाह गार्ग्यस्य हीति वाक्क्रूरं निष्ठुरभाषि
णमिति हिंसने हेतुरुक्तः ११ संविदं सामर्थ्यं ज्ञानं वा पापं इंद्रोतः शाह्यः दंतः सांत्वनः १३ ॥

राप॰
७२

१४ तस्माद्वसोः १५ १८ दक्षिणपूर्वस्यांआग्नेयकोणे १९ पूर्वोत्तरस्यांऐशान्यां मध्येकुरुपांचालेषु २० २१ पंचभिःपुत्रैःकृतकृत्यःसन्धनुर्न्यस्त
वान्नततश्चजरावानभूदित्यर्थः २२ २५ अनिर्दिष्टाइदंमेदेहीतिविशेषतोऽनुक्तामयाचप्रतिश्रुतात्वदिष्टंदास्यामीति तांश्रुतातांअनपाकृत्यश्चाविते

याजयामासचेंद्रोतः शौनकोजनमेजयं अश्वमेधेनराजानंपावनार्थंद्विजोत्तमः सलोहगंधोव्यनशत्तस्यावभृथमेत्यह १४
सचदिव्योरथोराजन्वसोश्चेदिपतेस्तदा दत्तःशक्रेणतुष्टेनलेभेतस्माद्बृहद्रथः १५ बृहद्रथात्क्रमेणैवगतोबार्हद्रथंनृपंततो
हत्वाजरासंधंभीमस्तंरथमुत्तमं १६ प्रददौवासुदेवायप्रीत्याकौरवनंदन १७ सप्तद्वीपांययातिस्तुजित्वापृथ्वींससागरां व्यभज
त्पंचधाराजन्पुत्राणांनाहुषस्तदा १८ दिशिदक्षिणपूर्वस्यांतुर्वसुंमतिमान्नृपः प्रतीच्यामुत्तरस्यांचद्रुह्युंचानुंचनाहुषः १९ दिशि
पूर्वोत्तरस्यांतुयदुंज्येष्ठंन्ययोजयत् मध्येपूरुंचराजानमभ्यषिंचत्सनाहुषः २० तैरियंपृथिवीसर्वासप्तद्वीपासपत्तना यथाप्रदेशमद्या
पिधर्मेणप्रतिपाल्यते २१ प्रजास्तेषांपुरस्तात्तुवक्ष्यामिनृपसत्तम धनुर्न्यस्यपृषत्कांश्चपंचभिःपुरुषर्षभैः २२ जरावानभवद्राजाभा
रमावेश्यबंधुषुनिक्षिप्तशस्त्रः पृथिवींनिरीक्ष्यपृथिवीपतिः प्रीतिमानभवद्राजाययातिरपराजितः एवंविभज्यपृथिवींयया
तिर्यदुमब्रवीत् जरांमेप्रतिगृह्णीष्वपुत्रकृत्यांतरेणवै २४ तरुणस्तवरूपेणचरेयंपृथिवीमिमां जरांत्वयिसमाधायतं
यदुःप्रत्युवाचह २५ अनिर्दिष्टामयाभिक्षाब्राह्मणस्यप्रतिश्रुता अनपाकृत्यतांराजन्नग्रहीष्यामितेजरां २६

अपरिहृत्यतांतावत्स्यान्नहितांनिधायतवजरांगृहीतुंममावकाशः स्यादितिभावः २६ ॥ः॥ः॥४॥ः॥५॥ः॥ः॥ः॥ः५॥ः

ह॰वि॰
७३

२९ कइति पितृवचनमुल्लंघ्यातिष्पर्ध्यसाधनंनधर्मोयेतिभावः देशिकःगुरुःविद्याप्रदः ३० ३१ पूर्वंआदिपर्वणि ३३ ३६ अंतंतस्यावसानं

जरायांबहवोदोषाः पानभोजनकारिताः तस्माज्जरांनतेराजन्ग्रहीतुमहमुत्सहे २७ संतितेबहवः पुत्रामत्तः प्रियतरान्नृपप्र तिगृहीतुंधर्मज्ञपुत्रमन्यंवृणीष्ववै २८ सएवमुक्तोयदुनाराजाकोपसमन्वितः उवाचवदतांश्रेष्ठोययातिर्गर्हयन्सुतं २९ कआ श्रयस्तवान्योस्तिकोवाधर्मोविधीयते मामनादृत्यदुर्बुद्धेयदहंतवदेशिकः ३० एवमुक्त्वायदुंतातशशापैनंसमन्युमान् आ राज्यातेप्रजामूढभवित्रीतिनराधिपः ३१ सतुर्वसुंचद्रुह्युंचअनुंचभरतर्षभ एवमेवाब्रवीद्राजाप्रत्याख्यातस्तैरपि ३२ शशापता नपिक्रुद्धोययातिरपराजितः यथातेकथितंपूर्वंमयाराजर्षिसत्तम ३३ एवंशप्त्वासुतान्सर्वांश्चतुरःपुरुपूर्वजान् तदेव वचनंराजापुरुमप्याहभारत ३४ तरुणस्तवरूपेणचरेयंपृथिवीमिमां जरांत्वयिसमाधायत्वंपुरोयदिमन्यसे ३५ सजरांप्र तिजग्राहपुत्रः पूरुःप्रतापवान् ययातिरपिरूपेणपूरोः पर्यचरन्महीं ३६ समार्गमाणःकामानामंतंभरतसत्तम वि श्वाच्यासहितोरेमेवनेचैत्ररथेप्रभुः ३७ यदावितृप्तःकामानांभोगेषुसनराधिपः तदापूरोःसकाशाद्वैस्वांजरांप्रत्यपद्य त ३८ तत्रगाथामहाराजशृणुगीताययातिना याभिःप्रत्याहरेत्कामान्सर्वशोऽङ्गानिकूर्मवत् ३९ नजातुकामःका मानामुपभोगेनशाम्यति हविषाकृष्णवर्त्मेवभूयएवाभिवर्द्धते ४० ॥ः॥ः ॥ः ॥ः ॥ः

विश्वाचीअप्सराःइंद्रस्यापातककुत्स्यकन्यागोनाम्नीनातातायययातिनाऊढेतिशेषं ३७ अवितृप्तस्मइतिबोधः ३८ ४० ॥ः

राम॰
७३

४८ पंचपुत्रप्रमृत्जयः ४९ त्रिंशः श्लो १ उत्तमंउत्कृष्टंपौरुषंयस्मिन् २ ३ ।। छ ।। ।।श्री ।। ।।श्रीःश्रीः।। ः।। ः।। श्रीः श्रीः श्रीः

यत्पृथिव्यांव्रीहियवंहिरण्यंपशवःस्त्रियः नालमेकस्यतत्सर्वमितिपश्यन्नमुह्यति ४१ यदाभावंनकुरुतेसर्वभूतेषुपापकं कर्मणा
मनसावाचाब्रह्मसंपद्यतेतदा ४२ यदान्येभ्योनबिभ्येतियदाचास्मान्नबिभ्यतियदाने च्छतिनद्वेष्टिब्रह्मसंपद्यतेतदा ४३ यादुस्त्यजा
दुर्मतिभिर्यानजीर्यतिजीर्यतः योसौप्राणांतिकोरोगस्तांतृष्णांत्यजतःसुखं ४४ जीर्यंतिजीर्यतःकेशादंताजीर्यंतिजीर्यतः
जीविताशाधनाशाचजीर्यतोपिनजीर्यति ४५ यच्चकामसुखंलोकेयच्चदिव्यंमहत्सुखं तृष्णाक्षयसुखस्यैतेनार्हतःषोडशींकलां
४६ एवमुक्त्वासराजर्षिःसदारःप्राविशद्वनं कालेनमहताचापिचचारविपुलंतपः ४७ भृगुतुंगेतपस्तप्त्वातपसोंतेमहायशाः
अनश्नन्देहमुत्सृज्यसदारःस्वर्गमाप्तवान् ४८ तस्यवंशेमहाराजपंचराजर्षिसत्तमाः यैर्व्याप्तापृथिवीसर्वासूर्यस्येवगभ
स्तिभिः ४९ यदोस्तुशृणुराजर्षेर्वंशंराजर्षिसत्कृतं यत्रनारायणोजज्ञेहरिर्वृष्णिकुलोद्वहः ५० ययातेश्चरितंपुण्यंप
ठन्शृण्वन्नराधिप स्वस्थःप्रजावानायुष्मान्कीर्तिमांश्चभवेन्नरः ५१ इतिश्रीमहाभारतेखिलेषुहरिवंशेययातिचरि
तंनामत्रिंशः जनमेजयउवाच पूरोर्वंशमहंब्रह्मन्श्रोतुमिच्छामितत्वतः द्रुह्योश्चानोर्यदोश्चैवतुर्वसोश्चपृथक्पृथक् वि
स्तरेणानुपूर्व्याचतद्भवान्वक्तुमर्हति १ वैशंपायनउवाच वृष्णिवंशप्रसंगेनस्ववंशंपूर्वमेवहि शृणुपूरोर्महाराजवंश
मुत्तमपौरुषं २ विस्तरेणानुपूर्व्याचयत्रजातोसिपार्थिव हंततेवर्तयिष्यामिपूरोर्वंशमनुत्तमं ३

६ घृतेयुस्त्वेपत्ववनेतिसइत्यपपाठः ७ स्त्रीरत्नकूटाः स्त्रीरत्नानुर्वश्यादीनि कूटानि हीनानि याभ्यः ताः ८ ९ येनअत्रिणा १० अत्रिश्रेष्ठानीतिधर्मशास्त्रेआत्रेयीवधेब्रह्महत्याब्रह्मप्रोक्तत्वात्पक्षेचआत्रेयायब्राह्मणायसात्तस्येणादक्षिणाविधानात् अत्रिरेवसर्वेषुगोत्रप्रवर्त्तकेषुश्रेष्ठः ११ पुत्रिकासुतुं

दुष्टोस्यानोर्यदोश्चैवतुर्वसोश्चनराधिप ३ पुरोःपुत्रःप्रवीरोभून्मनस्युस्तस्यचात्मजः राजाचाभयदोनाममनस्योरभवत्सुतः ४ तथैवाभयदस्यासीत्सुधन्वाचमहीपतिः सुधन्वनःसुबाहुस्तुरौद्राश्वस्तस्यचात्मजः ५ रौद्राश्वस्यदशार्णेयुःकृकणेयुस्तथैवच कक्षेयुःस्थण्डिलेयुश्चसन्नतेयुस्तथैवच ६ ऋचेयुश्चस्थलेयुश्चजलेयुश्चमहायशाः धनेयुश्चवनेयुश्चपुत्रिकाश्चदशस्त्रियः ७ भद्राशूद्राचमद्राचशलदामलदातथा खलाबलाचराजेंद्रबलदासुरथापिच तथागोचपलाचस्त्रीरत्नकूटाश्चतादश ८ आर्षिकेयोत्रिवंशेतुतासांभर्ताप्रभाकरः भद्रायांजनयामाससुतंसोमंयशस्विनं ९ स्वर्भानुनाहतेसूर्येपतमानेदिवोमही तमोभिभूतेलोकेचप्रभायेनप्रवर्त्तिताः १० स्वस्तितेस्त्वितिचोक्तोवैपतमानोदिवाकरः वचनात्तस्यविप्रर्षेर्नपपातदिवोमही ११ अत्रिश्रेष्ठानिगोत्राणियश्चकारमहातपाः यत्तेष्वत्रेर्बलंयस्यसुरैश्चैवप्रवर्त्तितं १२ सतासुजनयामासपुत्रिकासुसनामकान् दशपुत्रान्महात्मासौतपस्युग्रोरतान्सदा १३ तेतुगोत्रकाराराजन्नृषयोवेदपारगाः स्वस्त्यात्रेयाइतिख्याताः किंत्वत्रिधनवर्जिताः १४ कक्षेयोस्तनयास्त्वासंस्त्रयएवमहारथाः सभानरश्चाक्षुषश्चपरमन्युस्तथैवच १५ ।।:।।:।।:

कन्यांमद्यास्याभिदेवाग्निगुरुसन्निधौ अस्यांयोजायतेपुत्रः समेपुत्रोभवेदितिपुत्रिकाकरणविधिनाप्राप्तासु १३ अतएवाहकिंत्वत्रिधनवर्जिताइति १४
कक्षेयोः रौद्राश्वसुतस्यततोपस्य १५ ।। :।।

२६ महामनसोज्येष्ठपुत्रस्योशीनरस्य संततिमुक्त्वा कनिष्ठपुत्रस्य तितिक्षोर्वंशमाह तितिक्षोस्तु प्रजाः शृण्विति २७ २८ यः पूर्वं बलिरिति निर्दिष्ट आसीत्

सभानरस्यपुत्रस्तुविद्वान्कालानलोनृपः कालानलस्यधर्मज्ञः संजयोनामवैसुतः १६ संजयस्याभवत्पुत्रोवीरोराजापुरंजयः ज
नमेजयोमहाराजपुरंजयसुतोभवत् १७ जनमेजयस्यराजर्षेर्महाशालोभवत्सुतः देवेषुसपरिज्ञातःप्रतिष्ठितयशाभुवि १८ महामना
नामसुतोमहाशालस्यधार्मिकः जज्ञेवीरःसुरगणैःपूजितःसुमहामनाः १९ महामनास्तुपुत्रौद्वौजनयामासभारत उशीनरंचध
र्मज्ञंतितिक्षुंचमहाबलं २० उशीनरस्यपत्न्यस्तुपंचराजर्षिवंशजाः नृगाक्रिमीनवादर्वापंचमीचदृषद्वती २१ उशीनरस्यपुत्रास्तुपंचता
सुकुलोद्वहाः तपसाचैवमहताजातावृद्धस्यचात्मजाः २२ नृगायास्तुनृगःपुत्रःक्रिम्याःक्रिमिरजायत नवायास्तुनवःपुत्रोदर्व्यो
याःसुव्रतोभवत् २३ दृषद्वत्यास्तुसंजज्ञेशिबिरौशीनरोनृपः शिबेस्तुशिबयस्तातयौधेयास्तुनृगस्यह २४ नवस्यनवराष्ट्रंतुक्रिमेस्तु
क्रिमिलापुरीसुव्रतस्यतथांबष्ठाशिबिपुत्रान्निबोधमे २५ शिबेश्चपुत्राश्चत्वारोवीरास्त्रैलोक्यविश्रुताः वृषदर्भःसुवीरश्चकैकेयो
मद्रकस्तथा २६ तेषांजनपदाःस्फीताःकैकेयामद्रकास्तथा वृषदर्भाःसुवीराश्चतितिक्षोस्तुप्रजाःशृणु २७ तितिक्षुरभव
द्राजापूर्वस्यांदिशिभारत उशद्रथोमहाराजफेनस्तस्यसुतोभवत् २८ फेनस्यसुतपाजज्ञेसुतःसुतपसोबलिः जातोमानुषयोनौतु
सराजाकांचनेषुधिः २९ महायोगीसतुबलिर्बभूवनृपतिःपुरा ॥ः ॥ः ॥ः ॥ः

सएवसुतपसःपुत्रोबलिनामाभवत् २९ ॥ः॥ ७॥ः॥ः ॥ःश्रीः॥ ः॥ श्रीः॥ श्रीः॥ ः॥ श्रीः॥ ः॥ ः॥ः॥

३० वालेयंवलेरयं ३१ ३२ प्रसवेऽप्रभुतायांवशिताख्यांसिद्धिमित्यर्थः ३४ परांशांतिंज्ञानजंमोक्षं ३५ हेअजाः वलेरूर्ध्वरेतस्त्वात् ३६ ३७ त्वस्य

पुत्रानुत्पादयामासपंचवंशकरान्भुवि ३० अंगःप्रथमतोजज्ञेवंगःसुह्मस्तथैवच पुंड्रःकलिंगश्चतथावालेयंक्षत्रमुच्यते ३१
वालेयाब्राह्मणाश्चैवतस्यवंशकराभुवि वलेश्चब्रह्मणादत्तावराःप्रीतेनभारत ३२ महायोगित्वमायुश्चकल्पस्यपरिमाणतः
संग्रामेचाप्यजेयत्वंधर्मेचैवप्रधानता ३३ त्रैलोक्यदर्शनंचापिप्राधान्यंप्रसवेतथा वलेचाप्रतिमत्वंवैधर्मतत्त्वार्थदर्शनं ३४ च
तुरोनियतान्वर्णांस्त्वंचस्थापयिताभुवि इत्युक्तोविभुनाराजावलिःशांतिंपरांययौ ३५ तस्यतेतनयाःसर्वेक्षेत्रजामुनिपुंगवा
त् संभूतादीर्घतमसःसुदेष्णायांमहौजसः ३६ वलिस्तानभिषिच्येहपंचपुत्रानकल्मषान्कृतार्थःसोऽपियोगात्मायोगमाश्रि
त्यसप्रभुः ३७ अवध्यःसर्वभूतानांकालापेक्षीचरन्नपि कालेनमहताराजन्स्वंचस्थानमुपेयिवान् ३८ तेषांजनपदाःपं
चवंगांगाःसुह्मकास्तथा कलिंगाःपुंड्रकाश्चैवप्रजास्त्वंगस्यमेशृणु ३९ अंगपुत्रोमहानासीद्राजेंद्रोदधिवाहनः दधिवाह
नपुत्रस्तुराजादिविरथोभवत् ४० पुत्रोदिविरथस्यासीच्छक्रतुल्यपराक्रमः विद्वान्धर्मरथोनामतस्यचित्ररथःसुतः ४१ तेन
चित्ररथेनाथतदाविष्णुपदेगिरौ यजताःसहशक्रेणसोमःपीतोमहात्मना ४२ अथधर्मरथस्यापिपुत्रोदशरथोभवत् लो
मपादइतिख्यातोयस्यशांतासुताभवत् ४३ तस्यदाशरथिर्वीरश्चतुरंगोमहायशाः ऋष्यशृंगप्रसादेनजज्ञेकुलविवर्द्धनः ४४

नंयुतंत्वं ३८ ४१ शक्रेणसहेतिशक्रवदेवत्वंप्राप्तंइत्युक्तं ४२ लोमपादापरनामादशरथोयमन्यः ४३ ऋष्यशृंगस्यशांताभर्तुःप्रसादेन ४४

श्रीः।।ः।।श्रीः।।ः।। श्रीः।।

ऋष्यशृंगोमंत्रोमुनिः तत्प्रसादेन ४६ वैभांडकिर्विभांडकपुत्रऋष्यशृंगः तस्यार्थेइंद्रवारणांऐरावतंवारणंवारिजलेरणतिचरतीतिवारणानांसमुद्रोद्भवमित्यर्थः

चतुरंगस्यपुत्रस्तुपृथुलाक्षइतिस्मृतः पृथुलाक्षसुतोराजाचंपोनाममहायशाः ४५ चंपस्यतुपुरीचंपायामालिनीयाभवत्पुरा पूर्णभ
द्रप्रसादेनहर्यंगोस्यसुतोभवत् ४६ ततोवैभांडकिस्तस्यवारणंशक्रवारणं अवतारयामासमहींमंत्रैर्वाहनमुत्तमं ४७ हर्यंगस्य
तुदायादोराजाभद्ररथःस्मृतः पुत्रोभद्ररथस्यासीद्बृहत्कर्माप्रजेश्वरः ४८ बृहद्दर्भःसुतस्तस्ययस्माज्जज्ञेबृहन्मनाः बृहन्मनास्तुरा
जेंद्रोजनयामासवैसुतं नाम्नाजयद्रथंवीरंयस्माद्दृढरथोनृपः ४९ आसीद्दृढरथस्यापिविश्वजिज्जनमेजय दायादस्तस्यकर्णस्तुविक
र्णस्तस्यचात्मजः ५० तस्यपुत्रशतंत्वासीदंगानांकुलवर्द्धनं बृहद्दर्भसुतोयस्तुराजानाम्नाबृहन्मनाः ५१ तस्यापत्नीद्वयंचासीच्चैद्य
स्यैतेसुतेशुभे यशोदेवीचसत्याचताभ्यांवंशःप्रभिद्यते ५२ जयद्रथस्तुराजेंद्रोयशोदेव्यांव्यजायत ब्रह्मक्षत्रोत्तरःसत्यांविजयो
नामविश्रुतः ५३ विजयस्यधृतिःपुत्रस्तस्यपुत्रोधृतव्रतः धृतव्रतस्यपुत्रस्तुसत्यकर्मामहाव्रतः ५४ सत्यकर्मसुतश्चापिसू
तत्व धिरथस्तुवैयःकर्णंप्रतिजग्राहततःकर्णस्तुसूतजः ५५ एतद्वःकथितंसर्वंकर्णंप्रतिमहाबलं कर्णस्यवृषसेनस्तुवृ
षस्तस्यात्मजःस्मृतः ५६ ॥:॥:॥:

पृ० ५२ ब्रह्मक्षत्रोत्तरः ब्राह्मक्षत्रोत्तरः ब्राह्मणेभ्यःशांत्यादिनाक्षत्रियेभ्यःशौर्यादिनाउत्तरःश्रेष्ठः ५३ ५४ सत्यकर्मणःपुत्रःसूतःब्राह्मण्यांक्षत्रियाज्जात
सूतएतेनैवतस्यब्राह्मणीपरिग्रहःसूच्यते ५५ ५६ ॥:०

ह॰टी॰ ८

पृ॰ एकत्रिंशः अनाधृष्यः अजय्यः अचेयुपुत्रे १ समतिनारो जातइतिशेषः २ तंसुर्नामतः आद्योज्येष्ठः तंसुरोधस्रुपपाठः ३ ४ काण्वायनाः कण्वस्य
गोत्रापत्यानि ५ हेभूप मल्लकाविस्यकन्या इलिनीआसीत्सः ईलिनो नाम नाजाभेस्वाद्धिनिर्ब्राह्मणसमुदायेन अधिअधिकः आसीत् तंसुष्वतार्इलिनांस्त्री

एतेऽगवंशजाः सर्वेराजानःकीर्तितामया सत्यव्रतामहात्मानःप्रजावंतोमहारथाः ५७ ऋचेयोस्तुमहाराजरौद्राश्वतनयस्यवै
शृणुवंशमनुप्रोक्तंयत्रजातोसिपार्थिव ५८ इतिश्रीमहाभारतेखिलेषुहरिवंशेकक्षेयुवंशानुकीर्तने ३१ वैशंपायनउ॰ अनाधृष्टि
सुतोराजर्षिर्ऋचेयुस्त्वेकराट्स्मृतः ऋचेयोर्ज्वलनानामभार्यावैतक्षकात्मजा १ तस्यांसरेयाराजर्षिम्मतिनारोमहीपतिः मतिना
रसुतास्त्वासंस्त्रयः परमधार्मिकाः २ तंसुरोधः प्रतिरथः सुबाहुश्चैवधार्मिकः गौरीकन्याचविख्याताताभांधातृजननीशुभा ३ सर्वे
वेदव्रतस्नाताब्रह्मण्याः सत्यवादिनः सर्वेकृतास्त्रावलिनः सर्वेयुद्धविशारदाः ४ पुत्रोप्रतिरथस्यासीत्कण्वः समभवन्नृपः मे
धातिथिःसुतस्तस्यप्रस्मात्काण्वायनाद्विजाः ५ ईलिनीभूपपस्यासीत्कन्यावैजनमेजय ब्रह्मवादिन्यधिस्त्रीचतंसुस्तामभ्यगच्छ
तः ६ तंसोःसुरोधोराजर्षिर्धर्मनेत्रःप्रजापवान् ब्रह्मवादिपराक्रांतस्तस्यभार्योपदानवि ७ उपदानवीसुतान्लेभेचतुर
स्त्वानसुरोधतः दुष्यंतमथसुष्कंतंप्रवीरमनघंतथा ८ ॥:॥:॥:॥:॥:॥:

यंभार्यात्वेअभ्यगच्छत्अधिगतवान्तस्मात्काण्वोऽभ्यजायतइलान्याम्नीतुयस्यासीत्कस्येतिपाठस्तत्रप्रश्नार्थकः तंसुनामानाकुजनपौत्रस्यदुहितापाणिगृहीतेत्येव
मथकवारयुक्तम् ६ धर्मनेत्रः धर्मस्यप्रवर्तकः ७ ८

१० दौष्यंतिं प्रति राजानमिति सार्द्धश्लोकद्वयं स्पष्टार्थं पुराण्यादिषुदर्शिता ११ आंगिरसः आंगिरसो वा पुत्रं भरद्वाजः क्रतुभिः क्रतुदेवताभिर्मरुद्भिः संक्रामितः भरतपुत्र
त्वं प्रापितः १२ १३ धर्मसंक्रमणाद्वा चेष्ट्या अयाजयदिति वितथमातृभिः पुत्रघातनात् १४ १७ काशिकस्येति दीर्घो काशिकगृत्समदौ आयुसंतानाद्दृष्टशर्मसुहोत्रक्र

दुष्यंतस्यापि दायादो भरतो नाम वीर्यवान् स सर्वदमनो नाम नागायुतबलो महान् ९ चक्रवर्ती सुतो जज्ञे दुष्यंतस्य महात्मनः शकुंतला
यां भरतो यस्य नाम्नाथ भारताः १० दौष्यंतिं प्रति राजानं वागुवाचाशरीरिणी माता भस्त्रा पितुः पुत्रो येन जातः स एव सः भरस्व पु
त्रं दुष्यंत मावमंस्थाः शकुंतलां रेतोधाः पुत्र उन्नयति नरदेव यमक्षयात् त्वं चास्य धाता गर्भस्य सत्यमाह शकुंतला भरतस्य विनष्टे
षु तनयेषु महीपतेः मातृणां तात कोपेन यत्तत्ते कथितं मया ११ बृहस्पतेरांगिरसः पुत्रो राजन्महामुनिः संक्रामितो भरद्वाजो मरुद्भिः
क्रतुभिर्विभुः १२ अत्रैवोदाहरंतीमं भरद्वाजस्य धीमतः धर्मसंक्रमणं चापि मरुद्भिर्भरताय वै १३ अयाजयद्भरद्वाजो मरुद्भिः
क्रतुभिर्हितं पूर्वं तु वितथे तस्य कृते वै पुत्रजन्मनि १४ ततोऽथ वितथो नाम भरद्वाजात्सुतोऽभवत् पौत्रैः पात्रेऽथ जाते भरत
स्तु दिवं ययौ १५ वितथं चाभिषिच्याथ भरद्वाजो वनं ययौ स राजा वितथः पुत्रान्जनयामास पंच वै १६ सुहोत्रं च सुहोतारं
गयं गर्गं तथैव च कपिलं च महात्मानं सुहोत्रस्य सुतद्वयं १७ काशिकश्च महासत्वस्तथा गृत्समतिर्नृपः तथा गृत्समतेः पु
त्रा ब्राह्मणाः क्षत्रिया विशः १८ ॥ः॥ः ॥ः

मेणाचतुर्थौ इमौ तु तस्मादेव नहुषययातिपूर्वादिक्रमेण एकविंशस्य सुहोत्र
स्य पुत्रो जातो अतिविप्रकर्षान्नतौ इमौ अत एव रंभनामभेदोपि गृत्समदो गृत्समतिरित्यादिष्टे ष्यते १८ ॥ श्रीः श्रीः श्रीः श्रीः ॥

ह॰ टी॰
७८

१८ दिवोदासपदं सुमारयति दिवोदास इतीति दिवः सप्तस्वर्गान् दस्यति उपक्षिणोति स्वात्मैश्वर्यबलेनेति दिवोदासः कर्मण्यण् विभक्तेरलुक् आर्षः २१ समाना न्वये ययासेमान्नामानो भवंति एवं समानकर्माणोपि भवंति तेन यपन पूर्वं दिवोदासवत् अनेनापि वाराणस्यां राज्यादिकं कृतं षष्ठे निकुंभादि वचनं कुंभांतरो रूपे न वाराणसी शप्ता तद्वत्सर्वं क्षेमकवंशेपि क्षेमकांतो राजा निवेशिता तेनादि एकस्मिन्नपि कल्पेऽसकृत् समाननामकर्मणां पुंसां जन्म न विरुध्यत इत्यभिप्रेत्याह एत

काशिकस्य तु काशेयः पुत्रो दीर्घतपास्तथा बभूव दीर्घतपसो विद्वान् धन्वंतरिः सुतः १९ धन्वंतरेस्तु तनयः केतुमानिति विश्रुतः अथ केतुमतः पुत्रो विद्वान् भीमरथः स्मृतः २० सुतो भीमरथस्यापि वाराणस्यधिपोऽभवत् दिवोदास इति ख्यातः सर्वरक्षःप्रणाशनः २१ एतस्मिन्नेव काले तु पुरीं वाराणसीं नृप शून्यां निवेशयामास क्षेमको नाम राक्षसः २२ शप्ता हि सा मतिमता निकुंभेन महात्मना शून्या वर्षसहस्रं वै भवित्रीति नराधिप २३ तस्यां तु शप्तमात्रायां दिवोदासः प्रजेश्वरः विषयांते पुरीं रम्यां गोमत्यां संन्यवेशयत् २४ भद्रश्रेण्यस्य पूर्वं तु पुरी वाराणसी भवत् यदुवंशप्रसूतस्य राज्ञस्तस्य महात्मनः तस्य च २५ भद्रश्रेण्यस्य दायादं हत्वा शत्रुं च पुरीं गोमत्यां संन्यवेशयत् भद्रश्रेण्यस्य पुत्राणां शतमुत्तमधन्विनां हत्वा निवेशयामास दिवोदासः प्रजेश्वरः २६ ॥

क्षितंतरे इत्यादि २३ २४ भद्रश्रेण्यस्येति पूर्वो दिवोदासं प्राप्य वैवस्वतो दिक्रमेणा दशमः भद्रश्रेण्यस्तु नहुषादिक्रमेणाद्य वंशजो एकादशः यदोस्तु षष्ठमः तयोः समानकालजत्वाद्विरोधः सुव्यक्तः यत्र आयोः नहुषादिक्रमेणा पुरूरवसः षड्विंशो दिवोदासः तस्मात् तोऽष्टमेन भद्रश्रेण्येन सहास्य तत्कालत्वि मकर्षो विरोधो न संभवतीति अपरः समानकालीनोऽन्य एव भद्रश्रेण्यो नेयः इति भावः २६ ॥:॥ ::॥ :::॥

राम॰
७७

३० अष्टारथः प्रतर्दनः भीमरथस्येति दिवोदासस्य विशेषणं तस्य दुर्दमस्य बालेष्वमर्षेषु पुत्रेषु ३१ अलर्कः प्रतर्दनस्य पौत्रः पुनर्निवेशयामासेति तत्रापि

दिवोदासस्यपुत्रस्तुवीरोराजाप्रतर्दनः प्रतर्दनस्यपुत्रौद्वौवत्सोभार्गस्तथैवच २७ अलर्कोवत्सपुत्रस्तु तस्मात्सन्नतिरात्मजः भद्रश्रे
ण्यस्यपुत्रोवैदुर्दमोनामविश्रुतः २८ हैहयस्यतदापापंकृतवान्वैमहीपतिः आजह्रेपितृदायाद्यंदिवोदासहृतंबलात् २९ भद्रश्रे
ण्यस्यपुत्रेणदुर्दमेनमहात्मना दिवोदासेनबालेतिघृणयासविसर्जितः ३० अष्टारथोनामनृपःसुतोभीमरथस्यवै तेनपुत्रेषु
बालेषुप्रहृतंतस्यभारत ३१ वैरस्यान्तंमहाराजक्षत्रियेणविधि त्सता अलर्कःकाशिराजस्तुब्रह्मण्यःसत्यसंगरः ३२ षष्टिं
वर्षसहस्राणिषष्टिंवर्षशतानिच तस्यासीत्सुमहद्राज्यंरूपयौवनशालिनः ३३ युवारूपेणसंपन्नआसीत्काशिकुलोद्वहः लो
पामुद्राप्रसादेनपरमायुरवापसः ३४ शापस्यान्तेमहाबाहुर्हत्वाक्षेमकराक्षसं रम्यांनिवेशयामासपुरींवाराणसींनृपः ३५ अ
लर्कस्यतुदायादःसुनीथोनामधार्मिकः सुनीथस्यतुदायादःक्षेम्योनाममहायशाः ३६ क्षेम्यस्यकेतुमान्पुत्रोवर्षकेतुस्ततोभ
वत्वर्षकेतोस्तुदायादोविभुर्नामप्रजेश्वरः ३७ आनर्तस्तुविभोःपुत्रः सुकुमारस्ततोभवत् सुकुमारस्यपुत्रस्तुसत्यकेतु
र्महारथः ३८ सुतोभवन्महातेजाराजापरमधार्मिकः वत्सस्यवत्सभूमिस्तुभर्गभूमिस्तुभार्गवात् ३९ एतेत्वंगिरसःपुत्रा
जातावंशेथभार्गवे ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चभरतर्षभ ४० ॥ ः॥ः ॥ः ॥ः ॥ः

नाद्वयः ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ॥ ः ॥ ः॥ः

सुहोत्रस्यवितथपुत्रस्य ५१.५२ सत्यवतीविश्वामित्रादीनांकनीयसी ५३ ६२ ॥:॥ ॥:॥ ॥:॥ :॥: ॥:॥:॥:॥:

सुहोत्रस्यवृहत्पुत्रोवृहतस्तनयास्त्रयः अजमीढोद्विमीढश्चपुरुमीढश्चवीर्यवान् ४१ अजमीढस्यपत्न्यस्तुतिस्रोहयसमन्विताः
नीलिनीकेशिनीचैवधूमिनीचवरांगना ४२ अजमीढस्यकेशिन्यांजज्ञेजह्नुः प्रतापवान् आजह्रेयोमहासत्रंसर्वमेधमहामखं ४३
पतिलोभेनयंगंगायतिंत्वभिससारह नेच्छतःप्लावयामासतस्यगंगासदस्ततः ४४ तयाप्लावितंदृष्ट्वायज्ञवाटंसमंततः जह्नुर
प्यब्रवीद्गंगांक्रुद्धोभरतसत्तम ४५ एषतेत्रिषुलोकेषुसंक्षिप्यापःपिबाम्यहं अस्यगंगेवलेपस्यसद्यःफलमवाप्नुहि ४६ ततः
पीतांमहात्मानोदृष्ट्वागंगांमहर्षयः उपनिन्युर्महाभागांदुहितृत्वेनजाह्नवीं ४७ युवनाश्वस्यपुत्रींतुकावेरींजह्नुरावहत् गंगाशापे
नदेहार्द्धंयस्याः पश्चान्नदीकृतं ४८ जह्नोस्तुदयितःपुत्रोह्यजकोनामवीर्यवान् अजकस्यतुदायादोबलाकाश्वोमहीपतिः
४९ वभूवमृगयाशीलःकुशिकास्तस्यचात्मजः पह्नवैःसहसंवृद्धोराजावनचरैस्तदा ५० कुशिकस्तुतपस्तेपेपुत्रमिंद्रसमप्रभुं ल
भेयमितितंशक्रस्त्रासादभ्येत्यजज्ञिवान् ५१ सगाधिरभवद्राजामघवान्कौशिकःस्वयं विश्वामित्रस्तुगाधेयोराजाविश्वाथस्त
था ५२ विश्वजिद्विश्वकृच्चैवतथासत्यवतीनृप ऋचीकाज्जमदग्निस्तुसत्यवत्यामजायत ५३ विश्वामित्रस्यतुसुतादेवराता
दयः स्मृताः प्रख्यातास्त्रिषुलोकेषुतेषांनामानिमेशृणु ५४ देवश्रवाःकतिश्चैवयस्मात्कात्यायनाःस्मृताः शालावत्यां
हिरण्याक्षोरेणोर्जज्ञेथरेणुमान् ५५ सांकृत्योगालवोराजन्मौद्गल्यश्चेतिविश्रुताः ॥ :॥ :॥ :॥ :॥ :॥

६१ अजमीढस्यबृहतःपुत्रस्यपत्न्यांतोपेमस्वांतरमाहअजमीढइति ६२ तेषांपंचानांदेशानांरक्षणेअलंसमर्थाएतेइतिश्रुतत्वात्पंचालाइतिनाम ६७ ६९

तेषांख्यातानिगोत्राणिकौशिकानांमहात्मनां ५६ पाणिनोबभ्रवश्चैवध्यानजप्यास्तथैवच पार्थिवादेवराताश्चशालंकायनसौश्रुताः ५७
लौहित्यायमदूताश्चतथाकारीषयःस्मृताः सौश्रुताःकौशिकाराजंस्तथान्येसैंधवायनाः ५८ ऋष्यंतरविवाहाश्चकौशिकाबहवःस्मृताः
पौरवस्यमहाराजब्रह्मर्षेकौशिकस्यच ५९ संबंधोप्यस्यवंशेस्मिन्ब्रह्मक्षत्रस्यविश्रुतः विश्वामित्रात्मजानांतुशुनःशेपोग्रजःस्मृतः ६० भा
र्गवःकौशिकत्वंहिप्राप्तःसमुनिसत्तमः देवरातादयश्चान्येविश्वामित्रस्यवैसुताः ६१ दृषद्वतीसुतश्चापिविश्वामित्रात्तथाष्टकः अष्टक
स्यसुतोलौहिःप्रोक्तोजह्नुगणोमया ६२ आजमीढोपरोवंशःश्रूयतांपुरुषर्षभ अजमीढस्यनीलिन्यांसुशांतिरुदपद्यत ६३ पुरुजातिः
सुशांतेस्तुवाह्याश्वःपुरुजातितः वाह्याश्वतनयाःपंचबभूवुरमरोपमाः ६४ मुद्गलःसृंजयश्चैवराजाबृहदिषुस्तथा यवीनरश्च
विक्रांतःकृमिलाश्वश्चपंचमः ६५ पंचेमेरक्षणायालंदेशानामितिनःश्रुतं पंचानांविद्धिपंचालान्स्फीतैर्जनपदैर्वृतान् ६६ अ
लंसंरक्षणेतेषांपंचालाइतिविश्रुताः मुद्गलस्यतुदायादोमौद्गल्यःसुमहायशाः ६७ सर्वएतेमहात्मानःक्षत्रोपेताद्विजातयः ए
तेह्यांगिरसःपक्षंसंश्रिताःकाण्वमुद्गलाः ६८ मुद्गलस्यसुतोज्येष्ठोब्रह्मर्षिःसुमहायशाः इंद्रसेनायतोगर्भंवध्र्यश्वंप्रत्यपद्यत
६९ वध्र्यश्वान्मिथुनंजज्ञेमेनकायामितिश्रुतिः दिवोदासश्चराजर्षिरहल्याचयशस्विनी ७० शरद्वतस्तुदायादमहल्यासमसू
यतशतानंदमृषिश्रेष्ठंतस्यापिसुमहायशाः ७१

अयंदिवोदासोब्राह्मणः ७० शरद्वतोगौतमस्य ७१ ॥ग॥

सत्यधृतेः शरद्वतः पौत्रस्य पूर्वं शरद्वतः सकाशात्कृपस्य जन्म उक्तं अतो यं सत्यधृतिः पितामहस्य समानं नामेति गम्यते अत्रेयं कथा शरद्वजः तपोविघ्नार्थं आग
तां जालपदामप्सरसं दृष्ट्वा शरद्वांश्शुक्रमेणाचनद्द्वाकं तरात्नद्भुता ततस्तामनुधावतो महर्षे रेतस्स्कन्नं ततो मिथुनं जातमिति ७२ ३४ दिवोदासस्य त्रियस्य ७५

पुत्रः सत्यधृतिर्नाम धनुर्वेदस्य पारगः तस्य सत्यधृते रेतो दृष्ट्वाप्सरसमग्रतः ७१ अवस्कन्नं शरस्तम्बे मिथुनं समपद्यत कृपया तच्च जग्राह शं
तनुर्मृगयां गतः ७२ कृपः स्मृतः स वै तस्माद्गौतमी च कृपी तथा एते शारद्वताः प्रोक्ता एते ते गौतमाः स्मृताः ७४ अत ऊर्ध्वं प्रवक्ष्या
मि दिवोदासस्य संततिं दिवोदासस्य दायादो ब्रह्मर्षिर्मित्रयुर्नृपः ७५ मैत्रायणास्ततः शाखा मैत्रेयास्तु ततः स्मृताः एते वंशे संश्रि
ताः पक्षाः क्षत्रोपेतास्तु भार्गवाः ७६ आसीत्पंचजनः पुत्रः सृंजयस्य महात्मनः सुतः पंचजनस्यापि सोमदत्तो महीपतिः ७७ सोम
दत्तस्य दायादः सहदेवो महायशाः सहदेवसुतश्चापि सोमको नाम पार्थिवः ७८ अजमीढात्पुनर्जातः क्षीणे वंशे तु सोमकः
सोमकस्य सुतो जंतुर्यस्य पुत्रशतं बभौ ७९ तेषां यवीयान्पृषतो द्रुपदस्य पिता प्रभुः धृष्टद्युम्नस्तु द्रुपदाद्धृष्टकेतुश्च तत्सुतः ८०
अजमीढाः स्मृता ह्येते महात्मानस्तु सोमकाः पुत्राणामजमीढस्य सोमकत्वं महात्मनः ८१ महिषी त्वजमीढस्य धूमिनी
पुत्रगृद्धिनी तृतीया यातवृद्धेषु षां जननी पृथिवीपते ८२ सा तु पुत्रार्थिनी देवी व्रतचर्यासमन्विता तपो वर्षायुतं तेपे स्त्रीभिः
सुदुश्चरं ८३ हुत्वाग्निं विधिवत्सा तु पवित्रमितभोजना अग्निहोत्रकुशेष्वेव सुष्वाप जनमेजय ८४

७८ अजमीढात्सहदेवात्तत्सुतस्य यतेर्यस्य सुतस्तस्थानेपुत्रशतं बभौ शतं पुत्रास्तु दृश्यन्ते नैव पश्चनाशागस्य कृतवान् ७९ यवीयान्कनीयान् ८०
८१ तृतीया अजमीढस्य भार्याणां ८२ ८४ ॥ ॥ श्री ॥ श्रीः ॥ ॥ ॥ श्रीः श्रीः ॥ ॥ श्रीः श्रीः ॥

८५ प्रयागादतिक्रम्य प्रयागेऽस्मात्कुरुक्षेत्रं स्थानं चकार ८६ ८७ अरिमेजयः शत्रुकंपनः एते त्वेशापूर्वपदस्य मुमागमेश्च ८८ ८९ कृतयत्तो बृहद्यागैरि
ज्ञावसुं जनयामासेति सार्द्धश्लोको वाक्यं ९० चैद्यश्चेदिदेशपः सचासौ उपरिचरश्चेति समासः बहून्पुत्रान्सप्तत्वे भार्वं एकां सा मत्स्या भूत्वा जनयामासेत्सहूत्यार्थः
९१ कुशस्तृतीयः ९२ माहतः चतुर्थः यदुः पंचमः मत्स्यः मत्स्योत्काशात् काली सत्यवती षष्ठी मत्नमः सप्तमः पुत्रः पर्वतो नाम वनादर्गायं ९३ ९४ य

धूमिन्यामथपार्हेयात्तजमीढः समेयिवान् ऋक्षं सा जनयामास धूमवर्णं सुदर्शनं ८५ ऋक्षात्संवरणो जज्ञे कुरुः संवरणात्तथा यः
प्रयागादतिक्रम्य कुरुक्षेत्रं चकार ह ८६ पुण्यं च रमणीयं च पुण्यकृद्भिर्निषेवितं तस्यान्ववायः सुमहान्यस्य नाम्नाथ कौरवाः ८७
कुरोस्तु पुत्राश्चत्वारः सुधन्वा सुधनुस्तथा परीक्षित्तु महाबाहुः प्रवरश्चारिमेजयः ८८ सुधन्वनस्तु दायादः सुहोत्रो मतिमांस्ततः च्य
वनस्तस्य पुत्रस्तु राजा धर्मार्थकोविदः ८९ च्यवनात्कृतयज्ञस्तु इष्ट्वा यज्ञैः स धर्मवित् विश्रुतं जनयामास पुत्रमिंद्रसखं नृपः ९०
चैद्योपरिचरं वीरं वसुनामांतरिक्षगं चैद्योपरिचराज्जज्ञे गिरिका सप्त मानवान् ९१ महारथो मगधराड् विश्रुतो यो बृहद्रथः प्रत्यग्रहः
कुशश्चैव यमाहुर्मणिवाहनं ९२ शाकलश्च यदुश्चैव मत्स्यकाली च सप्तमी बृहद्रथस्य दायादः कुशाग्रो नाम विश्रुतः ९३ कुशा
ग्रस्यात्मजो विद्वान्नृषभो नाम वीर्यवान् ऋषभस्यापि दायादः पुष्पवान्नाम धार्मिकः दायादस्तस्य विक्रांतो राजा सत्यहितः स्मृतः ९४
तस्य पुत्रः स धर्मात्मा नाम्नाऊर्ज्जस्तु ऊर्ज्जितवान् ऊर्ज्जस्य संभवः पुत्रो यस्य जज्ञे स वीर्यवान् ९५ शकले द्वे स वै जातो जरया संधितः सुत
जरयासंधितो यस्माज्जरासंधस्ततः स्मृतः ९६ सर्वक्षत्रस्य जेतासौ जरासंधो महाबलः जरासंधस्य पुत्रो वै सहदेवः प्रतापवान् ९७

स्य यस्मात्संभवाख्यात्सः जरासंधः बृहद्रथाज्जरासंध इति प्रापुक्तं इदानीं तस्मात् षष्ठोयमित्युक्तं तत्र द्वितीयो बृहद्रथः संभवाख्य इति वा कल्पभेदात्क्र
मभेद इति वा समाधेयं ९६ ९७ ॥॥॥॥

९८ परीक्षितः कुरोर्द्वितीयपुत्रस्य ९९ १०० जनमेजयस्य पुत्रौ मणिमत्यां जातोऽश्वभौमौ १०१ १०२ दिलीपः पूर्वोक्तादृक्षात्कुरुपितामहाद्दशमः १०३ १०५
सप्तहाश्वमेधविधशमिवाह्यः साध ज्ञाने धर्मे कर्मे वित्ताने। उपायसंग्रहे मदर्थे भुभुजानि सप्ताप्तिः सप्तभिर्धामतेति। ज्ञाने शास्त्रीये। विज्ञाने युक्तिकौशले

सहदेवात्मजः श्रीमानुदायुः स महायशाः उदायुर्जनयामास पुत्रं परमधार्मिकं ९८ श्रुतशर्मेति नामानं गधान्मोवसद्विभुः परिक्षि
तस्तु दायादो धार्मिको जनमेजयः ९९ जनमेजयस्य दायादास्त्रय एव महारथाः श्रुतसेनोग्रसेनोच भीमसेनश्च नामतः १००
एते सर्वे महाभागा विक्रान्ता बलशालिनः जनमेजयस्य पुत्रौ तु सुरथो मतिमांस्तथा १ सुरथस्य तु विक्रान्तः पुत्रो जज्ञे विदूरथः वि
दूरथस्य दायादस्त्वृक्ष एव महारथः २ द्वितीयः स च भो राजन्नाम्ना तेनैव विश्रुतः द्वावृक्षौ तव वंशेऽस्मिन्द्वावेव च परीक्षितौ ३
भीमसेनास्त्रयो राजन्द्वौ चापि जनमेजयौ ऋक्षस्य तु द्वितीयस्य भीमसेनोऽभवत्सुतः ४ प्रतीपो भीमसेनात्तु प्रतीपस्य च शंतनुः देवा
पिर्बाह्लिकश्चैव त्रय एव महारथाः ५ शंतनोः प्रसवस्त्वेष यत्र जातोऽसि पार्थिव बाह्लिकस्य तु राज्यं च सप्तबाह्यं नरोक्ष्याः ६ बा
ह्लिकस्य सुतश्चैव सोमदत्तो महायशाः जज्ञिरे सोमदत्तात्तु भूरिर्भूरिश्रवाः शलः ७ उपाध्यायस्तु देवानां देवापिरभवन्मुनिः च्य
वनस्य कृतपुत्र इष्टश्चासीन्महात्मनः १०८

इष्टे मदर्थे शारीरभोगे चंदनताम्बूलादौ शेषं स्पष्टं अन्ये तु सप्तकं गणाभ्यां बाह्यंश्रम्यमित्याहुः सप्तकं गोश्च सप्त ग्राम्याणि सप्त महारत्नानि तथा गजवाजिरथा
न्नेषु ५ निधिमालावरद्रुमाः ६ शक्तिः सार्धमेतिष्ठन्नं विमानानि चतुर्दशेति अस्वाणि वद्घवर्त्तिनि रथ्यकानि निधिर्निधानं मालास्रक्कुङ्कुमाः दिव्यास्त्वप
कारयः सातिः सारद्वाडिमानंम्राहालः १०७ १०८ ॥

११ १२ अनपत्यः स उत्रापस्तरहितः १८ संवर्त्तीयकालिते रन्नामती संवर्त्तेन च दुष्यंतपित्रे सुते प्राप्य दत्तात्तीनस्मात् दुष्यंतं पुत्रं लेभे १९ अतएव तुर्वसोर्वं

शांतनुस्त्वभवद्राजा कौरवाणां धुरंधरः शंतनोः संप्रवक्ष्यामि यत्र जातोसि पार्थिव ९ गांगं देवव्रतं नाम पुत्रं सोऽजनयत्प्रभुः सतु भीष्म इ
ति ख्यातः कौरवाणां पितामहः १० काली विचित्रवीर्यं तु जनयामास भारत शंतनोर्दयितं पुत्रं धर्मात्मानमकल्मषं ११ कृष्णद्वैपायन
श्चैव क्षेत्रे वैचित्रवीर्यके धृतराष्ट्रं च पांडुं च विदुरं चाप्यजीजनत् १२ धृतराष्ट्रस्तु गांधार्यां पुत्रानजनयच्छतम् तेषां दुर्योधनः श्रेष्ठः
सर्वेषामभवत्प्रभुः १३ पांडोर्धनंजयः पुत्रः सौभद्रस्तस्य चात्मजः अभिमन्योः परीक्षित्तु पिता तव जनेश्वर १४ ॥ एष ते पौर
वो वंशो यत्र जातोसि पार्थिव तुर्वसोस्तु प्रवक्ष्यामि द्रुह्योश्चानोर्यदोस्तथा १५ तुर्वसोस्तु सुतो वह्निर्गोभानुस्तस्य चात्मजः गोभा
नोस्तु सुतो राजा त्रैसानुरपराजितः १६ करंधमस्त्रैसानोर्मरुत्तस्तस्य चात्मजः अन्यस्त्वाविक्षितो राजा मरुत्तः कथितस्तव
१७ अनपत्योभवद्राजा यज्वा विपुलदक्षिणः दुहिता संमता नाम तस्यासीत्पृथिवीपतेः १८ दक्षिणार्थं हि सा दत्ता संवर्त्ता
य महात्मने दुष्यंतं पौरवं चापि लेभे पुत्रमकल्मषं १९ एवं ययातेः शापेन जरासंक्रमणे तदा पौरवं तुर्वसोर्वंशः प्रविवेश
नृपोत्तम २० दुष्यंतस्य तु दायादः करूत्थामः प्रजेश्वरः करूत्थामात्तथाक्रीडश्चत्वारस्तस्य चात्मजाः २१ पांड्यश्च केर
लश्चैव गोलश्चोलश्च पार्थिवः तेषां जनपदाः स्फीताः पांड्याश्चोलाः सकेरलाः २२ द्रुह्योस्तु तनयो राजन् बभ्रुः सेतुश्च
पार्थिवः अंगारः सेतुपुत्रश्च मरुतां पतिरुच्यते २३ ॥:॥ श्रीः श्रीः ॥:॥ श्रीः

शः पौरवंशं प्रविवेश असंक्रमणेनेति शेषः २० दुष्यंतस्य शकुंतलायामात्मजः अन्यस्यां भार्यायां करूत्थामश्चासीदित्यर्थः २१ २३ ॥:॥

१२८ द्वात्रिंशः बभ्रुः ९ अत्रिसंभवंदत्तंदत्तात्रेयमित्यर्थः १० सर्वमिमर्हैनएकोवाः ११ ॥छ॥ः॥छ॥ः॥छ॥ः॥छ॥ः॥०

यौवनाश्वेनसमरेकृच्छ्रेणापिहतोबली युद्धंसुमहदस्यासीन्मासानपीचतुर्दश २४ अंगारस्तुदायादोगांधारोनामपार्थिवः
ख्यायतेयस्यनाम्नावैगांधारविषयोमहान् २५ गांधारदेशजाश्चैवतुरगावाजिनांवराः आनर्त्तपुत्रोधर्मोधृतस्तस्यात्मजोऽभ
वत् २६ धृतात्तुदुर्दुहोजज्ञेप्रचेतास्तस्यचात्मजः प्रचेतसःसुचेतास्तुकीर्तितामनवोमया २७ यदोर्वंशंप्रवक्ष्यामिज्येष्ठस्योत्तम
तेजसः विस्तरेणानुपूर्व्याचगदतोमेनिबोधह १२८ इतिहरिवंशेपुरुवंशानुकीर्तनंनामद्वात्रिंशः वैशंपायनउवाच बभूवुस्तुयदोः
पुत्राःपंचदेवसुतोपमाः सहस्रदःपयोदश्चक्रोष्टानीलोऽंजिकस्तथा १ सहस्रदस्यदायादास्त्रयःपरमधार्मिकाः हैहयश्चहयश्चैव
राजावेणुहयस्तथा २ हैहयस्याभवत्पुत्रोधर्मनेत्रइतिश्रुतः धर्मनेत्रस्यकार्तिस्तुसाहंजस्तस्यचात्मजः ३ साहंजनीनामपु
रीतेनराज्ञानिवेशिता साहंजस्यतुदायादोमहिष्मान्नामपार्थिवः ४ माहिष्मतीनामपुरीयेनराज्ञानिवेशिता आसीन्महिष्म
तःपुत्रोभद्रश्रेण्यःप्रतापवान् ५ वाराणस्यधिपोराजाकथितःपूर्वमेवतु भद्रश्रेण्यस्यदायादोदुर्दमोनामविश्रुतः ६
दुर्दमस्यसुतोधीमानकनकोनामनामतः कनकस्यतुदायादाश्चत्वारोलोकविश्रुताः ७ कृतवीर्यःकृतौजाश्चकृतवर्म्मा
तथैवच कृताग्निस्तुचतुर्थोभूत्कृतवीर्यात्तथार्जुनः ८ यःसबाहुसहस्रेणसप्तद्वीपेश्वरोभवत् जिगायपृथिवीमेकोर
थेनादित्यवर्चसा ९ सहिवर्षायुतंतप्त्वातपःपरमदुश्चरं दत्तमाराधयामासकार्त्तवीर्योऽत्रिसंभवं १० तस्मैदत्तोवरान्प्रा
दाच्चतुरोभूरितेजसः पूर्वंबाहुसहस्रंतुप्रार्थितंसुमहद्वरं ११ ॥ः॥ः ॥ः ॥ः ॥ः ॥ः ॥ः ॥ः

अश्वमेधोगतिद्वौवो १२ संग्रामघ्नेनितिचतुर्थोवरः १३ योगात्योगबलात् मायया संकल्पमात्रेण १४ उग्रेणविधिनापूर्वेण १५ १८ गंधर्वोनुपबर्हणाख्योवरीदास

अधर्मेधीयमानस्यसद्भिस्तत्रनिवारणं उग्रेणपृथिवीजित्वास्वधर्मेणानुरंजनं १२ संग्रामान्सुबहून्जित्वाहत्वाशत्रून्सहस्रशः संग्रा
मेवर्त्तमानस्यबधंचाप्यधिकादृणी १३ तस्यबाहुसहस्रंतुयुध्यतः किलपार्थिव योगाद्योगेश्वरस्येवप्रादुर्भवतिमायया १४ तेनेयंपृथिवीसर्वा
सप्तद्वीपासपर्वता सप्तसमुद्रासनगराउग्रेणविधिनाजिता १५ तेनसप्तसुद्वीपेषुसप्तयज्ञशतानिवै प्राप्तानिविधिनाराज्ञाश्रूयन्तेजनमेजय
१६ सर्वेयज्ञामहाबाहोसहस्रशतदक्षिणाः सर्वेकांचनयूपाश्चसर्वेकांचनवेदयः १७ सर्वेदेवैर्महाराजविमानस्थैरलंकृताः गंधर्वैर
प्सरोभिश्चनित्यमेवोपशोभिताः १८ यस्ययज्ञेजगौगाथांगंधर्वोनारदस्तथा वरीदासात्मजोविद्वान्महिम्नातस्यविस्मितः १९ नारदउ
वाच नतूनंकार्त्तवीर्यस्यगतिंयास्यंतिपार्थिवाः यज्ञैर्दानैस्तपोभिर्वाविक्रमेणश्रुतेनच २० सहिसप्तसुद्वीपेषुचर्मीखड्गीशरासनीर
थीद्वीपाननुचरन्योगीसंदृश्यतेनृभिः २१ अनष्टद्रव्यताचैवनशोकोनचविभ्रमः प्रभावेणमहाराज्ञः प्रजाधर्मेणरक्षतः २२ ससर्व
रत्नभाक्सम्राट्चक्रवर्त्तीबभूवह पंचाशीतिसहस्राणिवर्षाणांवैनराधिपः २३ सएवपशुपालोभूत्क्षेत्रपालः सएवच सएववृष्ट्या
पर्जन्योयोगित्वेनततोभवत् २४ सवैबाहुसहस्रेणज्याघातकठिनेनच भातिरश्मिसहस्रेणशारदीवदिवाकरः २५

स्यगंधर्वपतेःपुत्रः १९ २० योगीकायव्यूहेनयुगपत्सप्तस्वपिद्वीपेषुदृश्यते २१ २२ २३ २४ २५ ॥ ॥ ॥ ॥ ॥

कार्त्तवीर्यस्यमाहात्म्यमाहसहीत्यादिना २५ प्रतिस्रोतःविपरीतप्रवाहं २६ शंकितानरेणामुक्तेतिशंकावतीऊर्म्यैतिसमुद्रमितिशेषः २७ २९ बाहूनांबाहुभिः

सहिनागान्मनुष्येषुमाहिष्मत्यांमहाद्युतिः कर्कोटकसुतान्जित्वापुर्यांतस्यन्यवेशयत् २५ सवैवेगंसमुद्रस्यप्रावृट्कालेंबुजेक्षणः क्रीडन्नि
वभुजोद्भिन्नंप्रतिस्रोतश्चकारह २६ लुंठिताक्रीडतातेनफेनस्रग्दाममालिनी चलदूर्मिसहस्रेणशंकिताभ्येतिनर्मदा २७ तस्यबाहुसहस्रे
णक्षुभ्यमाणेमहोदधौ भयान्निलीनानिश्चेष्टाः पातालस्थामहासुराः २८ चूर्णीकृतमहावीचिंचलन्मीनमहातिमिं मारुताविद्धफेनौ
घमावर्त्तक्षोभदुःसहं २९ प्रावर्त्तयत्तदाराजासहस्रेणचबाहुना देवासुरसमाक्षिप्तःक्षीरोदमिवमंदरः ३० मंदरक्षोभचकिताह्यमृतो
त्पादशंकिताः सहसोत्पतिताभीताभीमंदृष्ट्वानृपोत्तमं ३१ नतानिश्चलमूर्धानोबभूवुस्तेमहोरगाः सायाह्नेकदलीखंडैःकंपिता
स्तस्यवायुना ३२ सवैबध्वाधनुर्ज्याभिरुत्सिक्तंपंचभिःशरैः लंकेशंमोहयित्वातुसबलंरावणंबलात् निर्जित्यबद्धमानीयमाहिष्मत्यां
बबंधतं ३३ श्रुत्वातुबद्धंपौलस्त्यंरावणंत्वर्जुनेनतु ततोगत्वापुलस्त्यस्तमर्जुनंददृशेस्वयं ३४ मुमोचरक्षःपौलस्त्यंपुलस्त्येनानुया
चितः ३५ यस्यबाहुसहस्रस्यबभूवज्यातलस्वनः युगांतेत्वंबुदस्येवस्फुटतोह्यशनेरिव ३६ अहोबतमृधेवीर्यंभार्गवस्ययदाच्छि
नत् राज्ञोबाहुसहस्रंतुहैमंतालवनंयथा ३७ तृषितेनकदाचिच्चभिक्षितश्चित्रभानुना सभिक्षामददाद्वीरः सप्तद्वीपान्विभा
वसोः ३८ पुराणिग्रामान्घोषांश्चविषयांश्चैवसर्वशः जज्वालतस्यसर्वाणिचित्रभानुर्दिधक्षया ३९

प्रावर्त्तयत्शरीरभ्रमणेनावर्त्तितवान्क्षीरोदंमंदरइव ३० ३४ पौलस्त्यंपुलस्त्यापत्यंरक्षःराक्षसं ३५ ३६ राज्ञःकार्त्तवीर्यस्य ३७ विभावसोःवह्नेः ३८
३९ ॥:॥:॥:

४१ यन्निमित्तमृतेत्रापवोवसिष्ठः ४२ तेत्वयायद्दुष्करंकर्मजपादिकंकृतंतेनत्वमोहनिष्यतिनाशयिष्यति तत्पात्रयोभविष्यतोसर्पः ४३ ४४ अनष्ट

सतस्यपुरुषेंद्रस्यप्रभावेनमहात्मनः ददाहकार्त्तवीर्यस्यशैलांश्चैववनानिच ४० सशून्यमाश्रमंरम्यंवरुणस्यात्मजस्यवै ददाहवनवद्दी
प्तश्चित्रभानुःसहैहयः ४१ यंलेभेवरुणःपुत्रंपुराभास्वंतमुत्तमं वसिष्ठंनामसमुनिंख्यातआपवइत्युत यत्रापवस्तुतंक्रोधाच्छप्तवानर्जुनं
विभुः ४२ यस्मान्नवर्जितमिदंवनंतेममहैहय तस्मात्तेदुष्करंकर्मकृतमन्योहनिष्यति ४३ रामोनाममहाबाहुर्जामदग्न्यःप्रतापवान् छि
त्वाबाहुसहस्रंतेप्रमथ्यतरसाबली तपस्वीब्राह्मणस्त्वांचवधिष्यतिसभार्गवः ४४ वैशंपायनउ० अनष्टद्रव्यताचैवबभूवामित्रकर्शन प्र
भावेननरेंद्रस्यप्रजाधर्मेणरक्षतः ४५ रामात्ततोस्यमृत्युर्वैतस्यशापान्मुनेर्नृप वरश्चैवहिकौरव्यस्वयमेववृतःपुरा ४६ तस्यपु
त्रशतस्यासन्पंचशेषामहात्मनः कृतास्त्राबलिनःशूराधर्मात्मानोमनस्विनः ४७ शूरसेनश्चशूरश्चधृष्टोक्तःकृष्णएवच जय
ध्वजश्चनामासीदावंत्योनृपतिर्महान् ४८ कार्त्तवीर्यस्यतनयावीर्यवंतोमहाबलाः जयध्वजस्यपुत्रोभूत्तालजंघोमहाबलः ४९
तस्यपुत्राःसमाख्यातातालजंघाइतिस्मृताः तेषांकुलेमहाराजहैहयानांमहात्मनां ५० वीतिहोत्राःसुजाताश्चभोजाश्चावंत
यःस्मृताः तौंडिकेराश्चविक्रांतास्तालजंघास्तथैवच ५१ भरताश्चसुजाताश्चबहुत्वान्नानुकीर्त्तिताः ॥: ॥: ॥:

द्रव्यताप्रजानामितिशेषः ४५ स्वयमेववृतोदत्तात्रेयात् ४६ ४७ धृष्टोक्तः धृष्टनामाआवंत्यइतिजयध्वजस्यविशेषणं ४८ ॥ ५१ ॥:॥:॥

श्री:॥:॥ श्री:॥:॥: श्री:॥:॥४४॥

यदोः प्रथपुत्रस्य सहस्रदस्य वंशमुक्त्वा द्वितीयस्य पयोदस्य संततिमाह वृषेति अत्र पयोद एव वृषणांहेतोर्वृषशब्देनोच्यते पुण्यकर्मणः पुण्यकर्मणः ५३ ५४ भू
राइति श्लोकः प्रतकीर्तयेषु नास्ति ५५ ५६ भूतानि शप्रियमाराणि यल्लोकान्धारयंति तिष्ठत ५७ पंचानां विसर्गविविधं सर्गं वशीनियंता आत्मजानां देहजानां च

वृषभप्रजयोराजन्पारश्वाः पुण्यकर्मणः वृषोवंशधरस्तत्रतस्यपुत्रोभवन्मधुः मधोः पुत्रशतंत्वासीद्वृषणस्तस्यवंशकृत् ५३ वृष
णाद्वृष्णयः सर्वेमधोस्तुमाधवाःस्मृताः यादवायदुनाचाग्रेनिरुच्यंतेचहैहयाः ५४ शूराश्चशूरवीराश्चशूरसेनास्तथानघ शूरसे
नइतिख्यातास्तस्यदेशोमहात्मनः ५५ नतस्यवित्तनाशोस्तिनष्टंप्रतिलभेच्चसः कार्तवीर्यस्ययोजन्मकीर्तयेदिहनित्यशः ५६ ए
तेययातिपुत्राणांपंचवंशाविशांपते कीर्तितालोकवीराणांयेलोकान्धारयंतिवै भूतानीवमहाराजपंचस्थावरजंगमान् ५७
श्रुत्वापंचविसर्गंतुराजाधर्मार्थकोविदः वशीभवतिपंचानामात्मजानांतथेश्वरः ५८ लभेत्पंचवरांश्चैवदुर्लभानिहलौकिकान्
५९ आयुःकीर्तिंधनंपुत्रानैश्वर्यंभूतिमेवच धारणाच्छ्रवणाच्चैवपंचवर्गस्यभारत ६० क्रोष्टोस्तुशृणुराजेंद्रवंशमुत्तमपौरुषं यदो
र्वंशधरस्याथयज्वनःपुण्यकर्मणः ६१ क्रोष्टोर्हिवंशंश्रुत्वेमंसर्वपापैःप्रमुच्यते यस्यान्ववायजोविष्णुर्हरिर्वृष्णिकुलप्रभुः ६२
इतिश्रीखिलेषुहरिवंशेत्रयस्त्रिंशः वैशंपायनउवाच गांधारीचैवमाद्रीचक्रोष्टुर्भार्येबभूवतुः गांधारीजनयामासअनमित्रंम
हाबलं माद्रीयुधाजितंपुत्रंततोसंदेवमीढुषं तेषांवंशस्त्रिधाभूतोवृष्णीनांकुलवर्द्धनः १ ॥ ॥

द्रुयाणां ५८ ६० क्रोष्टुः यदोस्तृतीयपुत्रस्य ६१ इमंवंशमाणांअनोजातइतिशेषः ६२ त्रयस्त्रिंशः गांधारी १ ॥ ॥ श्रीः ॥ श्री ॥ ॥

माद्र्याः पुत्रस्युधाजितः ३ ४ विषये देशे ५ परिवर्तैरागमनमात्रे हरिवाहनः इंद्रः ६ गांदिनीनाम निर्वक्ति गां तु ददाविति ७ ९ जायपिष्यामि जन्मगृहीष्यामि

माद्र्याः पुत्रौ तु जज्ञाते सुतौ वृष्ण्यंधकावुभौ जज्ञाते तनयौ वृष्णेः श्वफल्कश्चित्रकस्तथा ३ श्वफल्कस्तु महाराज धर्मात्मा यत्र वर्त्तते नास्ति
व्याधिभयं तत्र नावर्षभयमप्युत ४ कदाचित्काशिराजस्य विभोर्भरतसत्तम त्रीणि वर्षाणि विषये नावर्षत्पाकशासनः ५ स तत्रावा
सयामास श्वफल्कं परमार्चितं श्वफल्कपरिवर्तेन ववर्ष हरिवाहनः ६ श्वफल्कः काशिराजस्य सुतां भार्यामविंदत गांदिनीनाम सा गां
तु ददौ विप्रेषु नित्यशः ७ सा मातुरुदरस्था वै बहून्वर्षगणान्किल निवसंती न वै जज्ञे गर्भस्थां तां पिताऽब्रवीत् ८ जायस्व शीघ्रं भद्रं
ते किमर्थं चेह तिष्ठसि प्रोवाच चैनं तु गर्भस्था सा कन्या गां दिने दिने ९ यदि दद्यास्ततोऽद्याहं जायेयमिति तां पिता तथेत्युवाच तां चास्याः
पिता काममपूरयत् १० दाता यज्वा च वीरश्च श्रुतवानतिथिप्रियः अक्रूरः सुषुवे तस्माच्छ्वफल्काद्भूरिदक्षिणः ११ उपासंगस्तथा मद्गु
र्मृदुरश्चारिमेजयः अरिक्षिपस्तथोपेक्षः शत्रुघ्नश्चारिमर्दनः १२ धर्मभृद्यतिधर्मा च गृध्रमोजास्तथांधकः आवाहप्रतिवाहौ च सुंद
री च वरांगना १३ अक्रूरेणोग्रसेनायां सुगात्र्यां कुरुनंदन प्रसेनश्चोपदेवश्च जज्ञाते देववर्चसौ १४ चित्रकस्याभवन्पुत्राः पृथुर्विपृ
थुरेव च अश्वग्रीवोऽश्वबाहुश्च सुपार्श्वकगवेषणौ १५ अरिष्टनेमिरश्वश्च सुधर्मा धर्मभृत्तथा सुबाहुर्बहुबाहुश्च श्रविष्ठाश्रव
णे स्त्रियौ १६ अश्मक्यां जनयामास शूरं वै देवमीढुषः महिष्यां जज्ञिरे शूराद्भोज्यायां तनया दश १७ ॥ः॥ः॥ः

१० ११ उपासंगादयोऽक्रूरभ्रातरः १२ १४ चित्रकस्याक्रूरभ्रातुः १५ १६ देवमीढुषः क्रोष्टुसंतीपः पुत्रः स्वांदंस्मादिरयमितसन्यो शूरसेनात्कार्त्तवीर्यपुत्रात्
सोमं १७ ॥ः॥ः॥ः॥ः

भागादत्वयमेवशंखंचक्रुः तत्रभगवदंशस्यभावित्वात् १८ आनकानांपटहानां १९ २० वसुदेवादयोगंडूषांताः दशशूरस्यपुत्राः पंचदुहितरः श्वसाऽदेवभागइ
त्यादिना २१ २२ चैद्यस्यदमघोषस्य २४ २५ पृथांकुंतींकुंतिःकुंतिभोजः २६ २७ अनमित्रात् क्रोष्टुःप्रथमपुत्रात् वृष्णिनंदनात्सर्वेयादवाल्हास्कात्

वसुदेवोमहाबाहुः पूर्वमानकदुंदुभिः जज्ञेयस्यप्रसूतस्यदुंदुभ्यः प्राणदन्दिवि १८ आनकानांचसंह्रादः सुमहानभवद्दिविपपात
पुष्पवर्षंचशूरस्यभवनेमहत् १९ मनुष्यलोकेकृत्स्नेस्मिन्रूपेणाप्रतिमोभुवि यस्यासीत्पुरुषाग्र्यस्यकांतिश्चंद्रमसोयथा २० देवभा
गस्ततोजज्ञेततोदेवश्रवाःपुनः अनाधृष्टिःकनवकोवत्सावानथगृंजिमः २१ श्यामःशमीकोगंडूषः पंचचास्यवरांगनाः पृथुकीर्तिः
पृथाचैवश्रुतदेवाश्रुतश्रवा २२ राजाधिदेवीचतथापंचैतावीरमातरः पृथांदुहितरंवव्रेकुंतिस्तांकुरुनंदन शूरःपूज्यायवृद्धायकुंति
भोजायतांददौ तस्मात्कुंतीतिविख्याताकुंतिभोजात्मजापृथा कुंभस्यश्रुतदेवायाजगृहुःसुषुकेनृप २३ श्रुतश्रवायांचैद्यस्तुशि
शुपालोमहाबलः हिरण्यकशिपुर्योसौदैत्यराजोभवत्पुरा २४ पृथुकीर्त्यांतुसंजज्ञेतनयोवृद्धशर्मणः करूषाधिपतिर्वीरोदंतवक्त्रो
महाबलः २५ पृथांदुहितरंचक्रेकुंतिस्तांपांडुरावहत् यस्यांसधर्मविद्राजाधर्माज्जज्ञेयुधिष्ठिरः २६ भीमसेनस्तथावाताद्दिंद्रा
च्चैवधनंजयः लोकेप्रतिष्ठितोवीरःशक्रतुल्यपराक्रमः २७ अनमित्राच्छिनिर्जज्ञेकनिष्ठाद्वृष्णिनंदनात् शैनेयःसत्यकस्तस्मा
द्युयुधानश्चसात्यकिः २८ असंगोयुयुधानस्यभूमिस्तस्याभवत्सुतः भूमेर्युगंधरःपुत्रइतिवंशःसमाप्यते २९ उद्धवोदेवभा
गस्यमहाभागःसुतोभवत् पंडितानांपरंप्राहुर्देवश्रवसमुद्भवं ३० ॥ः॥ः॥ः॥ः॥ः॥ः॥ः॥ः

२८ २९ देवभागस्यवसुदेवभ्रातुः देवश्रवःकीर्तिर्यस्यतंदेवश्रवसं ३० ॥ः॥ छ ॥ः॥ छ ॥ः॥ छ ॥ः॥ः छ ॥ः॥ः॥ छ ॥ः ॥ः ॥ः

देवश्रवाः वसुदेवस्य तृतीयो भ्राता शत्रुघ्नं पुत्रं प्रजापत ३१ स एव केनचिन्निमित्तेन बालएव परित्यक्तो निषादैः संवर्द्धित इति नैषादिर्नोतुष्णाद्देवश्रवा इति ३२
वत्सावान् गण्डूषश्च वसुदेवानुजौ ३३ विष्वक्सेनः श्रीकृष्णः सुतान् चारुदेष्णादीन् चतुःसंख्यान् ३४ चारुदेष्णपदं निर्वक्ति अनन्त्यामेति ह्यास्यां ३५ चारुदे
मिष्टान्नमसौ न दिशति अतिसृजतीति चारुदेष्णः ३६ कनवकस्य वसुदेवभ्रातुः आवंगजिमोन्नवंगजिमस्य वसुदेवभ्रातुः पुत्रौ ३७ श्यामकस्य वसुदेवभ्रातुः

अश्मक्यां प्राश्रवानपुत्रमनाधृष्टिर्यशस्विनं निवृत्तशत्रुं शत्रुघ्नं देवश्रवा व्यजायत ३१ देवश्रवाः प्रजातस्तु नैषादिर्यः परिश्रुतः एकलव्यो
महाराज निषादैः परिवर्द्धितः ३२ वत्सावते त्वपुत्राय वसुदेवः प्रतापवान् अद्भिर्दत्तौ सुतौ वीरौ शौरिः कौशिकमौरसम् ३३ गण्डूषाय
त्वपुत्राय विष्वक्सेनो ददौ सुतान् चारुदेष्णं सुचारुं च पंचालं कृतलक्षणम् ३४ असंग्रामेण यो वीरो नावर्त्तत कदाचन रौक्मिणेयो महा
बाहुः कनीयान्भ्रातर्षभः ३५ वायसानां सहस्राणि यं यान्तं पृष्ठतो ययुः चारुं मांसानि भोक्ष्याम चारुदेष्णहतानि च ३६ तंत्रिजस्तं
त्रिपालश्च सुतौ कनवकस्य तु वीरौ चावगहनुश्चैव वीरौ तावावगृजिमौ ३७ श्यामपुत्रः सुमित्रस्तु शमीको राज्यमावहत् जुगुप्स
मानो भोजत्वाद्राजसूयमवाप सः ३८ अजातशत्रुः शत्रूणां जज्ञे तस्य विनाशनः ॥ः॥ः॥७॥ ः ॥ ः॥

पुत्र इव पुत्रोऽनुज एव पुत्रीभूतः शमीको मृत इति शेषः सुमित्र इति पाठे पुत्रस्यैव विशेषणं शोभनमित्रत्वं भोजत्वात् एकदेशी राजा भोजाः नद्राज्ञत्वाज्जुगु
प्समानः आत्मानं निन्दन् राजसूयं साम्राज्यहेतुमवाप तत्र योग्यतां प्रदर्शयन् तस्य सुमित्रत्वं स्पष्टं अजातशत्रुरित्युक्तं न युधिष्ठिर इत्याशयः शमीको राजा
राजाऽभवदिति सार्द्धार्थः ३८ ॥ः॥ः ७॥ः॥ः ७॥ः॥ ७॥ः॥ ७॥ः॥ ७॥ः॥ ७॥ः॥ ७॥ः॥ ७॥ः

स२

हं०टी०
८५

४० चतुस्त्रिंशयाः १ सुनामांजाः पंचपौत्र्यः २ देवकांजाः सप्त देवकस्य दुहितरः पौरिचारिके भोगपत्न्यौ न तु दास्यौ यापत्न्य इत्युपक्रमात् ३ ५ चित्रां
तानि नवाप्यसानि संख्यायरोहिण्यास्तनयाः शेषास्तु क्तिरयुक्तेसाशंकाह चित्रा सुभद्रेति पुनर्विख्याताति चित्रा पुनर्जज्ञे सा च द्वितीयजन्मानि सुभद्रेति विख्याते

वसुदेवसुतान्वीरान्कीर्तयिष्यामि तान्शृणु ३९ कस्मेत्विविधमेतत्तु बहुशाखं महौजसं धारयन्विपुलं वंशं नानर्थैरिह युज्यते ४०
इति श्रीमहाभारते खिलेषु हरिवंशे वृष्णिवंशकीर्तनं नाम चतुस्त्रिंशः वैशंपायन उवाच याः पत्न्यो वसुदेवस्य चतुर्दश वरांगनाः
पौरवी रोहिणी नाम मदिरापि तथापरा १ वैशाखी च तथा भद्रा सुनामा चैव पंचमी सहदेवा शांतिदेवा श्रीदेवा देवरक्षिता २ वृ
कदेव्युपदेवी च देवकी चैव सप्तमी सुतनुर्वडवा चैव द्वे एते परिचारिके ३ पौरवी रोहिणी नाम बाल्हीकस्यात्मजाभवत् ज्येष्ठा प
त्नी महाराज दयितानकदुंदुभेः ४ लेभे ज्येष्ठं सुतं रामं सारणं शठमेव च दुर्दमं दमनं शुभ्रं पिंडारकमुशीनरं ५ चित्रा नाम कु
मारी च रोहिणीतनया दश चित्रा सुभद्रेति पुनर्विख्याता कुरुनंदन ६ वसुदेवाच्च देवक्यां जज्ञे शौरिर्महायशाः रामाच्च नि
शठो जज्ञे रेवत्यां दयितः सुतः ७ सुभद्रायां रथी पार्थादभिमन्युरजायत अक्रूरात्काशिकन्यायां सत्यकेतुरजायत ८
वसुदेवस्य भार्यासु महाभागासु सप्तसु ये पुत्रा जज्ञिरे शूरा नामतस्तान्निबोध मे ९ ॥:॥ ॥ : ॥ : ॥५

सर्षे इयमत्र पौराणिकी कथा चित्रा नाम काचित्स्त्री मुनिशापाद्रोहिण्या गर्भे वासं लेभे सा पुनर्जातमात्रा म्रियमाणा मया याद्वेषु ज्ञायमानस्य भगवतो ली
लानहृष्टाधिष्ठानामित्यनुतापं चकेन तस्य तपोबलात्तया पुनर्जन्मधृतवतीति तया सह दश सख्या सर्वे निर्णया ६ शौरिः श्रीकृष्णः ७ ८ ९

राम०
८५

१० त्रिगर्त्तराजस्य देवकस्य कन्या वृकदेवीति शैशिरायणः तस्यैव त्रिगर्त्तराजस्य मन्त्री पुरोहितः शैशिरायणो गार्ग्यः तद्दीपः शालोपादवपुर्दीपः पुरोहितः कश्चित्त
स्य पौरुषमस्ति न वेति जिज्ञासया परीक्षां चक्रे हस्तेन लिंगमभिमृष्टवान् अथ अनंतरं गार्ग्यपौरुषे पौरुषो रेतो न चस्कंद दृष्टमत्वात् तस्मान्नुस्थानात् तस्यातो हाकं विद्यापिनः
स्कंदे दृष्टे वृत्ते गार्ग्यो नपुंसक इति शालेनोक्त इत्यर्थः यथोक्तं विष्णुपुराणे गार्ग्यं गोष्ठीहुं शालः षंढ इत्युक्तवान् यदा यदूनां सन्निधौ सर्वे जहसुर्यादवास्तदा ११
कृष्णायसममः कोपेनासंतप्तकृष्णभावमापन्नः कोपेन च सास्मावदनं मषीवर्णमभूदित्यर्थः अतः दर्शनात् यतो मिथ्याभिशस्तः मिथ्यैव नपुंसकोपामिति अभिशा
पं प्रापितः अतो वैति विख्यातः द्वादशमे द्वादशवर्षे शांतकोपः मन्युना दैन्येनाभिशापजेन पारिप्लुतः सन्न मिशापनिहृत्यर्थं पामन्यमत्सादयिष्वा न गोपकन्यामु

भोजस्त्वविजयस्त्वेव वर्णांशादेवासुतावुभौ वृकदेवः सुनामा च यावेतौ सुतावुभौ अध्यावहं महात्मानं वृकदेवी व्यजायत १० क
न्या त्रिगर्त्तराजस्य भर्त्ता वै शिशिरायणः जिज्ञासां पौरुषे चक्रे न चस्कंदे च पौरुषम् ११ कृष्णायससमप्रख्यो वर्षे द्वादशमे तथा मि
थ्याभिशस्तो गार्ग्यस्तु मन्युनाभिसमीरितः १२ गोपकन्यामुपादाय मैथुनायोपचक्रमे गोपाली त्वप्सरास्तस्य गोपस्त्रीवेषधारिणी
१३

पादाय मैथुनायोपचक्रम इति सार्द्धः १२ कामी गोपकन्याकुतश्चाप्यत तस्य योग इत्याह सार्द्धेन गोपालीति अप्सरास्तु कृष्णायसमयः आप्य इति पठित्वा कृष्णायसं लोहं च
र्णा अमत्यत अय अश्मो लोहवर्णो इति व्याख्यायतं वैस्यवीर्यं समतिमान् तुः सुतमिच्छामत्यत्तेयषु दुवक्रभयावहं अगाधयन्महादेवं सोयस्तु गोमभज्ज्यपत द्वा
दशवर्षं तुसंतुष्टो वर्षे तु द्वादशे शिवः संयोजयामास वत्तं पद्मनेशो यवनात्मजः तद्योषित्संगमात्त्वास्य पुत्रोऽभूदालसप्रभः तं कालयवननामेति स इति तत्सहार्थो गा
र्ग्यः संयोजयामास तत्र भार्ययेति शेषः तत्र मातृभेदः कल्पभेदाभिप्रायेणा व्याख्येयः शेषं स्पष्टं १३ ॥:॥:॥:॥:॥:॥:॥:॥:॥:

१४ वृषस्यबलिवर्दस्येवपूर्वार्द्धकायोनाभेरूर्ध्वदेहप्रदेशोयेषांतेवृषपूर्वार्द्धकायाः १५ राज्ञोंतःपुरेववृधेइत्यनेनगोपाल्याः स्नुषासमयः शकुंतलावत्परित्यक्त इतिगम्यते १६ २० ईप्सवोजाताइतिशेषः २१ पंचत्रिंशः क्रोष्टोरेवेतियथाक्रमं क्रोष्टुवंशोजातएवंसत्यभामादयोपितत्रैवजाताइतिवक्ष्यत्यकारः स्वाहि

भार्यायामासगार्ग्यस्यगर्भेदुष्टंमहासुतं मानुष्यांगार्ग्यभार्यायांनियोगाच्छूलपाणिनः १४ सकालयवनोनामजज्ञेराजामहाबलः वृषपूर्वार्द्धकायास्तमवहन्वाजिनोरणे १५ अपुत्रस्यसराज्ञस्तुववृधेंतःपुरेशिशुः यवनस्यमहाराजसकालयवनोऽभवत् १६ सयुद्धकामोनृपतिःपर्यपृच्छद्द्विजोत्तमान् वृष्ण्यंधककुलंतस्यनारदोकथयद्विभुः १७ अक्षौहिण्यातुसैन्यस्यमथुरामभ्ययात्तदा दूतंचप्रेषयामासवृष्ण्यंधकनिवेशने १८ ततोवृष्ण्यंधकाःकृष्णंपुरस्कृत्यमहामतिं समेत्यमंत्रयामासुर्यवनस्यभयात्तदा कृत्वाचनिश्चयं सर्वेपलायनपरायणाः विहायमथुरांरम्यांमानयंतःपिनाकिनं २० कुशस्थलींद्वारवतींनिवेशयितुमीप्सवः इतिकृष्णस्यजन्मेदंयःशुचिर्नियतेंद्रियः पर्वसुश्रावयेद्विद्वाननृणःसमुखीभवेत् २१ इतिश्रीखिलेषुहरिवंशेकृष्णजन्मानुकीर्तनंनामपंचत्रिंशः वैशंपायनउ० क्रोष्टोरेवाभवत्पुत्रोवृजिनीवान्महायशाः वृजिनीवत्सुतश्चापिस्वाहिःस्वाहाकृतांवरः १ स्वाहिपुत्रोभवद्राजाउशद्गुर्वदतांवरः महाक्रतुभिरिष्टवान्विविधैराप्तदक्षिणैः २ सुतप्रसूतिमिच्छन्वैउशद्गुःसोग्र्यमात्मजं जज्ञेचित्ररथस्तस्यपुत्रः कर्मभिरन्वितः ३ ॥:॥:॥:

मासांसमानात्वयेपिसापिंड्यनिवृत्त्यर्थंपुरोहितगोत्रेणात्मनोन्यगोत्रत्वेदाद्विवाहाभवंतीतियुक्तएवेतिभावः १ २ सुतप्रसूतिंपुत्रप्रजांसमृद्धंआत्मजंरथन्त्रभृत्तत्सइष्टान्ः कर्मभिःपुत्रेष्ट्यादिभिः ३ ॥: श्रीःश्रीः

अनुष्ठितः आश्रितः ४ पार्थश्रवसं पृथुश्रवसः पुत्रं ५ उशतो नामतः स्वधर्मेषु यज्ञं उशतां कामयमानानां वरः श्रेष्ठः ६ ७ मरुत्तः धर्मं चचार तत्र हेतुः प्रेत्यभागि
नि मरणानंतरं स्वफलप्रदानेन सेवते अमेध्यापि आकूसेवनकृत यतो तस्माच्चचार ततस्तस्मात्सुतं लेभे इत्यन्वयः ८ सुतः इच्छन् शतप्रसूतिं नाम सुतं लेभे इत्यनुषज्यते ९

आसीच्चैत्ररथिर्वीरो यज्वा विपुलदक्षिणः शशबिंदुः परं वृत्तं राजर्षीणामनुष्ठितः ४ पृथुश्रवाः पृथुयशा राजासीच्छशबिंदुजः शंसंति पुराणज्ञाः पार्थश्रवसमंतरं ५ अंतरस्य सुयज्ञस्तु सुयज्ञतनयोऽभवत् उशतो यज्ञमखिलं स्वधर्मेषूशतां वरः ६ शिनेयुरभवत्पुत्र उशतः शत्रुतापनः मरुत्तस्तस्य तनयो राजर्षिरभवन्नृप ७ मरुत्तोऽलभत ज्येष्ठं सुतं कंबलबर्हिषं चचार विपुलं धर्म्मममर्षात्प्रेत्यभागपि ८ शतप्रसूतिमिच्छन्वै सुतं कंबलबर्हिषः बभूव रुक्मकवचः शतप्रसवतः सुतः ९ निहत्य रुक्मकवचः शतं कवचिनां रणे धन्विनां निशितैर्बाणैरवाप श्रियमुत्तमां १० जज्ञेऽथ रुक्मकवचात्पराजित्परवीरहा जज्ञिरे पंच पुत्रास्तु महावीर्याः पराजितः ११ रुक्मेषुः पृथुरुक्मश्च ज्यामघः पालितो हरिः पालितं च हरिं चैव विदेहेभ्यः पिता ददौ १२ रुक्मेषुरभवद्राजा पृथुरुक्मस्तु संश्रितः ताभ्यां प्रव्राजितो राजा ज्यामघोऽवसदाश्रमे १३ प्रशांतः स वनस्थस्तु ब्राह्मणेनावबोधितः जगाम धनुरादाय देशमन्यं ध्वजी रथी १४ नर्मदाकूलमेकाकी नगरीं मृत्तिकावतीं ऋक्षवंतं गिरिं जित्वा शुक्तिमत्यामुवास सः १५ ज्यामघस्याभवद्भार्या शैब्या बलवती सती अपुत्रोपि च राजा स नान्यां भार्यामविंदत १६ ॥:॥:॥:॥:

११ विदेहेभ्यः विदेहान्वा तु तदधिपतये राज्ञे ददाविति अर्थः १२ आश्रितः ज्येष्ठानुसारी जातः १३
प्रशांतः निष्क्रामलिप्सः अवबोधितः तप आदिना उद्दीपितः जिगाय जितवान् १४ १५ बलवती प्रगल्भा १६ ॥श्रीः श्रीः॥श्रीः॥श्रीः श्रीः॥श्रीः

२८ तस्याःउपदानवीसंज्ञायाःकन्यायाञ्चयेणतपसापरितोषितांहृद्यापिशेषापुत्रंबभ्रुजायतजनितवती १९ २९ पुरुद्वान्नामतः तस्यैवदर्भोभद्रवतीभार्यातस्यांमधुर्जातः

तस्यासीद्धिज्यघोयुद्धेतत्रकन्यामवापसः भार्यामुवाचसंत्रस्तः स्नुषेतिसनरेश्वरः १७ एतच्छ्रुत्वाब्रवीद्देवीकस्यचेयंस्नुषेतिवै अब्रवीत्तदु
पश्रुत्यसज्ञामघोराजसत्तमः १८ यस्तेजनिष्यतेपुत्रस्तस्यभार्यैतिज्ञातभाः उग्रेणतपसातस्याःकन्यायाःसाव्यजायत पुत्रंविदर्भंसुभगाशै
ब्यापरिणतासती १९ राजपुत्रौतुविद्वांसौस्नुषायांक्रथकैशिकौ पश्चाद्विदर्भोऽजनयच्छूरौरणविशारदौ २० लोमपादंतृतीयंतुपुत्रंपरमधार्मि
कं २१ लोमपादात्मजोबभ्रुराहृतिस्तस्यचात्मजः आहृतेः कौशिकश्चैवविद्वान्परमधार्मिकः २२ चैदिःपुत्रःकौशिकस्यतस्माच्चैद्यानृपाः
स्मृताः भीमोविदर्भस्यसुतःकुंतिस्तस्यात्मजोभवत् २३ कुंतेर्धृष्टःसुतोजज्ञेरणधृष्टःप्रतापवान् धृष्टस्यजज्ञिरेशूरास्त्रयःपरमधा
र्मिकाः २४ आवंतश्चदशार्हश्चबलीविषहरश्चयः दशार्हस्यसुतोव्योमाव्योम्नोजीमूतउच्यते २५ जीमूतपुत्रोबृहतीस्तस्यभीमरथः
स्मृतः अथभीमरथस्यासीत्पुत्रोनवरथस्तथा तस्यचासीद्दशरथःशकुनिस्तस्यचात्मजः तस्मात्करंभःकांभिर्देवरातोभवन्नृपः २७
देवरातोभवत्तस्यदेवक्षत्रिर्महायशाः देवगर्भसमोजज्ञेदेवक्षत्रस्यनंदनः २८ मधूनांवंशकृद्राजामधुर्मधुरवागपि मधोर्जज्ञेतुवै
दर्भ्यांपुत्रोमरुवसात्तथा २९ आसीन्मरुवसःपुत्रःपुरुद्वान्पुरुषोत्तमः मधुर्जज्ञेथवैदर्भ्यांभद्रवत्यांकुरूद्वह ३० ऐक्ष्वाकीचाभवद्भा
र्यासत्वात्तस्यामजायत सत्वान्सर्वगुणोपेतःसात्वतांकीर्तिवर्द्धनः ३१ इमांविसृष्टिंविज्ञायज्यामघस्यमहात्मनः युज्यतेपरया
प्रीत्याप्रजावांश्चभवत्युत ३२ हरिवंशेज्यामघसृष्टिर्नामषट्त्रिंशः॥ ३६ ॥ श्ला॥ः॥ ७॥ः ॥ः ॥ ६ः ॥ ७॥ः

३० तस्यैवऐक्ष्वाकीसतीनामद्वितीयाभार्यातस्यांसत्वान्जातः ३१ ३२ षट्त्रिंशः ३६ ॥ श्ला॥ः॥ श्ला॥ः॥ श्ला॥ः श्ला॥ः॥ श्ला॥ः॥ श्ला॥ः॥ श्ला॥ः॥ श्ला॥ः

सात्वतात्मजभजमानदेवावृधौनामतो १४ सृंजयोतंजपपुत्र्यो २ ६ आत्मानंच्छिन्नंसंयुज्यसमाधायस्पृशन्स्नानाचमनादेहपलक्षणमेतत् ७ एकाग्रकालिन्धे

वैशंपायनउवाच सात्वतात्सत्वसंपन्नाकौशल्यासुषुवेसुतान् भजिनंचभजमानंचदिव्यंदेवावृधंनृपं १ अंधकंचमहाबाहुंवृष्णिंचय
दुनंदनं तेषांविसर्गाश्चत्वारोविस्तरेणेहतांशृणु २ भजमानस्यसृंजय्योबाह्यकायोपबाह्यका आस्तांभार्येतयोस्तस्यजज्ञिरेबहवः
सुताः ३ क्रिमिश्चक्रमणश्चैवधृष्टःशूरःपुरंजयः एतेबाह्यकसृंजय्यांभजमानाद्विजज्ञिरे ४ अयुताजित्सहस्राजिच्छतजिच्चाथ
दाशकः उपबाह्यकसृंजय्यांभजमानाद्विजज्ञिरे ५ यज्ञादेवावृधोराजाचचारविपुलंतपः पुत्रः सर्वगुणोपेतोममस्यादितिनिश्चितः
६ संयुज्यात्मानमेवंतुपर्णाशायाजलंस्पृशन् सदोपस्पृशतस्तस्यचकारप्रियमापगा चिंतयाभिपरीतांगीजगामैकाभिनिश्चयं
कल्याणत्वान्नरपतेस्तस्यसानिम्नगोत्तमा ८ नाध्यगच्छततांनारींयस्यामेवंविधःसुतः जायेतस्मात्स्वयंहंतभवाम्यस्यसहव्रता ९
अथभूत्वाकुमारीसाविभ्रतीपरमंवपुः ज्ञापयामासनृपतिंतामियेषचसप्रभुः १० तस्यामाधत्तगर्भंचतेजस्विनमुदारधीः अथसा
सुषुवेमासिदशमेसरितांवराः ११ पुत्रंसर्वगुणोपेतंबभ्रुंदेवावृधान्नृपात् अत्रवंशेपुराणज्ञागायंतीतिपरिश्रुतं १२ गुणा
न्देवावृधस्यैवकीर्तयंतोमहात्मनः यथैवाग्रेस्मृतंदूरात्पश्यामस्तथांतिकात् १३ ॥:॥:॥: ॥:॥:॥:॥:

वनिश्चयंच भिज्ञाममवकार तस्यतदापहृतस्यचिंतया ८ हंतेतिसस्नेहमालोचने सहव्रताधर्मपत्नी ९ इयेषइच्छितवान् १० १२ अंतिकेदूराद्वयी
गवलेनानेकधात्मानंकृत्वासंचारंतमुलभन्तेपश्यामः १३

षट्षष्ट्यधिकानिसप्तसहस्राणिपुरुषाःअमृतत्वंपुण्येनमृत्युमासाद्यब्रह्मलोकंगताइत्यर्थः १४ यज्वाबभ्रुरेव १५ तस्यबभ्रोः १६ अंधकात्सकतः पुत्रोत्काश्यपस्यदुहिता १७ २० श्वेतेनशुद्धेनकिशोरप्रतिमःतरुणाश्ववदुत्साहवान्किशोरोऽश्वस्यशावकेइतिमेदिनीअशीतिचर्मणायुक्तःअशी

वभ्रुःश्रेष्ठोमनुष्याणांदेवैर्देवावृधःसमः षष्टिश्चषट्चपुरुषाःसहस्राणिचसप्त १४ एतेमृतत्वंसंप्राप्ताबभ्रोर्देवावृधादपियज्वादानपतिर्धीमान्ब्रह्मण्यःसुदृढायुधः १५ कीर्त्तिमांश्चमहातेजाःसात्वतानांमहारथः तस्यान्ववायःसुमहान्भोजायेमार्त्तिकावताः १६ अंधकात्काश्यदुहिताचतुरोऽलभतात्मजान् कुकुरंभजमानंचशमीकंकंबलबर्हिषं १७ कुकुरस्यसुतोधृष्णुर्धृष्णोस्तुतनयस्तथा कपोतरोमातस्याथतैत्तिरिस्तनयोऽभवत् १८ जज्ञेपुनर्वसुस्तस्मादभिजित्तुपुनर्वसोः तस्यवैपुत्रमिथुनंबभूवाभिजितःकिल १९ आहुकश्चाहुकीचैवख्यातौख्यातिमतांवरौ इमांचोदाहरंत्यत्रगाथांप्रतितमाहुकं श्वेतेनपरिवारेणकिशोरप्रतिमोमहान् अशीतिवर्मणायुक्तःसनृपःप्रथमंव्रजेत् २१ नापुत्रवान्नाशतदोनासहस्रशतायुषः नाशुद्धकर्मानायज्वायोभोजमभितोव्रजेत् २२ ॥:॥ ॥:॥ ॥ ॥ ॥:॥ ॥:॥ ॥:॥:॥:

त्यापुरुषैर्वाह्यंचर्मफलकंदारुमयन्यासनविशेषः तेनयुक्तःतदारूढःचर्मफलकंनौचफलकंइतिमेदिनी अशीतिचर्मणोमस्यअमेध्यबद्धेस्तथ्यैः पंचःसाहुः यद्वाताभिरशीतिःस्वर्णोयेषांतेअशीतयोदेवाःतएवचर्मसाधात्राणां तेनयुक्तः देवास्त्रितइत्यर्थः २१ अतएवतस्यपरीवारः तत्पतेनापुत्रवानितिभोजंस्माहुकं २२ ॥ श्रीः श्रीः ॥:॥:

रूप्यकांचनेत्यर्द्धं सोपासंगेत्यतः प्राक्पठ्यं रूप्यमय्यः कांचनमय्यश्च कक्ष्याः वरत्राः बंधनरज्जवो येषां तेषां रथानां नागानां दशसहस्राणि पूर्वस्यां दिशि अनुमोद
नेनाभ्यनुज्ञया एति याति गंतुं प्रभवंति तथा तस्यामेव दिशि रथानां दशसहस्राणि अनुमोदनं यांति उपासंगो युगं अनुकर्षो रथाधःस्थितं काष्ठं वरूथो रथगुप्तिः तद्व
तां रथानां २३ २४ उत्तरस्यामपि तावंत्येव रथानां नागानां च सहस्राणि तथा दिशि यथा पूर्वोत्तरयोस्तथा दक्षिणपश्चिमयोरपि दिशि दक्षिणस्यां पश्चिमायां च अनुमो
दनं तावंत्येव सहस्राणि आयांतीत्यर्थः आभूमिपालान् सर्वान् स्वामिनं तान् आभिमुख्येन वशीकृत्य भोजाः संति तथा तत्र आहुकं उपतिष्ठंत उपतिष्ठंते सेवितवंतः किंकि

पूर्वस्यां दिशि नागानां भोजस्येत्यनुमोदनं सोपासंगानुकर्षाणां ध्वजिनां सवरूथिनां २३ रथानां मेघघोषाणां सहस्राणि दशै
व तु रूप्यकांचनकक्ष्याणां सहस्राणि दशापि च २४ तावंत्येव सहस्राणि उत्तरस्यां तथा दिशि आभूमिपालान् भोजान् स्वाननुत्त
मकिंकिणीकिनः २५ आहुकीं चाप्यवंतिभ्यः स्वसारं ददुरंधकाः आहुकस्य तु काश्यायां द्वौ पुत्रौ संबभूवतुः २६ देवकश्चो
ग्रसेनश्च देवगर्भसमावुभौ देवकस्याभवन्सुताश्चत्वारस्त्रिदशोपमाः २७ देववानुपदेवश्च सुदेवो देवरक्षितः कुमार्यः सप्त
चास्यासन्वसुदेवाय ता ददौ २८ ॥:॥:॥:॥:॥:

णीकिनः क्षुद्रघंटिकावंतो रथादयः किंकिणीशब्दादिकप्रत्ययः किंकिणीकिन इति दं
सस्य ह्रस्वत्वमार्षं भोजान् स्वान् उत्तमकिंकिणीकिन इति पाठे सर्वान् भूमिपालान् व्याप्य स्वान् उत्तमं सुवर्णनिर्मितं येषां किंकिणीयुक्ताः रथादयः उत्तमकिंकिणीकाः त
द्युक्तान् उत्तमकिंकिणीकिनः तादृशान् कृत्वा स्थिता इति शेषः २५ आहुकीं आहुकसंबंधिनीं स्वसारं आहुकीं तां अवंतिभ्यः राज्ञे देशेन ददुः २६ २७ कुमार्यः
पुत्र्यः २८ ॥:॥:॥:॥:॥:॥

ह॰ टि॰
८९

वृकदेवीमुक्तां उपदेवीं वृकदेवमुपदेवी २९ कंसः पूर्वजः प्रथमः न्यग्रोधादयोऽष्टौ सुभूमिप इति शंकोर्विशेषणं गौडपाठे तु सुभूमिपाः इति वा तस्यैव विशेषणं अन्ये तु सुभूमिप इति कंसस्यैव नामेत्याहुस्तेषां तस्य पृथक्त्वेनोक्ता निर्विवहयते परे पुनः कंसस्यैव सुभूमिप इति शंकुपदलोपमेव कुर्वंति तत्रैपाठे तत्वं व्यास एव वेद ३० ३३ इति

देवकीं शांतिदेवां च श्रीदेवां देवरक्षितां वृकदेवीमुपदेवीं च सुनामां चैव सप्तमी २९ नवोग्रसेनस्य सुतास्तेषां कंसस्तु पूर्वजः न्यग्रोधश्च सुनामा च कंकः शंकुः सुभूमिप ३० राष्ट्रपालोथ सुधनुरनाधृष्टिश्च पुष्टिमान् एषां स्वसारः पंच आसन् कंसा कंसवती तथा ३१ सुतनू राष्ट्रपाली च कंका चैव वरांगना उग्रसेनः सहापत्यो व्याख्यातः कुकुरोद्भवः ३२ कुकुराणामिमं वंशं धारयन्नमितौजसां आत्मनो विपुलं वंशं प्रजावानाप्नुते नरः ३३ इति श्रीखिलेषु हरिवंशे सप्तत्रिंशः वैशंपायन उवाच भजमानस्य पुत्रोथ रथमुख्यो विदूरथः राजाधिदेवः शूरस्तु विदूरथसुतोऽभवत् १ राजाधिदेवपुत्रास्तु जज्ञिरे वीर्यवत्तराः दत्तातिदत्तौ बलिनौ शोणाश्वः श्वेतवाहनः २ शमी च दंडशर्मा च दत्तशत्रुश्च शत्रुजित् श्रवणा च श्रविष्ठा च स्वसारौ संबभूवतुः ३ शमिपुत्रः प्रतिक्षत्रः प्रतिक्षत्रस्य चात्मजः स्वयंभोजः स्वयंभोजात् हृदिकः संबभूव ह ४ तस्य पुत्रा बभूवुर्हि सर्वे भीमपराक्रमाः कृतवर्माग्रजस्तेषां शतधन्वा तु मध्यमः ५ देवर्षेर्वचनात्तस्य भिषग्वैतरणो नृपः सुदांतश्चाधिदांतश्च कामदा कामदंतिके ६

नैलकंठीये भारतभावदीपे हरिवंशार्थप्रकाशे सप्तत्रिंशत्तमोऽध्यायः भजमानस्य पृथुमुख्यः रथवतां मुख्यो रथिष्ठ इति यावत् १ ५ देवर्षेः च्यवनस्य तस्य शतधन्वनः भिषक्च भ्रातरश्चत्वारः पुत्राः कामदा च कामदंतिका चेति द्वे पुत्र्यौ ६ ॥ श्रीः ॥ ः ॥ श्रीः ॥ ः ॥ श्रीः ॥ श्रीरामः ॥ ः ॥ ः श्री ः ॥

राम॰
८९

कंबलबर्हिषः महत्पुत्रस्माद्देववान् तस्यत्रयः ७ अंधकाः अंधकस्यपुत्राः तान् अंधकस्य असमोजसे ददाविति गम्यते ८ ११ निघ्नतः निघ्नात् १२ शत्रुजि
च्चसेनाजिच्च शत्रुसेनाजितौ वसंत्यां कृतनिवासायां १३ उपलब्धवान् परं पापालब्धवान् समुद्रात् समुद्रं प्राप्य तत्तीरे स्थितः कस्माल्लब्धवानित्याकांक्षायां

देववांश्चाभवत्पुत्रो विद्वान्कंबलबर्हिषः असमौजास्तथा वीरो नाम समौजाश्च तावुभौ ७ अजातपुत्राय सुतान्प्रददावसमौजसे
सुदंष्ट्रं च सुवाहं च कृष्णमित्यंधकास्त्रयः ८ एते चान्ये च बहवो ह्यंधकाः कथितास्तव अंधकानामिमं वंशं धारयेद्यस्तु नित्यशः ९
आत्मनो विपुलं वंशं लभते नात्र संशयः गांधारी चैव माद्री च क्रोष्टोर्भार्ये बभूवतुः १० गांधारी जनयामास अनमित्रं महाबलं माद्री
युधाजितं पुत्रं ततो वै देवमीढुषं अनमित्रमभित्राणां जेतारमपराजितं अनमित्रसुतो निघ्नो निघ्नतो द्वौ बभूवतुः प्रसेनश्चाथ सत्रा
जिच्छत्रुसेनाजितावुभौ प्रसेनो द्वारवत्यां तु निवसन्यो महामणिं १३ दिव्यं स्यमंतकं नाम समुद्रादुपलब्धवान् तस्य सत्राजितः
सूर्यः सखा प्राणसमोभवत् १४ स कदाचिन्निशापाये रथेन रथिनां वरः अब्धिकूलमुपस्प्रष्टुमुपस्थातुं ययौ रविं १५ तस्योप
तिष्ठतः सूर्यं विवस्वानग्रतः स्थितः अस्पष्टमूर्तिर्भगवांस्तेजोमंडलवान्प्रभुः १६ अथ राजा विवस्वंतमुवाच स्थितमग्रतः
यथैव व्योम्नि पश्यामि सदा त्वां ज्योतिषांपते १७

यामाहतस्येति तस्य प्रसेनसंबंधिनो भ्रातुः सत्राजितस्तस्य १४ निशापाये प्रातः
कालेउपस्प्रष्टुं स्नानादिकं कर्तुं १५ १६ १७ ॥श्रीरामः॥ः॥ श्रीरामः॥श्रीः॥ःश्री

यथादिविमंडलिनं तां यथा पश्यामि तथैव संनिहितमपि मंडलमात्रेण पश्यामि न त्वाकृतिविशेषं अतस्त्वमसख्येन उपगतस्य समीपागतस्यापि इतरजनापेक्षयान्तः
विशेषतः कोनुग्रहः प्राप्तो न कोपि यतः इतः एवदहमपि त्वां मंडलवंतमेव पश्यामीत्यर्थः १८ १९ विग्रहवंतं सुस्पष्टावयवं नृपतिः सत्राजित् मंडलाधिपतित्वात् ननु

तेजोमंडलिनं देवं तथैव पुरतः स्थितं को विशेषोस्ति मे त्वत्तः सख्येनोपगतस्य वै १८ एतच्छ्रुत्वा तु भगवान्मणिरत्नं स्यमंतकं स्वकं
ठादवमुच्यैकांते न्यस्तवान्भुवि १९ ततो विग्रहवंतं तं ददर्श नृपतिस्तदा प्रीतिमानथ तं दृष्ट्वा मुहूर्तं कृतवान्कथां २० तमभिप्र
स्थितं भूयो विवस्वंतं स सत्राजित् लोकान्भासयसे यस्त्वं येन त्वं सततं प्रभो तदेतन्मणिरत्नं मे भगवन्दातुमर्हसि २१ ततः स्यमंत
कमणिं दत्तवांस्तस्य भास्करः स तमाबध्य नगरीं प्रविवेश महीपतिः २२ तं जनाः पर्यधावंत सूर्योयं गच्छतीति ह पुरीं विस्मापयि
त्वा स राजा तु ततः पुरं तथा २३ तं प्रसेनजितं दिव्यं मणिरत्नं स्यमंतकं ददौ भ्रात्रे नरपतिः प्रेम्णा सत्राजिदुत्तमं २४ स मणिः स्यंद
ते रुक्मं वृष्ण्यंधकनिवेशने कालवर्षी च पर्जन्यो न च व्याधिभयं भवेत् २५ लिप्सां चक्रे प्रसेनात्तु मणिरत्ने स्यमंतके गोविंदो न च
तं लेभे शक्तोपि न जहार ह २६ कदाचिन्मृगयां यातः प्रसेनस्तेन भूषितः स्यमंतककृते सिंहाद्वधं प्राप वनेचरात् २७ अथ सिं
हं प्रधावंतमृक्षराजो महाबलः निहत्य मणिरत्नं तु तदादाय बिलमाविशत् २८ ॥:॥ :॥ :॥ः

तन्नियमात्रः २० २४ स्यंदते प्रस्रवति रुक्मं सुवर्णं २५ २६ सिंहाद्देवताविष्टः ननु पृच्छमानः तेन ताड्यमानो धारिणो धर्षणापोगतः २७ ऋक्षराजो जां
बवान् २८ ॥:॥:॥:

शशंकिरे कृष्णेनैवप्रसेनंहत्वामणिर्गृहीत इति शंकांचक्रुः २९ नकर्त्तानकारयिताकर्त्ता ३० आप्तकारिभिः अंतरंगैः किंकरैः ४३ ॥छ॥ः॥छ॥ःछ॥ः

ततोवृष्ण्यंधकाः कृष्णंप्रसेनवधकारणात् प्रार्थितंतंमणिंबुद्ध्वासर्वएवशशंकिरे २९ सशंक्यमानोधर्मात्मानकारीतस्यकर्मणः आ
हरिष्येमणिमितिप्रतिज्ञायवनंययौ ३० यत्रप्रसेनोमृगयामचरत्तत्रचाप्यथ प्रसेनस्यपदंगृह्यपुरुषैराप्तकारिभिः ३१ ऋक्षवंतंगिरि
वरंविंध्यंचगिरिमुत्तमं अन्वेषणपरिश्रांतःसददर्शमहामनाः ३२ साश्वंहतंप्रसेनंचनाविंदच्चैवतंमणिं अथसिंहःप्रसेनस्यशरीर
स्याविदूरतः ३३ ऋक्षेणनिहतोदृष्टःपादैर्ऋक्षस्यसूचितः पादैस्तैर्मार्गमाणस्तुगुहामृक्षस्यमाधवः ३४ महत्यृक्षबिलेवाणींशुश्रावप्र
मदेरितां धात्र्याकुमारमादायसुतंजांबवतोनृप ३५ क्रीडापयंत्यामणिनामारोदीरित्युदीरितां ३५ धात्र्युवाच सिंहःप्रसेनमवधी
त्सिंहोजांबवताहतः सुकुमारकमारोदीस्तवह्येषस्यमंतकः ३६ व्यक्तीकृतश्चशब्दःसतूर्णंचापिययौबिलं प्रविश्यचापिभगवांस्त
दृक्षबिलमंजसा ३७ स्थापयित्वाबिलद्वारियदूंल्लांगलिनासह शार्ङ्गधन्वाबिलस्थंतुजांबवंतंददर्शह ३८ युयुधेवासुदेवस्तु
बिलेजांबवतासह बाहुभ्यामेवगोविंदोदिवसानेकविंशतिं ३९ प्रविष्टेतुबिलंकृष्णेवसुदेवपुरःसराः पुनर्द्वारवतीमेत्यहतंकृ
ष्णंन्यवेदयन् ४० वासुदेवस्तुनिर्जित्यजांबवंतंमहाबलं लेभेजांबवतींकन्यामृक्षराजस्यसंमतां मणिंस्यमंतकंचैवजग्राहा
त्मविशुद्धये ४१ अनुनीयर्क्षराजानंनिर्ययौचतदाबिलात् द्वारकामगमत्कृष्णःश्रियापरमयायुतः एवंसमणिमाहृत्यवि
शोध्यात्मानमच्युतः ददौसत्राजितेतंवैसर्वसात्वतसंसदि ४३ ॥ः॥ः॥ ः॥छ॥छ॥ः॥छ॥ ः॥छ॥ःछ॥

५४ वातपतेर्विशेषणं वीरइति ५६ भार्याः कृष्णायतां ददाविति पाठे तिस्रोपि दत्ताः अन्यथा तां तन्त्रमतेन ख्यातां सत्यभामामेवेति व्याख्येयं ५७ ५८ ॥:॥

एवंमिथ्याभिशप्तेन कृष्णेनामित्रघातिना आत्माविशोधितःपापाद्विनिर्जित्यस्यमंतकं ५४ सत्राजितोदशत्वासन्भार्यास्तासां
शतंसुताः ख्यातिमंतस्त्रयस्तेषांभंगकारस्तुपूर्वजः ५५ वीरोवातपतिश्चैववियत्स्वातस्तथैवच कुमार्यश्चापितिस्रोवैदिक्षुख्यातानन
राधिप ५६ सत्यभामोत्तमास्त्रीणांव्रतिनीचदृढव्रता तथाप्रस्वापिनीचैवभार्याकृष्णस्यतांददौ ५७ सभाक्षोभंगकारस्तुनारेयश्चन
रोत्तमौ जज्ञातेगुणसंपन्नौविश्रुतौगुणसंपदा ५८ माद्र्यांपुत्रस्यजज्ञेथपृश्निःपुत्रोयुधाजितः जज्ञातेतनयौपृश्नेःश्वफल्कश्चित्रक
स्तथा ५९ श्वफल्कःकाशिराजस्यसुतांभार्यामविंदत गांदीतस्याथगांदीत्सासदागाःप्रददौहिसा ५० तस्यांजज्ञेतदावीरः
श्रुतवानतिथिःप्रियः अक्रूरोथमहाभागोयज्वाविपुलदक्षिणः ५१ उपासंगस्तथामंगुर्मृदरश्चारिमेजयः अरिक्षिपस्तथोपेक्षः
शत्रुहाचारिमर्दनः ५२ धर्मभृद्यतिधर्माचगृध्रभोजांधकस्तथा सुबाहुःप्रतिबाहुश्चसुंदरीचवरांगना ५३ विश्रुतासांबस्यमहिषी
कन्याचास्यवरांगना रूपयौवनसंपन्नासर्वसत्त्वमनोहरा ५४ अक्रूरेणोग्रसेन्यांतुसुतौद्वौकुलनंदन सुदेवश्चोपदेवश्चजज्ञाते
देववर्चसौ ५५ चित्रकस्याभवन्पुत्राःपृथुर्विपृथुरेवच अश्वग्रीवोश्वबाहुश्चसुपार्श्वकगवेषणौ ५६ अरिष्टनेमिरश्वश्चसुधर्मा
धर्मभृत्तथा सुबाहुर्बहुबाहुश्च श्रविष्ठाश्रवणेस्त्रियौ ५७ इमांमिथ्याभिशस्तिंयःकृष्णस्यसमुदाहृतांवेदमिथ्याभिशापास्तंन
स्पृशंतिकदाचन ५८ इतिखिलेषुहरिवंशेऽष्टत्रिंशः ॥:॥ ॥ ॥ ॥:॥ ॥:॥ ॥

क्रौष्टेःकनिष्ठात्स्त्रीमाद्रीतत्पुत्रस्ययुधाजितोवंशमाहमाद्रीति ५९ ५७ मिथ्याभिशस्तिंमिथ्याभिशापंवेदजानाति ५८ अष्टत्रिंशः ॥:॥:॥ श्रीःश्रीः

यत्तत् वस्तु अक्रूरात्तद्रत्नं शतधन्वना हारयामासेत्यन्वयः १ अंतरं तादर्थ्यपर्यंतमासितं सूर्यभ्रमस्यादिहपुनरर्थमन्विच्छन्निरूप्यैः अंतरमवकाशावधिपरिधा नांतर्द्धिभेदतादर्थ्ये इति मेदिनी २ ३ समयं शपथं ४ कृष्णेन स्वभुजबलकुंठेन अभ्युपपत्स्यामः अनुपास्यामः अबलीकर्तुमितिशेषः अत्रोपपत्तिमाहममेति

वैशंपायन उवाच यत्तत्सत्राजिते कृष्णो मणिरत्नं स्यमंतकं अदात्तद्धारयामास बभ्रुर्वै शतधन्वना १ सदा हि प्रार्थयामास सत्यभामा मनिंदितां × अक्रूरात्तदा रत्नमादाय भरतर्षभ समयं कारयां × अक्रूरांतरमन्विच्छन्मणिं चैव स्यमंतकं २ सत्राजितं ततो हत्वा शतधन्वा महाबलः रात्रौ तं मणिमादाय ततोऽक्रूराय दत्तवान् ३ ४ चक्रे नावेद्योऽहं त्वयेत्युत ४ वयमभ्युपपत्स्यामः कृष्णेन त्वां प्रधर्षितं ममाद्य द्वारका सर्वा वशे तिष्ठत्यसंशयं ५ हते पितरि दुःखार्ता सत्यभामा मनस्विनी प्रययौ रथमारुह्य नगरं वारणावतं ६ सत्यभामा तु तद्वृत्तं भोजस्य शतधन्वनः भर्तुर्निवेदयद्दुःखात्पार्श्वस्थाश्रूण्यवर्तयत ७ पांडवानां तु दग्धानां हरिः कृत्वोदकं तथा कुल्यार्थे चापि पांडूनां न्ययोजयत सात्यकिं ८ ततस्त्वरितमागम्य द्वारकां मधुसूदनः पूर्वजं हलिनं श्रीमानिदं वचनमब्रवीत् ९ हतः प्रसेनः सिंहेन सत्राजिच्छतधन्वना स्यमंतकः समद्गामी तस्य प्रभुरहं यतः १० तदारोह रथं शीघ्रं भोजं हत्वा महाबलं स्यमंतको महाबाहो ह्यस्माकं स भविष्यति ११ ततः प्रववृते युद्धं तुमुलं भोजकृष्णयोः शतधन्वा ततोऽक्रूरमवैक्षत्सर्वतो दिशं १२ ॥ः॥ः७॥७॥७॥ः॥७॥ः॥ः७॥ः॥७॥ः॥७॥ः

५ वारणावतं हस्तिनापुरं ६ ७ कुल्यार्थे अस्थिसंस्कारार्थं कुल्यं स्यात्कीकसे इति मेदिनी ८ ११ भोजः शतधन्वा १२ ॥श्रीरामः श्रीरामः
श्रीः श्रीः श्रीः श्रीः श्रीः ॥ः॥ः

ह॰टि॰
९२

शाठ्यत्स्वशक्तिप्रकाशनान्हार्दिक्यं हृदीकपुत्रं शतधन्वानं नाभ्युपपद्यत साहाय्यार्थेन गतवान् १३ हृदयायाश्वया १४ १७ दृष्टदोषाः क्षीणजवानिश्चेष्टाचा

संश्चौतावुभौ दृष्ट्वा तत्र भोजजनार्दनौ शक्तोपि शाठ्याद्धार्दिक्यं नाक्रूरोभ्युपपद्यत १२ अपयाने ततो बुद्धिं भोजश्चक्रे भयार्दितः योजना
नांशतं साग्रं हृदयया प्रत्यपद्यत १४ विश्रुता हृदया नाम शतयोजनगामिनी भोजस्य वडवा राजन्यया कृष्णमयोधयत् १५ क्षीणां जवेन
हृदयामध्वनः शतयोजने दृष्ट्वा रथस्य तां वृद्धिं शतधन्वा समत्यजत् १६ ततस्तस्या हृदयायास्तु श्रमात्खेदाच्च भारत खमुत्पेतुरथ प्राणाः
कृष्णो राममथाब्रवीत् १७ तिष्ठस्वेह महाबाहो दृष्टदोषा हृदया मया पद्भ्यां गत्वा हरिष्यामि मणिरत्नं स्यमन्तकं १८ पद्भ्यामेव ततो ग
त्वा शतधन्वानमच्युतः मिथिलामभितो राजन् जघान परमास्त्रवित् १९ स्यमन्तकं च नापश्यद्धत्वा भोजं महाबलं निवृत्तं चाब्रवीत्कृ
ष्णं रत्नं देहीति लाङ्गली २० नास्तीति कृष्णश्चोवाच ततो रामो रुषान्वितः धिक्शब्दमसकृत्कृत्वा प्रत्युवाच जनार्दनं २१ भ्रातृत्वान्म
र्षयाम्येष स्वस्ति तेस्तु व्रजाम्यहं कार्यं न मे द्वारकया न त्वया न च वृष्णिभिः २२ प्रविवेश ततो रामो मिथिलामरिमर्दनः सर्वकामैरुप
चितैर्मैथिलेनाभिपूजितः २३ एतस्मिन्नेव काले तु बभ्रुर्मतिमतां वरः नानारूपान्क्रतून्सर्वानाजहार निरर्गलान् २४ दीक्षा
मयं स कवचं रक्षार्थं प्रविवेश ह स्यमन्तककृते प्राज्ञो गान्दीपुत्रो महायशाः २५ अर्थान्रत्नानि चाग्र्याणि द्रव्याणि विविधानि च ष
ष्टिं वर्षाणि धर्मात्मा यज्ञेषु विनियोजयत् २६ अक्रूरयज्ञा इति ते ख्यातास्तस्य महात्मनः बह्वन्नदक्षिणाः सर्वे सर्वकामप्रदायिनः

१८ २४ दीक्षामयं कवचं दीक्षितस्य युद्धनिषेधादिति वैराभ्यसत्कृते तेनैव स्वशरीरत्नापि कृतेत्यर्थः २५ २६ ॥:॥:॥:॥: २७ ॥

राम॰
९२

३३ कच्छे सजलेतोप्रदेशे ३३ ३४ योगेन दुग्धनदानादिसंबंधेन लिंगेन ३५ अनार्यकं शाठ्यम् ३६ यत्प्रतोहेतोः रोषोभूत् स च संरूढः ततश्च कालात्ययमामङ्घि

अथ दुर्योधनो राजा गत्वा तु मिथिलां प्रभुः गदाशिक्षां ततो दिव्यां बलभद्रादवाप्तवान् २८ प्रसाद्य तु ततो रामो वृष्ण्यंधकमहारथैः आनी
तो द्वारकामेव कृष्णेन च महात्मना २९ अक्रूरस्त्वंधकैः सार्द्धमपायात्पुरुषर्षभः हत्वा सत्राजितं युद्धे सहबंधुं महाबली ३० ज्ञातिभेदभया
त्कृष्णस्तमुपेक्षितवांस्तथ अपयाते तदाक्रूरे नावर्षत्पाकशासनः ३१ अनावृष्ट्या यदा राष्ट्रमभवद्बहुधा कृशं ततः प्रसादयामासुरक्रूरं कु
कुरांधकाः ३२ पुनर्द्वारवतीं प्राप्ते तस्मिन्दानपतौ ततः प्रववर्ष सहस्राक्षः कच्छे जलनिधेस्तदा ३३ कन्यां च वासुदेवाय स्वसारं शील
संमतां अक्रूरः प्रददौ धीमान्प्रीत्यर्थं कुरुपुंगव ३४ अथ विज्ञाय योगेन कृष्णो बभ्रुगतं मणिं सभामध्यगतं प्राह तमक्रूरं जनार्दनः ३५
यत्तद्रत्नं मणिवरं तव हस्तगतं विभो तत्प्रयच्छस्व मानार्ह मयि मानार्यकं कृथाः ३६ षष्टिवर्षे गते काले यद्रोषोभूत्ममानघ स संरूढोऽ
सकृत्प्राप्तः ततः कालात्ययो महान् ३७ ततः कृष्णस्य वचनात्सर्वसात्वतसंसदि प्रददौ तं मणिं बभ्रुरक्लेशेन महामतिः ३८ तत
स्तमार्जवात्प्राप्तं बभ्रोर्हस्तादरिंदमः ददौ हृष्टमनाः कृष्णस्तं मणिं बभ्रवे पुनः ३९ स कृष्णहस्तात्संप्राप्तं मणिरत्नं स्यमंतकं
आबध्य गांदिनीपुत्रो विरराजांशुमानिव ४० यस्त्वेतच्छृणुयान्नित्यं शुचिर्भूत्वा समाहितः सुलब्धानां तत्सकल्पानां फलभागी भवि
ष्यति ४१ आब्रह्मभवनाद्वापि यशः प्राप्स्यति निःसंशयः भविष्यति न यक्ष्मेषस्तस्य मंडलवीमिते इति हरिवंशे ३९ ॥:

रकालीनो रोषः यद्यपि जातः तद्रत्नम प्रष्ठेति दुर्वैराग्यात्त्वयः ३७ ४० यस्त्विति द्वौ श्लोकौ क्वचित्पठ्येते एकोनचत्वारिंशः ॥:॥:॥:॥:॥:॥

स्यमंतकाख्यानप्रसंगेनसमर्थोपिभगवान्लोकस्थितिंनविभेदकाहारीणकलब्धाक्रूरादीनामपराधान्क्षांतवानितिश्रुत्वाभगवन्माहात्म्यमाहात्म्यश्रवणोत्पन्नादरोजनमेज-
यउवाचप्रादुर्भावानिति प्रादुर्भावान्कथयतांसुताद्वाराहोपिवाराहस्ताथंवाराहस्तादृशोपिप्रादुर्भावोस्तीतिनोऽस्माभिःश्रुतं वांचतहृदंश्रोऽश्रुतस्यवाराहशब्दः श्रेष्ठयज्ञवा-
ची तस्यचरितंसर्वकार्यजनकत्वंविधिंप्रसर्वत्वलक्षणांविस्तरंणावित्तांस्मनुष्ठानेतिकर्तव्यता कर्मेतेनसंतर्पणीयंदेवतादिकं गुणाः द्रव्यदेशकालादिः संतानः प्रयोगविधिः

जनमेजयउवाच प्रादुर्भावान्पुराणेषुविष्णोरमिततेजसः सतांकथयतामेववाराहइतिनःश्रुतं १ नजानेतस्यचरितंविधिंनैवतुवि-
स्तरात् नकर्मगुणसंतानान्नहेतुन्नमनीषितं २ किमात्मकोवराहःसकामूर्तिःकाचदेवता किमाचारप्रभावोवाकिंवातेनपुराकृतं ३
यज्ञार्थेसमवेतानांमिषतांच द्विजन्मनां महावाराहचरितंकृष्णद्वैपायनेरितं ४ यथानारायणोब्रह्मन्वाराहंरूपमास्थितः दंष्ट्र-
यागांसमुद्रस्थामुज्जहारारिसूदनः ५ विस्तरेणैवकर्माणिसर्वाणिरिपुघातिनः श्रोतुमिच्छाम्यशेषेणहरेःकृष्णस्यधीमतः
६ कर्मणामानुपूर्व्याच्चप्रादुर्भावाश्चयेविभोः याचास्यप्रकृतिर्ब्रह्मंस्तांमेव्याख्यातुमर्हसि ७ ॥ ॥ ॥ ॥ ॥

हेतुमधिकारं मनीषितंसागात्मकंस्वरूपस्यपारदं एतत्सर्वमहंनजानेतस्माद्वदस्वेत्यर्थः २ अशिष्यतामेवंवाराहस्यात्मादिकंपृच्छाः छिदेवंतत्पृच्छति किमात्मकः
आत्मास्वरूपं मूर्तिर्वाविग्रहः देवतातदधिष्ठाताईश्वरः आचारोऽस्यकर्तव्योधर्मः प्रभावःसामर्थ्यं ३ चरितंईरितंउक्तंतथापितुतन्नलब्धंनष्टानामित्यर्थः
४ यथाउज्जहारतथाश्रुतमितिशेषेणान्वयः ५ सर्वाणिवाराहादीनिनानावतारकृतानि ६ अस्यप्रादुर्भावतांगतस्यप्रकृतिःसमुद्रस्थानीया ७ ॥ ॥

कथमिति कर्मबंधहीनोऽपि कथमुत्तमात्स्थानाद्वासुदेवत्वं प्राप्त इत्यर्थः ८९ लीलार्थमवतारे तत्प्रयोजनार्थमित्यपि नयतो लीलायामपि नामितापरिहारादेः किय
तोऽपि प्रयोजनस्य सत्त्वात्प्रमाणं दृष्टपसनुत्तरभावादित्याशंक्याह किमर्थमिति १० ११ क्रमैः पादविक्षेपैः त्रिदशेप्सया देवानामिष्टसिद्ध्यर्थं त्रयो मार्गाः ध
र्मार्थकामाः अर्पितापंलोकः कामेनाधोलोकः तेषां मार्गास्त्रिभिः प्राप्यते १४ जगत्पंचभूतात्मकं सकारणं पीत्वा संहृत्य तोयमयं निर्विशेषं चिन्मात्ररूपं तत्र सलि

कथंस भगवान्विष्णुः सुरेशोरिनिषूदनः वसुदेवकुले धीमान्वासुदेवत्वमागतः ८ अमरैरावृतंपुण्यंपुण्यकृद्भिर्निषेवितं देवलोकंस
मुत्सृज्य मर्त्यलोकमिहागतः ९ देवमानुषयोर्नेता भूर्भुवः प्रभवो विभुः किमर्थंदिव्यमात्मानं मानुष्ये संन्ययोजयत् १० यश्चक्रं वर्त
यत्येको मानुषाणामनामयं मानुष्ये सकथं बुद्धिं चक्रे चक्रभृतां वरः ११ गोपायनं यः कुरुते जगतः सार्वलौकिकं सकथं गां गतो देवो
विष्णुर्गोपत्वमागतः १२ महाभूतानि भूतात्मा योदधार चकार च श्रीगर्भः सकथं गर्भे स्त्रिया भूचरया धृतः १३ येन लोकान्क्रमै
र्जित्वा त्रिभिस्त्रींस्त्रिदशेप्सया स्थापिता जगतो मार्गास्त्रिवर्गप्रभवास्त्रयः १४ योऽन्तकाले जगत्पीत्वा कृत्वा तोयमयं वपुः लोक
मेकार्णवं चक्रे दृश्यादृश्येन वर्त्मना १५ यः पुराणे पुराणात्मा वाराहं रूपमास्थितः विषाणाग्रेण वसुधामुज्जहारारिसूदनः १६
यः पुरा पुरुहूतार्थे त्रैलोक्यमिदमव्ययं ददौ जित्वा सुरगणान्सुराणां सुरसत्तमः १७ ॥ : ॥ : ॥ : ॥ : ॥ :

ल एकोऽद्वितीय इति सलिलपदप्रयोगात्तादृशं कृत्वा लोकं एकार्णवं चक्रे सर्वं चिन्मात्रमिति भावनया तन्मात्रं अवशेषयतीति भावः तत्र साधनं दृश्यादृश्येन वर्त्मनेति
दृश्यादृश्येन चिज्जडांशेन चिद्रूपेण जीवरूपेण मार्गेण अयं भावः योऽहंकारमात्रिगमसंसृष्टजातेतेनैव सम्यग्गर्भितेन संहरन् तमपि मार्गोध्यस्य आत्मरूपं सं
हरतीति १५ विषाणाग्रेण दंताग्रेण विषाणं दंतश्रृंगयोरित्यमरः १६ अमुतो इति छेदः सुराणां सुरेभ्यः १७ ॥:॥:॥ ७ ॥ ७॥ ७॥ ७॥:

द्विधा नरसिंहरूपेण १८ १९ सहस्रेत्यनंतवाचि येन अनिरुद्धात्मसर्वावतारविस्तुर्यं सलिलमंतं महार्णवस्थानीयं २० नाभ्यां नाभिदेशे नत्वपलहितां तस्यारणिः
: मथ्यनं दंडस्तु तल्लनालं ततस्योनाभ्यारण्यां पौतामहं गृहं पद्मं २१ २२ उत्सिक्तः दृप्तः २३ तिमिरं योगमायां २४ सुरारणिः देवमाता अदितिः तस्याः गर्भं वामनरूपं त्रि

येनसैंहं वपुः कृत्वा द्विधा कृत्वा च तत्पुनः पूर्वं दैत्यो महावीर्यो हिरण्यकशिपुर्हतः १८ यः पुराप्यनलो भूत्वा और्वः संवर्तको विभुः पा
तालस्थोर्णवगं सम्पपौ तोयमयं हविः १९ सहस्रशिरसं देवं सहस्राक्षं सहस्रशः सहस्रचरणं देवं यमाहुर्वै युगे युगे २० नाभ्यारण्यां
समुत्पन्नं यस्य पैतामहं गृहं एकार्णवगते लोके नष्टे स्थावरजंगमे २१ येनान्ते निहता दैत्याः संग्रामे तारकामये सर्वदेवमयं कृत्वा स
र्वायुधधरं वपुः २२ गरुडस्थेन चोत्सिक्तः कालनेमिर्निपातितः निर्जितश्च महादैत्यस्तारकश्च महासुरः २३ उत्तरांते समुद्रस्य क्षीरो
दस्यामृतोदधेः यः शेते शाश्वतं योगमास्थाय तिमिरं महत् २४ सुरारणिर्गर्भमधत्त दिव्यं तपः प्रकर्षाददितिः पुराणं शक्रं च
यो दैत्यगणावरुद्धं गर्भावसानेन निभृतं चकार २५ पदानि यो लोकमयानि कृत्वा चकार दैत्यान् सलिलेशयांस्तान् कृत्वा च देवांस्त्रि
दिवस्य देवांश्चक्रे सुरेशं त्रिदशाधिपं स्वे २६ पात्राणि दक्षिणादीनि च यस्सोलूखलानि च गार्हपत्येन विधिना अन्वाहार्येण
कर्मणा २७ अग्निमाहवनीयं च वेदिं चैव कुशं स्रुवं प्रोक्षणीयं ध्रुवां चैव आवभृथ्यं तथैव च २८ ॥ः॥ः

भूतं पूर्णकामं २५ सलिलेशयान् पातालस्थान् लेनसमुद्रजलपिहितत्वात् त्रिदिवस्य देवान् स्वर्गक्रीडापरान् २६ पात्रादीनि यज्ञोपकरणानि २७ आ
वभृथ्यं यज्ञांतस्नानापहितं तत्र ध्रुवनिष्कासस्सोमसलिलमाहिकं २८ ॥ः॥ ॥ः॥ ॥ः॥ ॥ ॥ः॥ ॥ः॥ ॥ ॥ः॥ ॥ ॥ ः ॥ ः

सुधात्रीणि सुधाप्रभृतीनि त्रीणि कर्माण्येव मध्याधोगतिसंज्ञानि २९ ३० तत्र यानलान् इष्टकाचयनपुरुषादिअग्निस्थापनपर्यंतस्थानानि ३१ पारमेष्ठ्येन परमेष्ठिना ब्रह्म
णतेन ३१ ३२ त्रिविधं श्रुतिस्मृतिशिष्टाचाररूपेण त्रिः प्रकाशप्रमाणं त्रिषु निम्नमैनि त्रिकालेषु कर्मसु प्रमेयेषु देवतागणि स्थावरजंगमानि शरीराणि उपचयो वृ
द्धिः लक्षणं हि पाल्लचतुष्पात्वादि ३४ त्रयो वर्णा इति भूर्भुवः स्वरंतानंहेतास्त्रैविद्या लोका भूराद्यः त्रैविध्यं त्रय्यपन्नुः सामात्मकं पावकाः गार्हपत्याद्यः त्रैका

सुधात्रीणि च यज्ञे हव्यकव्यप्रदानहि जान इत्यादीन्यनुगन्यतेकमादीन्यपि इत्यपि २९ भावार्थमंत्रविधिना यज्ञे कपत्नेकर्म
णि यथानत्तमित्सुवेसोमपाविवान्यार्थानपि ३० पतियानि च द्रव्याणि यत्रामस्तत्र यानेलान् सदस्यान्यजमानांश्च मेधादी
न्द्रकृतस्त्रमान ३१ क्षमाहपुरासर्वपारमेष्ठ्येनकर्मणा युगानुरूपः कृत्वा लोकाननुपराक्रमत ३२ तृणालवाश्च काष्ठाश्च
कलाश्चैकालमेवच मुहूर्तास्तिथयो मासाः पक्षाः संवत्सरास्तथा ३३ ऋतवः कालयोगाश्च प्रमाणं त्रिविधं त्रिषु आयुः
क्षेत्राण्युपचयो लक्षणं रूपसौष्ठवं ३४ त्रयो वर्णास्त्रयो लोकास्त्रैविद्यं पावकास्त्रयः त्रैकाल्यं त्रीणि कर्माणि त्रयोपायास्त्रयो
गुणाः ३५ सृष्टा लोकास्त्रयोऽनन्तापेनानन्तेन कर्मणा सर्वभूतगणस्रष्टा सर्वभूतगुणात्मकः ३६ ॥ :॥:॥:

ल्यं भूतं भविष्यद्वर्तमानाख्यं त्रीणि कर्माणि सात्विकराजसतामसानि त्रयोऽपायाः त्रिविधः स्वार्थभ्रंशः अर्थानुष्ठानपाटव्यसनरूपः पुत्रैषणावित्तैष
णालोकैषणारूपो वा त्रयो गुणाः सत्वाद्यः त्रयो वर्णा इत्यादिनोक्तः सृष्टा इत्युत्तरस्थेनान्वयः ३५ संख्यातास्त्रयोऽपि वैपुल्येन प्रत्येकमनंताः यतोऽनंतकर्म
संकल्पात्स्यं तेन सृष्टाः येन सृष्टाः स कीदृश इत्यत आह सर्वेति ३६ ॥:॥:॥:॥ :॥ :॥ ८॥ ८॥ : ८॥ : ०

ह॰टि॰
९५

योनृणांगतागताभ्यांमृतुजन्मभ्यांसर्वब्रह्मांडेनेता यश्चजीवरूपःसन्इंद्रियपर्वणियोगेनइंद्रियजन्मेनविषयसंबंधेनाप्नोतिसदेश्वरः ४७ चातुर्होत्रस
चलोकजिज्ञः होतारोपद्मपतेतस्य ४८ आन्वीक्षिकीत्रयीवार्त्तादंडनीतिरितिचतसृणांविद्यानांसमाहारश्चातुर्विद्यंतस्य दिशः अंतरिक्षगर्भयस्यसदिगंत
रः नभोभूतः आकाशत्वमापन्नः विभावसुः अग्निः यद्वाविशेषेणभातीतिविभाः ज्योतिः वसुः वसुमतीपृथिवी ४९ चंद्रसूर्यमयंचंद्रसूर्ययोरप्रधानांमनोज्योतिः

नृणामिंद्रियपूर्वेणयोगेनारमतेचयः गतागताभ्यांयोनेतासर्वत्रजगतीश्वरः ४७ योगतिर्धर्मयुक्तानामगतिःपापकर्मणां चा
तुर्वर्ण्यस्यप्रभवश्चातुर्होत्रंयस्याहिता ४८ चातुर्विद्यस्ययोवेत्ताचातुराश्रम्यसंश्रयः दिगंतरोनभोभूतोवायुरापोविभावसुः ४९
चंद्रसूर्यमयंज्योतिर्योगीशःक्षणदांतकः यःपरंश्रूयतेज्योतिर्यःपरंश्रूयतेतपः ५० यंपरंप्राहुरपरंयः परः परमात्मवान् नारा
यणपरावेदानारायणपराःक्रियाः ५१ नारायणपरोधर्मोनारायणपरागतिः नारायणपरंसत्यंनारायणपरंतपः ५२

चतुर्ज्योतिश्च योगीशोनिर्विकल्पकः मनसोंतकः क्षणदारात्रिरेवंअंतकोनाशकोयस्यतत्चतुर्ज्योतिः परंअंतकमूलं श्रूयतेनाहंदृष्टुंदृष्टोपिलो
योविद्यतइतिविदेहस्यज्ञे तपःतपसोध्यानस्यप्राप्यं मनसैवेदमाप्तव्यमितिश्रुतेः ५० यःपरस्त्वात्मानं अपरंविज्ञानेवयंप्राहुः परःपरात्तादपिपरंस
त्रात्परं सचआत्मवान्आत्मैवात्मामायाख्यशरीरस्तद्वान् मायिनंतुमहेश्वरमितिश्रुते ५१ ॥:॥

राम॰
९५

हिरण्योर्दिवरा: ४३ लोकांतकांतकः मृत्योरपिमृत्युः सेतुत्वंनामयोदाविधारकाणांपत्न्यादीनामपिसेतुः नियंतृणामपिनियंतेत्यर्थः मेध्यकर्मणांपवित्राणामपि
गंगादीनांपावनोपिपावनः ४४ प्रभवात्मकोऐश्वर्यस्वभावानांमरीच्यादीनांप्रभुस्थिरः सोमः सोमवल्लिप्रियदर्शनः तद्रूपः सोमभृतः ४५ ४७ वायुरेवप्राणः
स्थितिहेतुर्यस्यप्राणः ४८ अग्नेःप्राणःसत्वाग्निहुताशंकरोतितद्द्वारसादिति रसात्स्वप्नेनापृथक्कृतात्प्रसार्णेन पाकेतारक्तमेपरापरापाणितादिक्रमे

नारायणोयोमोक्षोनारायणःपरायणं आदित्यादित्यकपालिदेवोपस्तुतैत्यांतकोविभुः ४३ युगांतेसंवर्तकोपस्यलोकांतकांतकः सेतु
र्यौलोकसेतूनांमेध्योमेध्यकर्मणां ४ येनापावेदविद्रूपांप्रभुः प्रभवात्मनां सोमभूतःसौम्यानामग्निभूतोग्निवर्चसां ४५ मा
नुषाणांमनोभूतस्तपोभूतस्तपस्विनां विनयोनयवृत्तानांतेजस्तेजस्विनामपि ४६ विग्रहोविग्रहार्हाणांगतिर्गतिमतामपि सर्गेका
रकःसर्गाणांलोकहेतुरनुत्तमः ४७ आकाशप्रभवोवायुर्वायुप्राणोहुताशनः देवाहुताशनप्राणाः प्राणोग्नेर्मधुसूदनः ४८ रसा
च्छोणितसंभूतिःशोणितान्मांसमुच्यते मांसात्तुमेदसोजन्ममेदसोस्थीनिचैवहि ४९ अस्थ्नोमज्जासंभवतिमज्जातःशुक्रसं
भवः शुक्राद्गर्भःसंभवतिरसमूलकर्मणा ५० तत्रापांप्रथमोभागःससौम्योराशिरुच्यते गर्भोष्मसंभवोग्निर्योद्वितीयोराशिरुच्य
ते ५१ शुक्रसोमात्मकंविद्यादार्तवंपावकात्मकं भावौरसात्मकौह्येतौवीर्यंचशशिपावकौ ५२ ॥ : ॥ : ॥ :

णारेतोद्वाराणगर्भःसंभवतितिसर्वरसमूलेनासहेतुभूतेनकर्मणागर्भस्यापाणोस्तिद्वयोरर्थः ४९ ५० तत्रगर्भेऽपांविकारः प्रथमोभागःरेतोरूपःश्वेतत्वात्सौ
म्यश्चसः गर्भोष्मसंभवःगर्भस्यजठराग्निजन्मायोग्निवत्लोहितःसआग्नेयोद्वितीयोभागः ५१ एतदेवाहशुक्रमिति रसात्मकोयन्नकर्मणारसस्यैवविका
राहियस्मात्एषांरसादीनांवीर्यसारःशशिपावकौशुक्रशोणिते ५२ ॥:॥ :॥ :॥ :॥ :॥ :॥ :॥ :॥ :॥ :॥ :॥ :॥:॥

ह॰टि॰
९६

अग्नीषोमात्मकत्वं ज्ञातः साधयति कफेति त्रिभिः शुक्लाश्रयस्य सोमदैवतस्य कफस्य स्थानं हृदयं तद्देवप्रजापतिदैवतस्य मनसोपि स्थानं शोणिताश्रयस्याग्निदैवतस्य पित्तस्य स्थानं नाभिमण्डलं तद्देवाग्निदैवत्यप्राणवायोरपि स्थानं स्थानस्थानिनोः अधिष्ठेयाधिष्ठात्रोर्देहदेहिनोर्व्यवहारयोरभावात्सर्वं नामरूपात्मकं स्यादग्नीषोमात्मकमिति सर्वं ५३ दीव्यति व्यवहरतीति देवो वागभिमानी ५४ ५५ अंबुदसन्निभे यथाभ्रमज्योतिः सलिलपवनैर्मेघो वर्द्धते

कफवर्गं भवेच्छुक्लं पित्तवर्गं तु शोणितं कफस्य हृदयं स्थानं पित्तं नाभ्यां प्रतिष्ठितं ५३ देहस्य मध्ये हृदयं स्थानं तन्मनसः स्मृतं नाभिकोष्ठांतरं यत्तु तत्र देवो हुताशनः ५४ मनः प्रजापतिर्ज्ञेयः कफः सोमो विभाव्यते पित्तमग्निः स्मृतं येन अग्नीषोमात्मकं जगत् ५५ एवं प्रवर्तिते गर्भे वर्द्धितेऽबुदसन्निभे वायुः प्रवेशं संचक्रे संगतः परमात्मना ५६ ततोंऽगानि विसृजति बिभर्त्ति परिवर्द्धयन् स पंचधा शरीरस्थो भिद्यते वर्द्धते पुनः ५७ प्राणोऽपानः समानश्च उदानो व्यान एव च प्राणः स प्रथमं स्थाने वर्द्धमानोऽभिवर्त्तते ५८

ते एवं गर्भेपि अग्नीषोमीयप्राणोर्वर्द्धिते ऽतोऽचेतनत्वसमर्थः वायुः प्राणवायुसहचारोरात्मा पुर्य्यष्टकः ईश्वरांशसहितः प्रविशति तेनैव सह उत्क्रामति च ५६ ततो देहप्रवेशानंतरं अंगानि शिरआदीनि विसृजति निर्मातीति बिभर्त्ति पुष्टानि करोति सः प्राणोपाधिः पुर्य्यष्टकः प्राणः स पंचधा भावात्स्वयमपि पंचधा भिद्यते समाणश्च प्राणो नाम वर्त्तीति स्मृते ५७ प्रथमं स्थानं हृदयं वर्द्धमानोपि पिंडपोषणमिति शेषः ५८ ॥:॥ :॥:॥:॥: ॥ :॥:॥

गम॰
९६

पश्चिमं कायं जघनादि पादांतं ऊर्ध्वं गुदादेशात् संधिरार्षः व्याप्यते व्यायाममेवलता ध्यं कर्म करोतीति येन स व्यानः सर्वदेहसंधिव्यापी समानस्तु नाभिदेशस्थः संनिवर्त्तयेत् अशितपीतादिकं समीकृत्य तत्तत्स्थानं प्रापयेदित्यर्थः ततस्तेषां प्राणकर्मविभागानंतरं तत्संज्ञा तस्य भूतव्याप्तिः पृथिव्यादिसाक्षात्कारो जायते सा च इंद्रियगोचरात् इंद्रियाणां यो विषयो रूपादिस्तद्द्वारा तदाप्यायो गृह्यत इत्यर्थः ५९ अत्र हेतुमाह पृथिवीति यतः पृथिव्यादीनि इंद्रियाणि इंद्रियरूपेण प्राणानां शरीरे स्वस्थाने नेत्रगोलकादौ विष्ठानि स्वतत्तानि स्वेन योगेन चक्रिरे पार्थिवाद्याः पृथिव्यामेवं धातवः शिष्टा गृह्णाति

अपानः पश्चिमं कायमुदानोर्ध्वशरीरगः व्यानो व्यायच्छते येन समानः संनिवर्तयेत् भूतावाप्तिस्ततस्तस्य जायते इंद्रियगोचरात् ५९
पृथिवी वायुराकाशमापो ज्योतिश्च पंचमं तस्येंद्रियाणि दिष्टानि स्वेन योगेन चक्रिरे ६० पार्थिवं देहमाहुस्तं प्राणात्मानं च मारुतं
छिद्राण्याकाशयोनीनि जलात्स्रावः प्रवर्तते ६१ ज्योतिस्तु चक्षुषी तेजो ह्यात्मा तेषां यन्मनः स्मृतः ग्रामाश्च विषयाश्चैव यस्य
वीर्यात्प्रवर्तिताः ६२ ॥ ॥ ॥

आप्यं रसनं च स्वयं गुणं रसमेव गृह्णातीति तैजसं चक्षुस्तेजोगुणं रूपं वायव्यं स्पर्शनेंद्रियं तद्गुणं स्पर्शनं नाभसं श्रोत्रं तद्गुणं शब्दं च गृह्णातीत्यर्थः ६० देहं उपचितं कठिनांशं पार्थिवं पृथ्वीविकारं प्राणान्वायुविकारान् छिद्राण्याकाशे स्रावं द्रवभागं सर्वं जले ६१ चक्षुः ज्योतिः रूपप्रकाशकं जाठरादिवा तेषां पृथिव्यादीनां पंचानां तेजसात्मा तैजसोंशो मनः सर्वेषामिंद्रियाणां यन्नियामकं यस्य मनसो वशे यथा तेषां मध्ये ग्रामाः रूपाद्याश्च ग्रामाः पृथिव्यादयः विषयाः गंधादयः यद्ग्रामस्य ग्रामादयः सर्वे पंचमात्स्यान्निर्मिताः तद्द्वारे मनस्येव परमात्मा तिष्ठति यदि देहे किंचोत्पद्यते ६२

सनातनानन्अनादिसिद्धान्नैधनेनिधनमयाने नारंभानुषवं ९३ ९७ चत्वारिंशः ४० प्रश्नेति भारतात्वोक्तमपिपद्याशक्तिवक्ष्यामि
१ प्रवृत्तिंलीलाचेष्टितं २ सहस्राक्षमितिपंक्षा: आहुःशतिरशमस्येनाद्वपः सहस्रशक्ष्णे नंतकवीच्यअपंक्षविनाशिनं ३ अअपंक्षपरिणा

इत्येवंपुरुषःसर्वान्सृजन्लोकान्सनातनान् कथंलोकेनैधनेस्मिन्कृष्णोविष्णुरागतः ९३ एषमेसंशयोब्रह्मन्नेषमेविस्मयोमहा
न् कथंगतिर्गतिमतामापन्नोमानुषींतनुं ९४ स्फुटमेतत्सर्वंशस्पूर्वेषांचैवसंभवः श्रोतुमिच्छामिविष्णोस्तत्कृष्णीनांचयथाक्र
मं ९५ आश्चर्यंपरमंविष्णुर्देवैर्दैत्यैश्चकथ्यते विष्णोस्तत्त्रिमाश्चर्यंमयाचस्त्वमहामुने ९६ एतदाश्चर्यमाख्यानंकथयस्वसुखा
वहं प्रख्यातबलवीर्यस्यविष्णोरमिततेजसः कर्मणाश्चर्यभूतस्यविष्णोस्तत्त्वमिहोच्यतां ९७ इतिखिलेषुहरिवंशेआश्चर्यप्र
श्नोनामचत्वारिंशः ४० वैशंपायनउवाच प्रश्नभारोमहांस्तातप्युक्तः शार्ङ्गधन्वनः यथाशक्तितुवक्ष्यामिश्रूयतांवैष्णवंयशः
१ विष्णोःप्रभावश्रवणेदिष्ट्यातेमतिरुत्थिता हंतविष्णोःप्रवृत्तिंचशृणुदिव्यामयोनिजो २ सहस्राक्षंसहस्रास्यंसहस्रचा
णांचयं सहस्रशिरसंदेवंसहस्रकरमव्ययं ३ सहस्रजिह्वंभास्वंतंसहस्रमुकुटंप्रभुं सहस्रदंसहस्रादिंसहस्रभुजमव्ययं
४ सवनंहवनंचैवहव्यंहोतारमेवच पात्राणिचपवित्राणिवेदिंदीक्षांचरुंस्रुवं ५ ॥:॥:॥:॥

मिनं ४ एवंद्वाभ्यांसर्वस्मान्मूर्त्तरूपमुक्त्वायज्ञरूपमाहसवनमिति सवनंकालंहवनंकर्म हव्यंद्रव्यं होतारंयजमानंपात्राणीउलूखलोस्रा
निस्फ्यकपालादीनि पवित्राणिकुशमयदर्भपवित्रादीनि दीक्षांसंस्कारं ५ चरुःस्थाली ७ ॥७॥ ७॥ ७॥ ७॥ :॥७

ब्राह्मणेभ्यो ह्यनायासं दक्षिणाभ्यां महापौषेः अयनं हविर्भिः प्रवरां अर्द्धमुत्तमिदं सामगं दत्वा महः नेयुक्तीताल ६ होतारं ऋत्विजं यजनं
इष्टकामपंस्थंडिले ७ इष्टानि राकहायनीशाकदायो निसोमकृपायध्यानि आसप्ताग्निअनुक्तं मशालो दीनि अर्थ्यलावर्णादि ८ भागस्त्रगाय

स्रुक्सोमं पूर्वमुत्सृज्य ब्राह्मणान् दक्षिणायनं अर्द्धं पुंसामगं विमं समस्पृशं समदः ६ यूपं समित्कुशान् दर्भान् चमसोलूखलानि च भाजनं
पत्नीं शमिचहोतारं चयनं चयत ७ इष्टाम्नाति प्रमाणानि चाग्नीनां स्थावराणि च प्रायश्चित्तानि चार्घं च स्थंडिलानि कुशांस्तथा ८ मंत्रं
यज्ञं वह्निं भागं भागधेयं चयत अग्नेभुजं सोमभुजं घृतार्चिषमुदायुधं ९ आहुर्वेदविदो विप्रा यं प्रपन्ने शाश्वतं विभुं न स्यादि ह्येष मु
रेशस्य श्रीवत्सांकस्य धीमतः १० प्रादुर्भावसहस्राणि अतीतानि नसंशयः भूयश्चैव भविष्यन्ति इत्येवमाह प्रजापतिः ११ यस्य स्त्रीसम
हाराजपुराणादिप्रांकथ्यानुभो यदर्थं भगवान् विष्णुः सुरशोकविसूदनः देवलोकं समुत्सृज्य वसुदेवकुले भवत् १२ तन्नेहं संप्रवक्ष्यामि
मिश्रणुसर्वमशेषतः वासुदेवस्य माहात्म्यं चरितं च महात्मनः १३ हितार्थं सुरमर्त्यानां लोकानां प्रभवाय च बहुशः सर्वभूतात्मा
प्रादुर्भवति कार्यतः १४ प्रादुर्भावांश्च वक्ष्यामि पुण्यान् दिव्यगुणोपेतान् छांदसाभिरुदाराभिः श्रुतिभिः समलंकृतान् १५

आदित्यं छंदः छंदांसि वेदेभ्यो हृव्यमहाश्रंगानीति लिंगदर्शनात् अग्नेभुजं प्राप्याणिधुंतरहायुधं उद्यतीयं ९ यं सर्वेयज्ञांगमयं प्रपन्ने आहुः शाश्वतां नित्ये
कल्पे वेदाख्यप्रमाणाहः सर्वभुक्तेतु फलदातारः ईश्वरः धीमतः धीप्रवर्तकस्य १० प्रजापतिः सर्ववेददर्शी ब्रह्मा ११ १२ हितार्थं प्रयोजनं प्रभवाय
ऐश्वर्याय १४ ॥ : ॥ : ॥ : ॥७॥ १५ ॥

१६ संभवतिशरीरंधत्तेएतेनमहत्त्विप्रधानाज्ञोमूर्त्तिरुक्ता १७ तामसिकीमाहतस्यहीति १८ तामसीमाहद्वितीयेतिनिद्रायोगंयोगमयींनिद्रां संहारसमये
संहारक्रियातत्परं कीदृशंनिद्रायोगंकिमध्यात्मविचितकंकुत्सिताः अध्यात्मविचितकाः सविकल्पसमाधिमंतोयस्मात्त १९ प्रादुर्भावमेवाहदृश्येति २१

सुधीः अथतत्वाकूमूलानिबोधजनमेजय इदंगुणाणांपरमेपुराणंवेदैश्चसंमितं १६ हंततेकथयिष्यामिविष्णोर्दिव्यांकथांशृणु य
दायदाहिधर्मस्यग्लानिर्भवतिभारत धर्मसंस्थापनार्थायतदासंभवतिप्रभुः १७ तस्यसैकामहाराजमूर्त्तिर्भवतिसत्तमा नित्यंदि
विष्ठायाराजंस्तपश्चरतिदुश्चरं १८ द्वितीयाचास्यशयनेनिद्रायोगमुपाययौ प्रजासंहारसर्गार्थंकिमध्यात्मविचिंतकं १९ सुप्त्वा
युगसहस्रंसप्रादुर्भवतिकार्यवान् पूर्णेयुगसहस्रेतुदेवदेवोजगत्पतिः २० पितामहोलोकपालाश्चंद्रादित्यौहुताशनः ब्रह्मा
चकपिलश्चैवपरमेष्ठीतथैवच २१ देवाःसप्तर्षयश्चैवत्र्यंबकश्चमहायशाः वायुःसमुद्राःशैलाश्चतस्यदेहंसमाश्रिताः २२
सनत्कुमारश्चमहानुभावोमनुर्महात्माभगवान्प्रजाकरः पुराणदेवोथपुराणिचक्रेप्रदीप्तवैश्वानरतुल्यतेजाः २३ येनचा
र्णवमध्यस्थौनष्टेस्थावरजंगमे नष्टेदेवासुरगणेप्रनष्टोरगराक्षसे २४ योद्धुकामौसुदुर्धर्षौदानवौमधुकैटभौ

ति तदंगेलीनानांदेवानामाविर्भावएवतस्यप्रादुर्भावइत्यर्थः देवदेवोमहादेवः जगत्पतिर्विष्णुः २० २२ सनादिति सनत्कुमारादिरूपोनारायणः
पुराणिशरीराणिब्रह्मादिस्तंबपर्यंतानांप्राणिनांचक्रे २३ मध्यस्थौदानवावितिद्वयोःसंबंधः २४ श्री। मितंबांकेवल्पं २५ ॥ : ॥

पुष्करे नाभिकमले पत्रं यस्मात् २६ यत्र पुराणे वेदः मंत्रब्राह्मणराशिः श्रुतिसमाहितः श्रुतिश्रोत्रे निहितो दृष्टवान्तरं तु श्रुतिमूलको पमर्द इत्यर्थः
२७ यस्य रूपाविभूतिमानविदर्भ्यहाम विशांतारास्य मध्ये इति वाराहप्रादुर्भावस्य तावन्मात्रस्य श्रुतिमूलकत्वमाह वाराह इत्यस्य श्रुतिमुख इति २८ वेदा-चतुः

पुराकमलनाभस्य स्वपतः सागराम्भसि पुष्करे यत्र संभूता देवाः सर्षिगणाः पुरा २६ एष पौष्करको नाम प्रादुर्भावो महात्मनः
पुराणे कथ्यते यत्र वेदः श्रुतिसमाहितः २७ वाराहस्तु श्रुतिमुखः प्रादुर्भावो महात्मनः यत्र विष्णुः सुरश्रेष्ठो वाराहं रूपमास्थि
तः २८ वेदपादो यूपदंष्ट्रः क्रतुदंतश्चितीमुखः अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः २९ अहोरात्रेक्षणो दिव्यो वेदांग
श्रुतिभूषणः आज्यनासः स्रुवतुंडः सामघोषस्वनो महान् ३० धर्मसत्यमयः श्रीमान् क्रमविक्रमसत्कृतः प्रायश्चित्तमहाघो
णः पशुजानुर्महाभुजः ३१ उद्गात्रान्त्रो होमलिंगः फलबीजमहौषधिः वाय्वंतरात्मा मंत्रस्फिग्विकृतः सोमशोणितः ३२
वेदस्कंधो हविर्गंधो हव्यकव्यातिवेगवान् प्राग्वंशकायो द्युतिमान् नानादीक्षाभिरर्चितः ३३ ॥ ॥ ॥

संख्यासाम्यासादायम् आदिवाराहो यास्कैर्येतांगानि वाराहांगे पुञ्चिन्तनीयानि तेषां पर्यायसंग्रहः २६ २८ ३१ फलबीजमहौषधिः फलेष्वणीबी
जं दर्भेतोत्र तद्रूपाश्चौषधयो यस्य सवहेतुत्वसामान्यात् ओषधयः स्वाप्यैतरस्य वर्णः विकृतोऽभिषुतः सोमः सोमरसरस्य वर्णः स्फग्वशोणितयुत्र
समासैकदेशस्य सोमस्य विशेषणं विकृत इति ३१ ३२ ॥ ॥ ७ ॥

उपाकर्षेत्साध्यायलोकाः सएवोद्धस्यहृचकोमहृषाणांपसप्रवर्ग्योधुर्मेसंतपगार्गोमहावीरुत्साहवृत्तिः आवृत्तिः सैवमहृषाणांपस ३१ ३२ चक्रायित्रिपमिति
शेषः ३ प्रसन्नाहेणायज्ञमयेनवाराहेण ३५ नारसिंहप्रादुर्भावः नृसिंहात्मापिमात्रिमतत्श्रुतिमूलएवेत्यभिसंधायाह नारसिंहमिति भूत्वाप्याविभूय ३६

रक्षितागरुडयोयोगीमहासत्वतपोमहान् उपाकर्मोष्ठरुचकः प्रवर्ग्यावर्त्मभूषणः ३१ नानाछंदोगतिपथोगुह्योपनिषदासनः छा-
यापत्नीसहायोवैमेरुशृंगइवोच्छ्रितः ३२ महींसागरपर्यंतांसशैलवनकाननां एकार्णवजलेभ्रष्टामेकार्णवगतांप्रभुः ३३ दं-
ष्ट्राग्रेणसमुद्धृत्यलोकानांहितकाम्यया सहस्रशीर्षोदेवादिश्चकारपृथिवींपुनः ३४ एवंयज्ञवराहेणभूत्वाभूतहितार्थिना उ-
द्धृतापृथिवीदेवीसागरांबुधरापुरा ३५ वाराहएषकथितोनारसिंहमतःशृणु यत्रभूत्वामृगेंद्रेणहिरण्यकशिपुर्हतः ३६ पुराकृ-
तयुगेराजन्सुरारिर्बलदर्पितः दैत्यानामादिपुरुषश्चचारतपउत्तमं ३७ दशवर्षसहस्राणिशतानिदशपंचच जलोपवासस्त-
स्थासीत्स्थानमौनदृढव्रतः ३८ ततःशमदमाभ्यांचब्रह्मचर्येणचानघ ब्रह्माप्रीतमनास्तस्यतपसानियमेनच ३९ तंवैस्व-
यंभूर्भगवानस्वयमागत्यभूपते विमानेनार्कवर्णेनहंसयुक्तेनभास्वता ४० आदित्यैर्वसुभिःसाध्यैर्मरुद्भिर्दैवतैःसह रुद्रैर्वि-
श्वसहायैश्चयक्षराक्षसकिन्नरैः ४१ दिशाभिर्विदिशाभिश्चनदीभिःसागरैस्तथा नक्षत्रैश्चमुहूर्तैश्चखेचरैश्चमहाग्रहैः
४२ देवर्षिभिस्तपोवृद्धैःसिद्धैःसप्तर्षिभिस्तथा ॥

दैत्यानामादिपुरुषः हिरण्यकशिपुः ३७ जलोपवासः जलमात्राहारः
स्थानेदृढासनंमौनंइंद्रियसंयमः ताभ्यांसहदृढंव्रतंयस्यअहोयस्यसतथाविधउपवासः ३८ ४२ ॥:॥

पृ॰ धनदः धनप्रदः ५१ ५२ तवाद्भुतारत्न न देवाश्च तु यो स्थाने षष्ठी ५३ ५८ वाक्यं देवानामिति निशेषः ५९ ।। ःः।ः ।। ःःः ।ः ।।ः।।

एतर्षिभिः पूज्यमानो मे गंधर्वैश्चाप्सरोगणैः ४३ चराचरगुरुः श्रीमान्वृतः सर्वैः सुरैस्तथा ब्रह्मा ब्रह्मविदां श्रेष्ठो दैत्यं वचनमब्रवी
त् ४४ प्रीतोऽस्मि तव भक्तस्य तपसानेन सुव्रत वरं वरय भद्रं ते यथेष्टं काममाप्नुहि ४५ हिरण्यकशिपुश्चाथ वचनं देवासुरेश्व
रौ नय चोरगा रक्षाः न मानुषाः पिशाचा वा निहन्युर्मां कथंचन ४६ ऋषयो वा न मां शापैः क्रुद्धा लोकपितामह शपेयुस्तपसा यु
क्ता वरमेतं वृणोम्यहं ४७ न शस्त्रेण न चास्त्रेण गिरिणा पादपेन वा न शुष्केण न चार्द्रेण स्यान्न चान्येन मे वधः ४८ पाणिप्रहारेणै
केन सभृत्यबलवाहनं यो मां नाशयितुं शक्तः स मे मृत्युर्भविष्यति ४९ भवेयमहमेवार्कः सोमो वायुर्हुताशनः सलिलं चान्त
रिक्षं च नक्षत्राणि दिशो दश ५० अहं क्रोधश्च कामश्च वरुणो वासवो यमः धनदश्च धनाध्यक्षो यक्षः किंपुरुषाधिपः ५१ एवमुक्त
स्तु दैत्येन स्वयंभूर्भगवांस्तथा उवाच दैत्यराजं तं प्रहसन्नृपसत्तम ५२ ब्रह्मोवाच एतान्दिव्यान्वरांस्तात मया दत्तांस्तवाद्भुतान् सर्वा
न्कामानिमांस्तात प्राप्स्यसि त्वमसंशयं ५३ एवमुक्त्वा तु भगवान्जगामाकाशमेव च वैराजं ब्रह्मसदनं ब्रह्मर्षिगणसेवितं ५४
श्रुत्वा दिव्यं वरं तं च दत्तं सलिलयोनिना विविधं तापयामासुर्देवाः शक्रपुरोगमाः ५५ ततो देवाश्च नागाश्च गंधर्वा मुनयस्त
था वरप्रदानं श्रुत्वैव पितामहमुपस्थिताः ५६ देवा ऊचुः वरेणानेन भगवन्बाधयिष्यति नोऽसुरः तत्प्रसीदस्व भगवन्
वधोऽप्यस्य विचिंत्यतां ५७ भगवान्सर्वभूतानां स्वयंभूरादिकृद्विभुः स्रष्टा च हव्यकव्यानामव्यक्तप्रकृतिर्ध्रुवः ५८ सर्वलो
कहितं वाक्यं श्रुत्वा देवः प्रजापतिः प्रोवाच भगवान्वाक्यं सर्वान्देवगणांस्तथा ५९ ।। ःः।।

ह॰टि॰
१०

६६ ब्रह्मदेवं ब्राह्मणानां देवतं ६७ नोऽस्मान् नोऽस्माकं ६८ ७४ जीमूतघनसंकाशः मेघकदंबवर्णः ७४ ॥ छ॥ छ॥ ः॥ छ॥

अब्रवंस्त्रिदशास्तेन प्रार्थ्यंतं तपसः फलं तप्ततोऽनेऽस्य भगवान् स्ववधं विष्णुः करिष्यति ६० एतच्छ्रुत्वा सुराः सर्वे वाक्यं पंकजसंभवात् स्वानि स्थानानि दिव्यानि जग्मुस्ते वै मुदायुताः ६१ लब्धमात्रे वरे चापि सर्वाः सो बाधत प्रजाः हिरण्यकशिपुर्दैत्यो वरदानेन दर्पितः ६२ आश्रमेषु महाभागान्मुनीन्वै संशितव्रतान् सत्यधर्मरतान्दांतान् पुरा धर्षितवांस्तु सः ६३ देवांस्त्रिभुवनस्थान्पराजित्य महासुरः त्रैलोक्यं वशमानीय स्वर्गे वसति दानवः ६४ यदा वरमदोन्मत्तो न्यवसद्दानवो दिवि याज्ञियान्कृतवान् दैत्यानपात्रांश्च देवताः ६५ आदित्याश्च ततो हृष्टा विश्वेदेवास्तथा शरण्यं शरणं विष्णुमुपतस्थुर्महाबलं ६६ देवयज्ञमयं ब्रह्म ब्रह्मदेवं सनातनं भूतं भव्यं भविष्यं च प्रभुं लोकनमस्कृतं नारायणं विभुं देवाः शरण्यं शरणं गताः ६७ देवा ऊचुः त्रायस्व नोऽद्य देवेश हिरण्यकशिपोर्भयात् त्वं हि नः परमो धाता ब्रह्मादीनां सुरोत्तम ६८ त्वं हि नः परमो देवस्त्वं हि नः परमो गुरुः उत्फुल्लांबुजपत्राक्ष शत्रुपक्षभयावह त्वं याहि निधनं तस्य शरण्यस्त्वं भवस्व नः ६९ विष्णुरुवाच भयं त्यजध्वममरा अभयं वो ददाम्यहं तथैव त्रिदिवं देवाः प्रतिपद्यत मा चिरं ७० एष तं सगणं दैत्यं वरदानेन दर्पितं अवध्यममरेंद्राणां दानवेंद्रं निहन्म्यहं ७१ वैशंपायन उवाच एवमुक्त्वा स भगवान्विसृज्य त्रिदशेश्वरान् हिरण्यकशिपोः स्थानं आजगाम महाश्रीः सः ७२ नरस्य कृत्वार्द्धतनुं सिंहस्यार्द्धतनुं प्रभुः नारसिंहेन वपुषा पाणिं संस्पृश्य पाणिना ७३ जीमूतघनसंकाशो जीमूतघननिस्वनः जीमूतघनदीप्तौजा जीमूत इव वेगवान् ७४ ॥ ः॥ छ॥ ः छ॥

रम॰
१०

८४ इंद्रतापनश्चवातापिश्चेतिहुंहुंः ८४ ९० ॥ ७ ॥ ४॥ ४॥ ५॥ः ः४॥ ५ ॥ ः४॥ ७॥ ४॥ ७॥ ३॥ः॥ः

हैतंसोतिबलंदृप्तशार्दूलसमविक्रमं दृप्तैर्दैत्यगणैर्गुप्तंहतवानेकपाणिना ७५ नृसिंहरूपकल्पितोभूयोऽपंचाग्निनोऽपाः पद्मनाभेन
माऽभ्रिमहत्पंदैत्यविनाशनं ७६ बलेर्बलवतोयत्तेबलिनाविष्णुनापुरा विक्रमैस्त्रिभिराक्रान्तालोकाःसोमितास्तेमहासुराः ७७ विप्रचित्तिःशि
बिःशंकुरयःशंकुस्तथैवच अयःशिराअश्वशिराहयग्रीवश्चवीर्यवान् ७८ वेगवान्केतुमानुग्रःसोग्रव्यग्रोमहासुरः पुष्करःपुष्कल
श्चैवसाश्वोऽश्वपतिरेवच ७९ प्रह्लादोऽश्वशिराःकुंभःसंह्रादोगगनप्रियः अनुह्रादोहरिहरौवाराहःसंकरोरुजः ८० शरभःशलभश्चै
वपाकोऽक्रूपनःकोपनःकपः बृहत्कीर्तिर्महाजिह्वःशंकुकर्णोमहास्वनः ८१ दीर्घजिह्वोऽर्कनयनोमृदुचापोमृदुप्रियः वायु
र्गविष्ठोनमुचिःशंबरोविज्वरोमहान् ८२ चंद्रहंताक्रोधहंताक्रोधवर्धनएवच कालकःकालकेयश्चवृत्रःक्रोधोविरोचनः
८३ गरिष्ठश्चवरिष्ठश्चप्रलंबनरकावुभौ इंद्रतापनवातापीकेतुमान्बलदर्पितः ८४ असिलोमापुलोमाचवाष्कलःप्रमदो
मदः वैस्त्रकःकालवदनःकरालःकौशिकःशाः ८५ एकाक्षश्चंद्रहाराहुःसंह्रादःसोमहास्वनः शतघ्नीचक्रहस्ताश्चतथा
पारघपाणयः ८६ अश्मयंत्रायुधोपेताभिंदिपालायुधास्तथा शूलोलूखलहस्ताश्चपरश्वधधरास्तथा ८७ पाशमुद्गरह
स्ताश्चतथापरिघवैतथामुसलपाणयः महाशिलाप्रहरणाःशूलहस्ताश्चदानवाः ८८ नानाप्रहरणाघोरानानावेषामहा
